जन्म मानते चले आये हैं। अब वह सिद्धान्त निर्मूलित हो जायगा और अध्यवसायात्मक निश्चयापरपर्याय बुद्धि तत्त्वसे अहंकारादियोंके जन्मका सिद्धान्त स्वीकारना पडेगा। कारण कि आप महत् शब्दका अर्थ बुद्धि करते हैं। दूसरी बात यह है कि आजतक कहीं भी वाङ्मयमें बुद्धिके लिये महत् शब्दका प्रयोग, किसी अच्छे ऋषि-मुनि या कविके द्वारा किया हुआ उपलब्ध भी नही होता। नहीं समझा जाता कि यह महत् शब्द विशेषणीभूत है या विशेष्यभूत।

इससे अतिरिक्त दूसरा प्रश्न यह भी उपस्थित होता है कि पञ्च तन्मात्राओंमेंसे पञ्च भूतोंकी उत्पत्तिका विधान किया गया है। ये पञ्च भूत आध्यात्मिक शारीरिक हैं या आधिभौतिक और आधिदैविक सूर्य, चन्द्र, अन्तरिक्षादिरूप ?

सांख्य तथा योग ऊपर पर्याप्त चिन्तन न होनेके कारण हम बहुत पीछे रह गये हैं। श्रुतियोंने कहा कि आत्मामेंसे आकाश, आकाशमेंसे वायु, वायुमेंसे अग्नि, अग्निमेंसे पानी और पानीमेंसे पृथ्वी उत्पन्न हुई ? आज हम अपनी स्वतन्त्र प्रक्रियासे इन वेदवचनोंको सर्वप्रमाणसिद्ध नहीं कर सकते। पृथ्वीमेंसे वनस्पतियोंका उद्भव कैसे हुआ ? अन्नौषध वनस्पतियोंमेंसे चेतन प्राणी कैसे उत्पन्न हुआ ? प्राणोका और मनका निश्चित वास्तविक स्वरूप क्या है ? विज्ञान और आनन्द यह भी क्या वस्तु है ? इसका सुदृढ़ प्रतिपादन करनेमें आज हम अत्यन्त असमर्थ हैं। कारण कि सांख्य और योग दृष्टिसे इन तत्त्वोंका तलस्पर्शी चिन्तन करनेके व्यापारसे हम बहुत दूर भाग गये हैं।

मुझे विश्वास है कि मेरा यह भाष्यालोचन इतनी सेवा अवश्य ही करेगा कि जिससे भविष्यकालके किसी एक संस्कृतज्ञ विद्वान्को वैदिक विज्ञान पद्धतिकी तरफ दृष्टिक्षेप करने प्रोत्साहन मिलेगा और वह वैदिक महर्षियोंके और भारत गौरवको बढानेमें सफल भी हो सकेगा। श्रीमद्देवी-भागवतमें एक स्थल पर कहा है कि—

घृतमिव पयसि निमग्नं भूते भूते च वसति विज्ञानम्।
सततं मन्थयितव्यं मनसा मन्थानदण्डेन ॥

इस विज्ञानके मन्थनमें मेरा यह भाष्यालोचन सहज सेवामें आयगा तो वस्तुतः मैं अपने जीवनको सफल मानूँगा।

उपकारपरम्परा

मैं एक छोटासा जन्तु। जप, तप, योग, अनुष्ठान और उपासनासे अत्यन्त अस्पृष्ट मनोवृत्तिवाला। मुझसे यह भाष्य लोचन कैसे लिखा जाय यह मेरे लिये तो एक परम आश्चर्य की बात है। मैं तो मानता हूँ कि इसमें परब्रह्म परमात्मा की प्रेरणा ही प्रधान कारणीभूत है। मेरे पास इतना द्रव्य ही कहाँ है जिससे मैं पुस्तकसङ्ग्रहकी प्रवृत्तिमें सहज पदाधान भी कर सकूँ और भाष्यालोचन के लिये तो भाष्यों के संग्रहकी अत्यन्त आवश्यकता होती है। मैं इन सब आकर ग्रन्थों को कहाँ से लाऊँ? परमात्माने बिना कहे सुने सरस्वतीको मेरे घरमें निवास करने को प्रेरित किया। हमारी हाईस्कूल के आजके प्रिन्सिपल श्रीयुत के. यू. जोषी साहेबने आज से लगभग बीस वर्ष पहले

अपने सुशील श्यालक श्रीयुत मधुसूदन नरहरिशंकर शास्त्रीजी को कहा कि तुम अपने पुण्यश्लोक पिताजी की कुछ पुस्तकें पण्डितजी को दे दो। उन्होंने सबसे पहले भाष्यत्रयोपेत ब्रह्मसूत्र शाङ्कर भाष्य और कुछ अन्य ग्रन्थों के रूप में शाङ्कर सरस्वतीको मेरे घरमें प्रतिष्ठापित किया। कुछ वर्षों के बाद हमारे सम्माननीय प्रोफेसर श्री गोविन्दलाल भट्ट साहेबने सप्रदीप ब्रह्मसूत्राणुभाष्य से मेरा घर सुशोभित किया। शनैः शनैः हमारे प्रिय मित्र वैद्यराज श्री शिवप्रसाद करुणाशङ्कर भट्टजीने ईशाद्यष्टोत्तरशत उपनिषद् और भाष्यटीकोपेत पातञ्जल योगदर्शन आदि अनेक दिव्यग्रन्थों से मुझे सम्पन्न बनाया। गुजरातके अग्रगण्य श्रीमद्भागवतप्रवचनकार श्रीमान् कृष्णशङ्कर शास्त्रीजीने भाष्यप्रकाशरश्मिराजित समग्र अणुभाष्य भिजवाया। श्रीयुत डॉ. अरुणोदय नटवरलाल जानी साहेब के सहयोग से चतुःसूत्रीतकका श्रीभाष्य मिला और श्रीयुत शेठ वापालाल मगनभाई हरिभक्तिने अपना शंकर-प्रणीत उपनिषद्भाष्य बड़ी उदारतासे दिया। और फिर ब्रह्मसूत्र-भाष्यालोचन का प्रारम्भ हो गया। द्रव्य के बल से इन ग्रन्थों को प्राप्त करना मेरे लिये सर्वथा असंभव था। तो भी यह असम्भावित कार्य सम्पन्न सम्भूत हो गया—यह परब्रह्म परमात्मा की प्रेरणा या कृपा नहीं तो दूसरा क्या ?

कवि कुलगुरु कालिदासने कहा है कि—'बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः'। भाष्यालोचनकी चतुःसूत्री लिखी जा चुकी। मेरी इच्छा हुई यदि कोई ईश्वरीय अंश इस पर कृपादृष्टि करे तो इस कार्यको प्रगति प्राप्त हो। यह इच्छा भी पूर्ण हुई। परम

पूजनीय श्री १०८ रङ्ग अवधूत बापजीके चरणोंकी शरणमें गया
अवधूत बापजी बडौदे ही में विराजे हुए थे। प्रातःकाल लगभ
आठ बजे मैंने उनके करकमलोंमें चतुःसूत्री समर्पित की। मेरी
वेगवती अपनी अतिचपल सूक्ष्म दृष्टिसे कुछ क्षणोमें ही उन्हों
चतुःसूत्री–भाष्यालोचनका सारग्राही आलोचन कर लिया। ग्रन्थ
विलक्षण बल प्राप्त हुआ। अनेक विघ्नोके आने पर भी पवनवेग
ग्रन्थ आगे बढ़ने लगा। जब जब मैं पूज्यश्री अवधूत बापजीके दर्
करनेको जाता, वे ग्रन्थकी प्रगतिके कुशल – समाचार सब
पहले पूछते। कारण कि किसी एक दैवी प्रेरणासे ही यह ग्र
लिखा जा रहा था।

कुछ ही दिनोंमें प्रथमाध्यायका प्रथम चरण पूर्ण हो गया
मेरे प्रिय सुहृत् साहित्याचार्य श्री अमीरचन्द्र शास्त्रीजी इन दि
यहाँ ही रहते थे। मैंने यह ग्रन्थ उन्हे सुनाया। उन्होने स्वयं
उस पर उत्तम चिन्तन किया। अवधूतकृपासे प्रथमाध्याय
हुआ। और मेरे पूर्व पुण्योंके परिणामसे वन्दनीयचरण श्री १०
मद् भारती कृष्णतीर्थजी महाराजने एकान्त अविज्ञात वासके लि
हमारे अवधूत पारिवारके एक प्रथम कोटीके सदस्य सरदार
महेन्द्रकुमार पु. देसाई (सुरेश्वर देसाईवालों ,के निकेतनमें नि
करनेका एक महान् अनुग्रह किया। मैंने समाचार जाने। अ
मेरा भाग्योदय हो गया। मैंने अपने प्रिय सुहृत् सरदारश्री (ब
भाई) साहेबके सहयोगसे जगद्गुरु महाराजके समागमका सु
प्राप्त किया। लगभग दो महिने तक सतत रातको आठसे दस
तक ब्रह्मसूत्रभाष्यालोचन ग्रन्थ अनुक्रमसे उन्हे सुनानेका परम

भाग्य प्राप्त हुआ। जगद्गुरु महाराज बड़े ध्यानसे और बड़े प्रेमसे ग्रन्थ सुनते थे। स्थल स्थल पर अपने पाठान्तरोंसे भी वे ग्रन्थको अलङ्कृत करते थे। अनेक स्थल ऐसे आते थे जहाँ आद्य जगद्गुरु महाराजके विचारोंका विरोध भी किया गया था। मुझे बड़ा भय था कि कभी गुरु महाराज (श्री भारतीकृष्णतीर्थजीमहाराज) आद्य जगद्गुरु महाराजके विचारोंकी आलोचना सुनकर क्रुद्ध न हो जाँय। परन्तु मैं भीतभीतसा उस आलोचनाको सुना ही देता था। और गुरु महाराज बड़ी धीरता और गम्भीरतासे उसे सुनकर कभी उसके समर्थनमें कुछ प्रमाणोंका उपन्यास भी कर देते थे। गुरु महाराज (श्री भारतीकृष्णतीर्थजी)के इस अनुग्रहका सतत स्मरण रहे—इस लिये उनके पाठान्तरोंका स्थल स्थल पर निर्देश कर मैंने अपने इस ग्रन्थको गौरवान्वित बनाया है। फिर तो धीरे धीरे भाष्यालोचन आगे बढ़ने लगा। और अवधूत प्रेरणासे ही विद्याभास्कर विद्यावाचस्पति महामहोपाध्याय पण्डित श्री परमेश्वरानन्द शास्त्रीजी महाराजके और केन्द्रिय संस्कृत प्रचार विभागके प्रधान कार्यकर श्रीमान् रामकरण शर्माजी (आर. के. शर्माजी)के समागमका असम्भवतापूर्ण लोकोत्तर अवसर मुझे प्राप्त हुआ। मैंने तो उनके विश्रान्तिके क्षणोका ग्रन्थ दिखाने सुनानेमें ही अपव्यय कर डाला। कुछ पुण्य क्षण ऐसे भी मुझे प्राप्त हुए थे जिनमें हमारे वन्दनीय श्रीमान् सिद्धगोपाल शास्त्रीजीको और विद्यावाचस्पति विद्याभास्कर प्रो. श्री. शशिधर शास्त्रीजीको भी यह ग्रन्थ अंशतः मैं सुना सका था।

इस स्थलमें अपने तीन—चार आत्मीयों को मैं कभी नही भूल सकता। बरोडा यूनीवर्सीटी के निवृत्त प्रोफेसर श्रीमान्, डॉ. एस.

एस. भावे साहेब सब तरह मेरे पूज्य हैं। वित्त, बन्धुत्व, वयस्, कर्म और विद्या इन पाँचो सम्मानके साधनों में वे मुझ से बहुत आगे बढ़े हुए हैं। उनके आन्तर अनुरागका भाजन बनना एक तपश्चर्या का परिणाम है। उन्होनें और उनकी सतत सहचारिणी सुशीला श्रीमती लीलावती बहेन ने मुझे एक दिन नहीं, परन्तु सन् १९४२ से सदा सर्वदा, मैंने जो सहयोग मांगा, उसे देने में, एक क्षण का भी विलम्ब नहीं किया। श्रीमान् भावे साहेब कायिक वाचिक, मानसिक, और आर्थिक सभी प्रकारका सहयोगप्रदान कर चुके हैं और आज भी करते रहते हैं। उनके दिये-हुए ग्रन्थों मेंसे उपनिषद्वाक्यमहाकोश आजभी मुझे उत्तम सहयोग दे रहा है। दूसरे हमारे बन्धु हैं डॉ. श्री अरुणोदय नटवरलाल जानी। मैं इनके लिये क्या लिखूँ? इन्होने मुझे कौनसा सहयोग नहीं दिया? अभिप्रेत पुस्तकको कहीं से भी ला देना, प्रूफसंशोधन कार्य को आगे बढ़ाना, प्रमादवश रही हुई क्षतियों को दूर करना आदि अनेकविध सहयोगोंके प्रदान से और अन्य अनन्तविध उपचारों से वे आज भी मेरे जीवन को सुखद बना रहे हैं। उन डॉ. जानी साहेब के लिये और अन्तमें मेरे चिरञ्जीवी पुत्र श्री प्रबोध चन्द्र उपाध्यायके लिये मैं अधिक कुछ भी नहीं लिखना चाहता क्योंकि इनके ऋण में से आत्मा का उद्धार करना मेरे लिये असम्भव है। हमारी हाईस्कूल के अंग्रेजी प्रधान शिक्षक, एक उत्तम प्राध्यापककी योग्यताको धारण करनेवाले, हमारे प्रिय मित्र श्री एन. बी. पुराणिक साहेबने अंग्रेजी प्रूफसंशोधन में मुझे सतत साहाय्य दिया है। उनके इस सहयोगको भी मैं कैसे भूल सकूँगा। भवतु

इन सबके आशीर्वादोंका एक अदृश्य तेजःपुञ्ज एकत्रित हुआ। और उसने पूज्य श्री अवधूत बापजीको प्रार्थना की कि अब कमसे कम ब्रह्मसूत्रभाष्यालोचनकी चतुःसूत्री तो छप जानी ही चाहिये। अवधूत बड़े करुणानिधान हैं। उन आशीर्वादोंके पुञ्जरूप जीवात्माको निराश करना पूज्य श्री अवधूत बापजीको योग्य न लगा। उन्होने कभी किसीकी आशाका भङ्ग नही किया। उन्होने आज्ञा की। और आज ब्रह्मसूत्रभाष्यालोचनकी यह चतुःसूत्री मुद्रित और प्रकाशित हो कर आपके करकमलोंके सौरभका अनुभव कर रही है।

उपकारभार का एक भारी पर्वत सिर पर पड़ा हुआ है। मैं नहीं समझ सकता कि किसकी उपकारशिलाका कितना भार सिर है। अब तो दृष्टि एक उपकारशिलाको भी देखनेमें अशक्त बन गई है। कारण कि दृष्टि और मन उन उपकारशिलाओंके भारसे दबे हुए हैं। क्या करूँ? किससे क्षमा मागूँ? किसका उपकार मानूँ? अब तो यही अच्छा है कि आप सबको ही मैं अपने परमात्माका व्यष्टिरूप अंशावतार मान लूँ। और एक साथ आप सबको प्रणाम कर अपना प्रारम्भिक पूर्ण करूँ।

॥ ॐ नमःशिवाय ॥

संवत् २०२० निवेदक,

आषाढी गुरुपूर्णिमा. विद्याभास्कर म. व. उपाध्याय

॥ ब्रह्मविदाप्नोति परम् ॥

श्रीः ॥

॥ ॐ नमःशिवाय ॥

अथ ब्रह्मसूत्रभाष्यालोचनम् ॥

तत्रादौ प्रथमाध्यायस्य प्रथमपादस्य

प्रथमा

चतुःसूत्री ॥

आधारं यमवाप्य निर्मलमियं देवी पराऽम्बाऽव्यया,
रूपैः स्वैरथ भूर्भुवःस्वरभिधैर्वेदेषु जेगीयते ।
यञ्चाखण्डममुं निजैर्विरचिते देहाभिधे पञ्जरे,
तन्मात्रैः शकलीकरोत्यविकलः पायात् स मां शङ्करः ॥१॥

सत्यान्वेषणकर्मणेऽर्पितनिजप्राणाः पुराणा इमे,
येऽप्याचार्यवरा वरानिव निजग्रन्थान् नवेभ्योऽददुः ।
सर्वाञ्शङ्करवल्लभादिविबुधानेतान् नमस्कुर्वता,
व्यासोक्तश्रुतिसारसूत्रविवृतिव्रातः समालोच्यते ॥२॥

शब्दार्थस्य विनिर्णये बहुविधानालोक्य भेदान् धियां,
किं तथ्यं किमतथ्यमित्यवितथप्रज्ञाफलावाप्तये ।
वर्षेभ्योऽपि परं भविष्यति सतो यत्नाननुष्ठास्यतां,
साहाय्याय विपश्चितां भवतु मे केषाञ्चिदालोचना ॥३॥

॥ "अथातो ब्रह्मजिज्ञासा" ॥ १ अ. १ पा. १ सू. ॥

इदं प्रथममत्रास्ति सूत्रं सूत्रकृता कृतम् ।
पदे पदे यत्र महान् मतभेदोऽवभासते ॥४॥

आद्यस्यैवाथशब्दस्य तेनाऽनेकार्थवाचिनः ।
सूत्रकृत्सम्मतार्थस्य निर्णये विमता बुधाः ॥५॥

कश्चिदाहाधिकारार्थमथशब्दमिह श्रुतम् ।
आनन्तर्यार्थकं कश्चित् कश्चिदारम्भसूचकम् ॥६॥

अथ-अथशब्दार्थनिरूपणे श्रीमद्वल्लभाचार्यमतम् ॥

तत्रादौ वल्लभाचार्यचरणानुमतं मतम् ।
निरूप्यते, यतस्तत्त्वबोधोऽतिसरलो भवेत् ॥७॥

व्यासोक्तब्रह्मसूत्राणामुक्त्वादौ ते विशिष्टताम् ।
न्यरूपयन् समग्रस्य ग्रन्थस्यापि प्रयोजनम् ॥८॥

सन्ति यद्यपि भूयांसि वेदाङ्गान्यर्थनिर्णये ।
समर्थानि, तथाप्येतैर्न सन्देहो निवार्यते ॥९॥

सन्देहवारणे शक्तः केवलो व्यासनिर्मितः ।
ब्रह्मसूत्रात्मको ग्रन्थ इति तेषामिहाग्रहः ॥१०॥

तथा हि-" सन्देहवारकं शास्त्रं बुद्धिदोषात्तदुद्भवः ।
विरुद्धशास्त्रसम्भेदादङ्गैश्चाशक्यनिश्चयः ॥
तस्मात् सूत्रानुसारेण कर्तव्यः सर्वनिश्चयः ।
अन्यथा भ्रश्यते स्वार्थान्मध्यमश्च तथादिमः ॥"

(अणुभाष्ये पृ. ४

"असन्दिग्धेऽपि वेदार्थे स्थूणाखननवन्मतः ।
मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो द्वयम् ॥"
(अणुभाष्ये पृ. ५)

'अथातो ब्रह्मजिज्ञासे'–त्यादिमस्याथ ते बुधाः ।
'कर्तव्या ब्रह्मजिज्ञासे'–त्यर्थं सूत्रस्य चाब्रुवन् ॥११॥

तथा हि–"तथा च निर्णये येन केनचिद् वक्तव्ये हरिः स्वयं व्यासो विचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति, 'ब्रह्मजिज्ञासा कर्तव्ये'ति, व्यासोक्तत्वादपि कर्तव्या ॥"
(अणुभाष्ये पृ. ५)

कर्तव्येति–पदं नात्र सूत्रे यद्यपि दृश्यते ।
तथापि तस्याध्याहारमावश्यकमुशन्ति ते ॥१२॥

तथा हि–"कर्तव्यपदाध्याहारे स्वातन्त्र्यं न भवति । अन्यथा..... स्वतन्त्रता स्यात् । ..... तद्यदि मीमांसा स्वतन्त्रा स्यात्, तज्जनितं ज्ञानं न ब्रह्मज्ञानं भवेत् ॥"
(अणुभाष्ये पृ. ५)

अध्याहारेण सूत्रेऽस्मिन् कर्तव्येतिपदस्य तु ।
वैधत्वं वैदिकत्वं च विचाराणां प्रसाध्यते ॥१३॥

तथा हि–"कर्तव्यपदाध्याहारे स्वातन्त्र्यं न भवति०" इति भाष्यस्य प्रदीपे–"विध्यर्थकतव्यप्रत्ययघटितकर्तव्यपदाध्याहारे कृते विचारस्य वैधत्वं स्याद्, वैधश्च विचारो वैदिक इति विचारस्योपनिषदुक्तफलसमर्पकता भविष्यति, न तु योगपुराणादीनामिवानौ* पनिषत्फलसमर्पकतेत्यर्थः ॥"

---

* 'अनौपनिषत्फलसमर्पकता" "औपनिषज्ज्ञानानुपयोगः" इत्यादा-
वादिवृद्धिः कथमिति चिन्त्यम् ।

ब्रह्मसम्बन्धिनां तेन विचाराणामशेषतः ।
कर्तव्यता विधिप्राप्ता वेदाध्ययनतः परम् ॥१४॥

कर्तव्येत्यत्र यस्तव्यप्रत्ययः श्रूयते पदे ।
विध्यर्थकत्वात् स ब्रह्म-विचारस्य प्रयोजकः ॥१५॥

तेनोपनयनात् पश्चाद् वेदाध्ययनतः परम् ।
त्यागाद् ब्रह्मविचारस्य प्रत्यवायोऽत्र सूच्यते ॥१६॥

सन्ध्यावन्दनवच्चायं विचारो ब्रह्मणः कृतः ।
न विशिष्टं फलं सूते-इति च ध्वन्यते बुधैः ॥१७॥

अत एव प्रदीपस्य प्रणेतारो विपश्चितः ।
सन्ध्यावन्दनवद् ब्रह्म-चिन्ताऽऽवश्यकतां जगुः ॥१८॥

तथा हि प्रदीपे-'निर्णीतवेदान्तार्थस्यापि सन्ध्यावन्दनवद् विचा
कर्तव्यताऽऽवश्यकीत्यर्थः' इति श्रीमदिच्छाराम
चरणाः ॥

अध्याहृतात्ततः शब्दात् कर्तव्येत्यत आग्रहात् ।
कदा केनेति तत्कालः कर्ता चाक्षिप्यते स्वतः ॥१९॥

नाऽनधीत्य जनः कोऽपि क्षमो ब्रह्मविचारणे ।
वेदाध्ययनतस्तस्मात् पर आक्षिप्यते क्षणः ॥२०॥

तथा हि-" वेदाध्ययनानन्तर्यं तु सिद्धमेव। न ह्यनधीत एव विचा
मर्हति । " (इत्यणुभाष्यम् पृ. ५.)

यश्च स्यादधिकार्यत्र वेदाध्ययनकर्मणि ।
स एव ब्रह्मचिन्तायामधिकारी च गण्यते ॥२१॥

तस्मात् त्रैवर्णिकस्यैव सिद्धो ब्रह्मविचारणे ।
सतोऽधिकारो, नान्यस्य शूद्रादेः सूत्रवर्जिनः ॥२२॥

तथा हि–" अधिकारी तु त्रैवर्णिक एव । न हि वेदविचारस्य वेदाधिकार्यतिरिक्तः शक्यते कल्पयितुम् ॥ " (इत्यणुभाष्यम् पृ. ९)

एवं ब्रह्मविचारोऽयं शिखासूत्रप्रधारिणा ।
द्विजेनैवास्त्यनुष्ठेयो न शिखासूत्रवर्जिना ॥२३॥

कर्तव्येति पदं त्वेवमध्याहृत्य महाप्रभुः ।
वल्लभो भगवान् सूत्रव्याख्यानमकरोदृजु ॥२४॥

स एव भगवान् पश्चाद् वल्लभाख्यो महाप्रभुः ।
अध्याहारे बहून् दोषानपश्यद् बुधगर्हितान् ॥२५॥

अन्योऽप्यन्यपदस्यात्र कृत्वाध्याहरणं तथा ।
अन्यार्थकल्पने शक्तो भवेद् बुद्धिप्रभावतः ॥२६॥

ततश्च न महर्षीणामभिप्रेतो विवक्षितः ।
व्याकृतो विशदश्च स्यात् सूत्रार्थो हितकारकः ॥२७॥

अल्पज्ञता सूत्रकृतो ह्यध्याहारेण गम्यते ।
अध्याहृतौ न प्रामाण्यमङ्गीकुर्वन्ति कोविदाः ॥२८॥

किञ्चास्मिन् प्रस्तुते सूत्रे कर्तव्येतिपदान्तरे ।
भवेदध्याहृते, सूत्रस्थोऽथशब्दो निरर्थकः ॥२९॥

विनाऽप्यथपदेनात्र कर्तव्येतिपदाहृतौ ।
आनन्तर्याद्यर्थलाभः स्वयमेव [1]प्रसेत्स्यति ॥३०॥

---

१. " भविष्यति " इति पाठान्तरम् ।

आनन्तर्यार्थलाभाय कृते त्वथपरिग्रहे ।
कस्मादित्यधिकार्थस्य [1]स्यादपेक्षा दुरत्यया ॥३१॥

सूत्रानुक्ताधिकार्थस्य पुनराक्षेपकर्मणा ।
कल्पनागौरवाऽऽपातान्निपतेद् भाष्यकृत् स्वयम् ॥३२॥

तस्मादथपदस्यात्र सार्थकत्वाय केचन ।
कर्तव्येत्यर्थमाख्यान्ति सूत्रव्याख्यानकोविदाः ॥३३॥

अध्याहृतपदार्थोऽसौ वाच्यः सूत्रस्थितेन चेत् ।
केनचित् स्यात् पदेनात्र ततो दोषो न संस्पृशेत् ॥३४॥

अतस्ते वल्लभाचार्याः कर्तव्येतिपदोदितम् ।
प्रथमस्याथशब्दस्य वाच्यमर्थमथोऽब्रुवन् ॥३५॥

तथा हि—" अथवा—अध्याहारकरणापेक्षयाऽथशब्द एवाधिकारे व्याख्येयः" इत्यणुभाष्यस्य प्रदीपे—"अथाध्याहारपक्षे दोषाः विचारस्य सौत्राक्षरैरेव कर्तव्यतामुपपादयितुमाह अथ वेत्यादि," (इति श्रीमदिच्छारामभट्टचरणाः पृ. ५

सूत्रस्थेनाथशब्देन कर्तव्येत्यर्थबोधनात् ।
'कर्तव्या ब्रह्मजिज्ञासे' त्यर्थं च प्रथमं जगुः ॥३६॥

कर्तृकालद्वयाक्षेपे पश्यद्भिर्गौरवं ततः ।
अथशब्दोऽधिकारार्थस्तैरेवोचे मनीषिभिः ॥३७॥

तथा हि—" अथवा—अध्याहारकरणापेक्षयाऽथशब्द एवाधिकारे व्याख्येयः " ॥ " अतोऽनेकदोषदुष्टत्वादधिकारार्थ एव श्रेयान् " (इत्यणुभाष्यम् पृ. ५—९)

---

१. " स्यादाकाङ्क्षा " इति पाठान्तरम् ।

अथशब्देनाधिकार–रूपेऽर्थेऽभिहिते सति ।
युक्तं क्रियापदं किञ्चिदध्याहार्यं तु तिष्ठति ॥३८॥

तदध्याहरणाद् दोषाद् भीतैराचार्यपुङ्गवैः ।
अधिक्रियत इत्येवं ततोऽथार्थोऽभ्यधीयत ॥३९॥

तथा हि–"यस्मात् कर्मादिभ्यो ज्ञानमेव पुरुषार्थसाधनमित्यतस्तज्ज्ञानाय विचारोऽधिक्रियत इति–अतःशब्दार्थः" इत्यणुभाष्यम् । "अतःपदघटितसूत्रार्थः", इति तत्प्रदीपश्च ॥ (पृ. ९)

तत्रैवाथपदार्थस्य प्रवृत्ते च निरूपणे ।
'आरभ्यत' इति प्राज्ञैरर्थान्तरमपीष्यते ॥४०॥

तथा हि–" ब्रह्मज्ञानं पुरुषार्थसाधनत्वादिष्टं, तदिच्छापूरणाय विचार आरभ्यत इति ", इत्यणुभाष्यम् । " अथशब्दार्थमाहुः आरभ्यत इती "ति तत्प्रदीपश्च (पृ. ९).

एवमेकाथशब्दस्य चतुरोऽर्थानवादिषुः ।
स्वीकार्यान् वल्लभाचार्याः स्वीये भाष्येऽणुसंज्ञिते ॥४१॥

अधिक्रियत इत्यर्थे किन्तु तेषां महाऽऽग्रहः ।
दृश्यते, खण्ड्यते यस्मात्तस्यानन्तर्यवाचिता ॥४२॥

माङ्गल्ये चाधिकारे चाप्यन्यार्थोपक्रमे तथा ।
आनन्तर्ये तथैवैष ह्यथशब्दः प्रयुज्यते ॥४३॥

अथेतिशब्दश्रवणान्मङ्गलं जायते स्वतः ।
तन्मङ्गलमथान्यार्थैरन्यैः शब्दैश्च जायते ॥४४॥

तस्मान्न केवलायैव मङ्गलायाथ उच्यते ।
नान्यार्थोपक्रमे चैवमन्यार्थासम्भवो यतः ॥४५॥

आनन्तर्यार्थकं केचिदथशब्दं यदूचिरे ।
तत्खण्डनाय तु महान् प्रयत्नोऽकारि वल्लभैः ॥४६॥

आनन्तर्यार्थकत्वे तु अथशब्दस्य सम्मते ।
कर्तव्यशब्दाध्याहारः करणीयो ध्रुवं भवेत् ॥४७॥

किञ्चानन्तरता नित्यं पूर्वं किञ्चिदपेक्षते ।
यदपेक्ष्य परस्मिन् सा तिष्ठेदर्थे ह्यनन्तरे ॥४८॥

ब्रह्मसूत्रात्मकाद् ग्रन्थान्नास्ति किन्तु पुरातनम् ।
तादृशं यदपेक्ष्यैतद् आनन्तर्यमुदीर्यताम् ॥४९॥

किञ्च ब्रह्मविचारेऽस्मिन् नाऽन्याऽऽनन्तर्यमीह्यते ।
येनाथशब्दस्तस्य स्याद् आनन्तर्यस्य वाचकः ॥५०॥

श्रीमद्रामानुजाचार्यैरथशब्दार्थनिर्णये ।
आनन्तर्यार्थकत्वं हि प्रशशंसे पुरातनैः ॥५१॥

जैमिनेर्धर्ममीमांसामधिगत्यैव सूरिणा ।
व्यासस्य ब्रह्ममीमांसा ज्ञेयेति जगदे च तैः ॥५२॥

जगद्गुरुपदे स्थित्वा यैश्च शारीरकं कृतम् ।
तैराद्यैः शङ्कराचार्यैरप्यानन्तर्यमीहितम् (अथशब्दार्थत्वेन) ॥५३

तेषामिह तु सर्वेषामाचार्याणां स्थितं मतम् ।
खण्डयित्वाऽधिकारार्थो वृतो वल्लभसूरिभिः ॥५४॥

जैमिनेर्धर्ममीमांसाविचारापेक्षितं च यद् ।
आनन्तर्यमभिप्रेतं श्रीभाष्ये, खण्डितं च तत् ॥५५॥

धर्मकर्मविचारेभ्यः पूर्वमप्यत्र चिन्तितः ।
दृष्टो ब्रह्मविचारोऽसौ विपर्यासेऽपि सिद्धिदः ॥५६॥

विनाऽपि धर्ममीमांसां कृता ब्रह्मविचारणा ।
फलं यच्छति तस्मान्नो तदानन्तर्यमिष्यते ॥५७॥

पूर्वं तु धर्ममीमांसामधिगत्यैव धीमता ।
कर्तव्या ब्रह्ममीमांसेत्येवं नास्ति च शासनम् ॥५८॥

क्वचित्तु ब्रह्ममीमांसा ज्ञाता सत्येव सूरिषु ।
प्रसूते धर्ममीमांसां प्रति वैराग्यमुत्कटम् ॥५९॥

क्वचिच्च धर्ममीमांसा ज्ञाता सत्यपि सूरिषु ।
न[1] सूते ब्रह्ममीमांसां प्रति रागमनुत्तमम् ॥६०॥

तदेवं सम्भवत्यत्र विपर्ययपरम्परा ।
यया न धर्ममीमांसाऽपेक्ष्यते ब्रह्मचिन्तने ॥६१॥

न पूर्वं पठ्यते धर्मो न ब्रह्मानन्तरं ततः ।
अतोऽपि नवाऽऽनन्तर्यं क्रमो वात्रास्त्यपेक्षितः ॥६२॥

ब्रह्मवाचिन ॐकाराद् 'इपे त्वा' पठ्यते परम् ।
अतो न धर्माऽऽनन्तर्यं ब्रह्मज्ञाने [2]समीह्यते ॥६३॥

शिष्टाचारोऽपि नैवास्ति तादृशो येन तु द्विजः ।
ज्ञात्वैव धर्ममीमांसां ब्रह्मचिन्तां प्रवर्तयेत् ॥६४॥

त्यक्त्वा च धर्ममीमांसां कृते ब्रह्मविचारणे ।
प्रत्यवायश्च कुत्रापि न दृष्टो नापि च श्रुतः ॥६५॥

---

१. "प्रसूते ब्रह्ममीमांसां प्रति वैराग्यमुत्कटम्" इति पाठान्तरम् ।
२. "विवक्ष्यते" इति पाठान्तरम् ।

किञ्च स्वभावतः सिद्धेऽप्यानन्तर्यं तु सम्मते ।
अन्यलभ्यतया नैतद्–अथवाच्यं तु सम्भवेत् ॥६६॥

अनन्यलभ्य एवार्थो वाच्यो भवति शब्दतः ।
अतः कोऽप्यधिकोऽर्थः स्याद्–अथवाच्यो, न तु क्रमः ॥६७॥

तदेवं क्रमपर्यायमानन्तर्यं स्वयंगतम् ।
मत्वा श्रीभाष्यगा तस्य खण्डिताऽस्त्यथवाच्यता ॥६८॥

किञ्चानन्तर्यमेवैतद् यदथार्थोऽभ्यभाष्यत ।
शङ्करैराद्यगुरुभिस्तेऽपि तैरवहेलिताः ॥६९॥

" तितिक्षोपरतिश्रद्धानिग्रहैकाग्रतावतः ।
विवेकादथ वैराग्यान्मुमुक्षुत्वादनन्तरम् " ॥७०॥

तैरूचे, " ब्रह्मजिज्ञासा कर्तव्ये "ति, तदाशयम् ।
चूर्णीकर्तुमचेष्टन्त वल्लभाचार्यसूरयः ॥७१॥

अन्योन्याश्रयनामानं तत्रोद्भाव्य दुरुद्धरम् ।
दोषमेते महाप्राज्ञाः शङ्करे धूलिमक्षिपन् ॥७२॥

ब्रह्मज्ञानेन यत्साध्यं तत्कथं साधनं भवेत् ।
ब्रह्मज्ञानस्य, च ब्रह्म कथं ज्ञायेत तद्विना ॥७३॥

वैराग्योपशमादिभ्यो ब्रह्म जिज्ञास्यते परम् ।
ज्ञाते ब्रह्मणि वैराग्यो–पशमादेश्च सम्भवः ॥७४॥

अतो न वैराग्यादिभ्य आनन्तर्यमपेक्ष्यते ।
अधिकर्तव्यतैवात्र जिज्ञासाया विवक्ष्यते ॥७५॥

किञ्चैते श्रूयमाणस्य जिज्ञासेतिपदस्य च ।
विचारं शाब्दबोधं च पर्यायार्थं चचक्षिरे ॥७६॥

ब्रह्मशब्दः श्रुतीनां च वाचकस्तैः समीहितः ।
श्रौतश्च शाब्दबोधोऽसावधिकार्यो निरूपितः ॥७७॥
श्रौतश्च शाब्दबोधोऽसौ योऽधिकार्यः समीह्यते ।
न तेन ब्रह्मणः कश्चित् साक्षात्कारस्य सम्भवः ॥७८॥
साक्षात्कारे तु ते प्राहुर्मननेनोपबृंहितम् ।
निदिध्यासनमेवात्र कारणं, ब्रह्मणः, परम् ॥७९॥
जिज्ञासेति पदं त्वत्र मननस्य न वाचकम् ।
न निदिध्यासनस्यापि वाचकत्वेन सम्मतम् ॥८०॥
जिज्ञासापदवाच्यस्तु शाब्दबोधो हि केवलम् ।
स चोपशमशून्यस्य चञ्चलस्यापि जायते ॥८१॥
शब्दार्थज्ञानमात्रेण साक्षात्कारस्य सम्भवे ।
मननं च निदिध्यासो जायेयातामनर्थकौ ॥८२॥
दशमस्त्वमसीत्यादौ प्रत्यक्षत्वात्तु वर्ष्मणः ।
शाब्दादेव द्रुतं बोधात् साक्षात्कारः प्रजायते ॥८३॥
न तथा ब्रह्मविषये चिन्तनीयं तु धीमता ।
न कचिच्छाब्दबोधेन साक्षात्कारः प्रमाणितः ॥८४॥
खपुष्पशशशृङ्गादिपदैरर्थस्तु बुध्यते ।
न परं तेन बोधेन कोऽपि साक्षात्करोति तत् ॥८५॥
किञ्च शब्दार्थबोधेन साक्षात्कारेऽपि सम्मते ।
प्रमाणसङ्करापत्तिर्दुर्निवारैव जायते ॥८६॥
या प्रमा जायते जन्तोः प्रत्यक्षात्तु प्रमाणतः ।
न सा शब्दाभिधानाद्धि प्रमाणाज्जायते क्वचित् ॥८७॥

प्रत्यक्षाज्जायमाना तु याऽनुभूतिः प्रमैव सा ।
शब्दादुत्पद्यमाना च सैव बोधोऽभिधीयते ॥८८॥

शाब्दबोधे प्रमायां च तस्मादस्त्यन्तरं महत् ।
तयोः सङ्करतापत्तिरानन्तर्ये तु सम्भवेत् ॥८९॥

एवं शमादिसम्पन्नो युक्तो वैराग्यवानपि ।
श्रौतैः शब्दैः कथं कुर्याद् ब्रह्मप्रत्यक्षदर्शनम् ॥९०॥

किञ्च वेदान्तविज्ञानाद् निश्चितार्थस्य दर्शने ।
सिद्धे, सन्न्यासयोगोऽयं श्रुत्युक्तो व्यर्थतामियात् ॥९१॥

तस्माद् विचक्षणस्यापि न विरक्तस्य योगिनः ।
शब्दार्थज्ञानमात्रेण ब्रह्मसाक्षात्कृतिर्भवेत् ॥९२॥

तस्मान्न वैराग्यादिभ्य आनन्तर्यमपेक्ष्यते ।
तथात्वे त्वितरे दोषाः प्रागुक्ता आपतन्ति हि ॥९३॥

स्वतःसिद्धार्थवाचित्वेऽथशब्दो व्यर्थतामियात् ।
सार्थकत्वाय तेनार्थो वाच्यः कोऽप्यधिको भवेत् ॥९४॥

कर्तव्येतिपदं चैवमध्याहार्यं बलाद् भवेत् ।
अध्याहारेऽपि तेनात्र सिध्येन्नार्थश्च कश्चन ॥९५॥

न स्वार्थमत्र कर्तव्य–पदाध्याहरणं वरम् ।
न परार्थं, यतो ह्यन्ये न तत्र प्रभविष्णवः ॥९६॥

किञ्चालब्धेऽत्र कस्मिँश्चिदानन्तर्यनिरूपके ।
न सिध्येत् पुरुषार्थोऽपि ह्याकाङ्क्षाया अनुद्गमात् ॥९७॥

समाधिनिरतः किञ्च विरक्तः शब्दमात्रतः ।
साक्षात्कुर्वन् परं ब्रह्म न प्रवक्तुं प्रभुर्भवेत् ॥९८॥

उच्छिद्येत ततः शास्त्रं प्रवक्तॄणामभावतः ।
श्रुतिवाक्यैश्च सिद्धेऽर्थे व्यासोक्तं व्यर्थतां व्रजेत् ॥९९॥

अतोऽनेकविधैर्दोषैरानन्तर्याच्तु दूषितात् ।
श्रेयानेवाधिकारार्थ इति श्रीवल्लभा जगुः ॥१००॥

तदेवमथशब्दस्य प्रोच्याधिकृतिवाचिताम् ।
अधिकारिण आकाङ्क्षां शमयामासुरुत्थिताम् ॥१०१॥

न विरक्तं, परं प्रेप्सुं, न चानर्थजिहासिनम् ।
अधिकारिणमाचख्युस्ते हि ब्रह्मविचारणे ॥१०२॥

ते तु त्रैवर्णिकान् सर्वानधिकारिण ऊचिरे ।
सन्ध्यावन्दनवच्चोचुर्नित्यां ब्रह्मविचारणाम् ॥१०३॥

पङ्ग्वन्धगृहिवन्मन्दो मननादेरसम्भवात् ।
अधिगत्यापि शब्दार्थं न ब्रह्मानुभवी भवेत् ॥१०४॥

यस्तु स्यान्मतिमान् युक्तः शान्तो दान्तो विरक्तिमान् ।
स एवोपरतो ब्रह्म स्वयं साक्षात्करिष्यति ॥१०५॥

किन्तु नैतेन शान्त्यादिसम्पत्तिसहितं नरम् ।
अधिकारिणमाख्यातुमुद्युक्ताः सम्भवन्ति ते ॥१०६॥

शमादिगुणभागन्यो भवेत् त्रैवर्णिकादपि ।
सोऽपि स्यादधिकारीति भयाद् बिभ्यति ते बुधाः ॥१०७॥

मुमुक्षोरधिकारित्वे प्रस्तुते तूररीकृते ।
विप्रोऽपि न मुमुक्षुश्चेन्न भवेत् प्रत्यवायवान् ॥१०८॥

तस्मात् त्रैवर्णिकस्यैव नियताऽत्राधिकारिता ।
न मुमुक्षोर्न वाऽन्यस्य शूद्रादेः सूत्रवर्जिनः ॥१०९॥

यस्य वेदेऽधिकारोऽस्ति तस्यैवात्राधिकारिता ।
ब्रह्मचिन्तामकुर्वन् स प्रत्यवायी च जायते ॥११०॥

त्रैवर्णिकश्च तादृक्षो, न शूद्रादिरसंस्कृतः ।
न शिखासूत्रयोस्त्यागी [1]वर्णाचारविवर्जितः ॥१११॥

[2]परस्य प्राप्तये वेद्यं शाब्दं ब्रह्म सनातनम् ।
तच्च श्रुत्यर्थविज्ञानादेव ज्ञायेत, नान्यथा ॥११२॥

तस्माद् यस्तु परप्रेप्सुः सोऽधिकारीति कल्पनाम् ।
कदर्थयित्वा स्वीचक्रुर्द्विजस्यैवाधिकारिताम् ॥११३॥

तदित्थमथशब्देन सम्बद्धं वल्लभोदितम् ।
अनूद्यानुवदाम्यत्र रामानुजसुधीमतम् ॥११४॥

(इत्यथशब्दार्थनिरूपणे श्रीमद्वल्लभाचार्यमतम् ॥)

---

१. " वर्णवेदविवर्जितः " । इति पाठान्तरम् ।

२. (तस्माद् ये धृतकाषायाः कामक्रोधसमन्विताः । परित्यक्तशिखासूत्रा निस्त्रैवर्णिकतां गताः ॥ गङ्गाद्याः सरितस्त्यक्त्वा मलिने सरसीतटे । नारायणमठाद्याख्यप्रासादैश्वर्यभोगिनः ॥ शान्ताश्रमपुरीतीर्थगिर्यादिबहुनामभिः । गोपिकास्वाभिधाना ये जना वेदबहिर्मुखाः ॥ न तेऽधिकारिणः श्रीमद्ब्रह्मसूत्रार्थबोधने । इत्यभीष्टमिवाभाति श्रीमद्वल्लभयोगिनाम् ॥) अयं पाठः पुस्तकान्तरेऽधिकं लभ्यते ।

(अथ-अथशब्दार्थनिरूपणे श्रीमद्रामानुजाचार्यमतम् ॥)

श्रीमद्रामानुजाचार्याः श्रीभाष्ये भूरिविस्तरे ।
आनन्तर्यार्थकं प्राहुरथशब्दं विचक्षणाः ॥११५॥
आनन्तर्यं च यत्किञ्चित् पूर्ववृत्तमपेक्षते ।
यस्मादनन्तरं कार्या जिज्ञासा ब्रह्मणो भवेत् ॥११६॥
तदस्ति कर्मणां ज्ञानं यदनन्तरभाविनी ।
जिज्ञासा ब्रह्मणः प्राज्ञैरथशब्देन शब्द्यते ॥११७॥
साङ्गान् सशिरसो वेदान् अधिगत्य महामतिः ।
स्वल्पमस्थिरमेतेषां बुध्यते कर्मणां फलम् ॥११८॥
ततः स्थिरानन्तफलं प्रेप्सुरेष विचक्षणः ।
मोक्षाभिलाषी यतते ब्रह्म जिज्ञासितुं परम् ॥११९॥
प्रासादतलवास्तव्यो यद्वदूर्ध्वं शनैः शनैः ।
व्रजञ् शिखरमाप्नोति तद्वदत्रापि बुध्यताम् ॥१२०॥
आ शैशवादावसानं शास्त्रं स्वाध्यायकर्मणे ।
प्रवर्तयति नः सर्वान् द्विजातीँस्तु विशेषतः ॥१२१॥
स समाचरितो धन्यः स्वाध्यायश्च स्वभावतः ।
प्रयोजनवतो ह्यर्थानवबोधयति क्रमात् ॥१२२॥
अतः प्रवृत्तः स्वाध्याये पदवाक्यप्रमाणवित् ।
अधीतवेदो वाक्यार्थविचाराय प्रवर्तते ॥१२३॥
प्रवर्तमानः कल्पोक्तकर्मणां दूरशर्मणाम् ।
श्रमसाध्यमथात्यल्पमस्थिरं फलमीक्षते ॥१२४॥

नित्यस्वाध्यायधर्माऽसौ क्रमशो वीक्ष्य कर्मणाम् ।
मीमांसया विनाशित्वं, रहस्यं ज्ञातुमीहते ॥१२५॥

शनकैः स श्रुतीः सर्वास्तथोपनिषदः समाः ।
समीक्षते परानन्दप्रदाः स्थिरफलप्रदाः ॥१२६॥

तदेवममृतानन्दानन्तस्थिरफलप्रदाः ।
श्रुतीः पठित्वा तद्वाक्यनिर्णयाय प्रवर्तते ॥१२७॥

इत्थं स वेदवेदान्त-वाक्यवस्तुविनिर्णये ।
कर्मजालफलज्ञाताऽधिकारी च प्रकल्पते ॥१२८॥

एकानन्तरतारूप-तदथार्थोपलब्धये ।
कर्तृभेदात् स्वतःसिद्धां जहुर्मीमांसयोर्भिदाम् ॥१२९॥

मीमांसा नाम यच्छास्त्रं षोडशाध्यायसम्मितम् ।
तदेकं, तत्र यद् द्वित्वं कल्पितं तत्तु षट्कवत् ॥१३०॥

यथैवाध्यायभेदेन द्वादशत्वमुदीर्यते ।
यथा षडध्यायभिदा षट्कद्वयमितीर्यते ॥१३१॥

तथैव चतुरध्यायी धियैव खलु भिद्यते ।
मीमांसाख्ये तु शास्त्रेऽस्मिन् साऽन्तर्भूता, न भिद्यते ॥१३२

अध्येतव्यास्ततः पूर्वं द्वादशाध्यायलक्षणाः ।
मीमांसायास्त्रयो भागाश्चतुर्थस्तदनन्तरम् ॥१३३॥

अध्यायानां द्वादशानां पूर्वत्वं परिकल्पितम् ।
ततश्चतुर्णामन्येषामुत्तरत्वं च कल्पितम् ॥१३४॥

मीमांसाख्यं ततः शास्त्रमेकं पूर्वोत्तरत्वतः ।
द्विधा प्रसिद्धमिति धीः स्थिरा श्रीभाष्यभाषिणाम् ॥१३

'अथातो धर्ममीमांसे'–त्यतः प्रारभ्यते तु यत् ।
तदन्तं यात'यनावृत्तिः शब्दादि'–त्यत्र शासनम् ॥१३६॥
नैतद्रामानुजाचार्यैः स्वधियैवास्ति कल्पितम् ।
किन्तर्हि ? वृत्तिकारोक्तं तैरिहास्ति समर्थितम् ॥१३७॥
व्यासोक्तं ख्यापितं यत्तु श्रीमज्जैमिनिना पुरा ।
तदभूत्तस्य नाम्नैव ख्यातं द्वादशलक्षणम् ॥१३८॥
यदन्यदवशिष्टं तु चतुरध्यायलक्षणम् ।
तत् स्वयं भगवान् व्यासः ख्यापयामास यत्नतः ॥१३९॥
इत्थमेकेन मीमांसा षोडशाध्यायसम्मिता ।
प्रोक्तापि ख्यापकव्यक्तिभेदाद् द्वैविध्यमध्यगात् ॥१४०॥
वृत्तिकारस्य विन्यस्य मतमेवं मुनीश्वराः ।
कर्मज्ञानानन्तरत्वमथशब्दार्थमूचिरे ॥१४१॥
स्वीकृत्याप्यथशब्दस्य तत्रानन्तर्यवाचिताम् ।
कर्मज्ञानानन्तरत्वं यदङ्गीक्रियते तु तैः ॥१४२॥
तेन साधनसम्पत्तेरनन्तर्यं यदीहितम् ।
शङ्करैराद्यगुरुभिस्तदिदं त्विह खण्ड्यते ॥१४३॥
इत्थमेकाथशब्दस्य वाच्यार्थस्य विनिर्णये ।
मतद्वयमुपन्यस्य न्यस्यते शाङ्करं मतम् ॥१४४॥

(अथ–अथशब्दार्थनिरूपणे श्रीमच्छङ्कराचार्यमतम् ॥)

शङ्करो भगवानाद्य–जगद्गुरुपदे स्थितः ।
श्रुतस्याथपदस्यार्थं प्राहानन्तर्यमत्र हि ॥१४५॥

'कश्चिदत्राधिकारार्थमथशब्दं प्रवक्ष्यति' ।
ध्यात्वेवेत्यधिकारार्थं प्रत्युवाच स शब्दतः ॥१४६॥

(अथ श्रीमद्वल्लभमतनिरसनम्)

कृधातुरधिना युक्तः प्रारम्भस्यास्ति वाचकः ।
प्रारम्भश्चाधिकारश्च तस्मादेकार्थकावुभौ ॥१४७॥
ब्रह्म-तज्ज्ञान-विषया या चेच्छाऽऽरिप्सिता परैः ।
न साऽधिकरणेष्वेषु प्रारब्धा क्वापि दृश्यते ॥१४८॥
व्यासस्तु भगवानत्र कृतेऽध्यायचतुष्टये ।
श्रुतीनामस्फुटार्थानां स्फुटार्थानध्यजीगमत् ॥१४९॥
जिज्ञासापदवाच्या या ज्ञानेच्छा, सा तु न क्वचित् ।
प्रारभ्यमाणा दृष्टास्ति शास्त्रेऽस्मिन् व्यासनिर्मिते ॥१५०॥
तीव्रायामुदितायां तु ज्ञानेच्छायां प्रयत्नतः ।
पुमान् प्रवर्ततेऽध्येतुं ब्रह्मोपनिषदः समाः ॥१५१॥
तत्र च क्वचिदुत्पन्ने सन्देहे मतिमानपि ।
कदाचिन्मोहमासाद्य विरज्येत न संशयः ॥१५२॥
तत्सन्देहनिवृत्त्यर्थं कियतीनामिहोदितः ।
श्रुतीनां विशदस्त्वर्थः स्वाभिप्रेतो महर्षिणा ॥१५३॥
अतो न ब्रह्मजिज्ञासा-पदवाच्याऽत्र कुत्रचित् ।
प्रारब्धा दृश्यते ब्रह्म-ज्ञानेच्छा व्यासनिर्मितौ ॥१५४॥
जिज्ञासां चापि मीमांसां मत्वा त्वेकार्थवाचिनीम् ।
कश्चिदत्राधिकारार्थमथशब्दं ब्रवीति चेत् ॥१५५॥

न तन्न्याय्यमिहाभाति यतो नैकार्थवाचिनौ ।
'जिज्ञासा' चैव 'मीमांसा' शब्दावेतौ विलक्षणौ ॥१५६॥

मीमांसा तु विचारस्य पूजितस्यास्ति वाचिका ।
जिज्ञासा तु स्वतन्त्राया ज्ञानेच्छायाश्च वाचिका ॥१५७॥

संकल्पैश्च विकल्पैश्च तर्कैर्नानाविधैरपि ।
व्यापारैर्मानसैरेको विचारस्तु प्रवर्तते ॥१५८॥

इच्छा त्वस्य विचारस्य जनकानामपि क्रमात् ।
जननी, प्रपितामह्याः पदे तिष्ठति सर्वदा ॥१५९॥

ज्ञानेच्छाया अनुत्पत्तौ न विचारोद्गमः क्वचित् ।
ज्ञानेच्छा तु विचारस्य जनकानां प्रवर्तिनी ॥१६०॥

ज्ञानेच्छावाचकं तस्माद् यज्जिज्ञासापदं श्रुतम् ।
न तद् विचारवाचिन्या मीमांसायाः प्रयोजकम् ॥१६१॥

किञ्च नैवात्र मीमांसा प्रारब्धा दृश्यते क्वचित् ।
प्रारम्भार्थोऽथशब्दोऽयं नैव तेनोपयुज्यते ॥१६२॥

मीमांसायास्त्वथैतस्याः प्रारम्भश्चेद् दिदृक्षितः ।
सर्वोपनिषदामग्र्ये सङ्ग्रहे स च दृश्यताम् ॥१६३॥

न ह्यत्र ब्रह्मसूत्रेषु केवलेषु प्रवर्तते ।
मीमांसायाः स आरम्भो येनेयादथवाच्यताम् ॥१६४॥

तेनाऽप्रस्तूयमाना सा जिज्ञासा व्यासनिर्मितौ ।
नैवाधिकार्या वक्तव्या कदाचिदथशब्दतः ॥१६५॥

कृधातोरधिपूर्वस्य वाच्योऽर्थो नियमः क्वचित् ।
दृष्टो, येनाधिकारश्च नियमश्च समार्थकौ ॥१६६॥

तथात्वे चाथशब्दोऽयं नियमार्थः प्रयुज्यताम् ।
नियम्यतां च जिज्ञासा ब्रह्मणः सूत्रकारिभिः ॥१६७॥

विचारे श्रुतिवाक्यानां स्वतन्त्राः सकला जनाः ।
द्विजाता एकजाता वा म्लेच्छा वा अन्त्यजादयः ॥१६८॥

तदेवमेकजातानां म्लेच्छानां च निवृत्तये ।
नियम्या ब्रह्मजिज्ञासेत्याग्रहः कस्यचिद् भवेत् ॥१६९॥

नियम्यमानायां त्वस्यां जिज्ञासायां द्विजातयः ।
केवलं ब्रह्मचिन्तायां भवेयुरधिकारिणः ॥१७०॥

तदर्थमथशब्दोऽयं सूत्रस्थो नियमार्थकः ।
स्वीकर्तव्य इति ब्रूयुः केचिदाचार्यपुङ्गवाः ॥१७१॥

इति ध्यात्वेव मनसा शब्देनैकेन शङ्करैः ।
खण्डितं नियमार्थत्वमधिकारार्थखण्डनात् ॥१७२॥

तथा हि–" तत्राऽथशब्द आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः ब्रह्मजिज्ञासाया अनधिकार्यत्वात् " (इति शाङ्कर भाष्यम्)

तेन श्रुतोऽथशब्दोऽयं न प्रारम्भस्य वाचकः ।
न चापि नियमस्येति निश्चितं शाङ्करं मतम् ॥१७३॥

मङ्गलार्थस्तु वाक्यार्थे न समन्वेति कुत्रचित् ।
तस्मान्न मङ्गलार्थस्य वाचकोऽयेष सम्भवेत् ॥१७४॥

अर्थान्तरे प्रयुक्तोऽसौ प्रयोजयति मङ्गलम् ।
सत्कवित्वमिवालापैः सम्यग् गीतं सचेतसाम् ॥१७५॥

तस्माद् गवेषणीयं तद्, यदर्थान्तरमञ्जसा ।
पूर्ववृत्तमपेक्ष्येयं जिज्ञासा जायते बुधाम् ॥१७६॥

(अथ श्रीमद्रामानुजमतनिरसनोपक्रमः)

स्वाध्यायात् कर्मबोधाच्च यत्त्वानन्तर्यमीह्यते ।
प्रागेव गुरुभिस्तत्तु प्रत्युक्तं दूरदर्शिभिः ॥१७७॥
स्वाध्यायाद् वेदवेदाङ्गव्युत्पत्तिर्जायते ध्रुवम् ।
कारणं च भवत्येष धर्मज्ञाने विशेषतः ॥१७८॥
धर्मकर्मावबोधाच्च यद्यनन्तरता भवेत् ।
स्वतःसिद्धा, तदा, व्यर्थो ह्यथशब्दोऽत्र सूत्रगः ॥१७९॥
'अथातो धर्ममीमांसे'–त्यत्रत्यादथशब्दतः ।
स्वाध्यायानन्तरत्वं तु स्वतःसिध्यत्यबाधितम् ॥१८०॥
तदनन्तरतायां च तत्रत्यादथशब्दतः ।
ज्ञातायां किं न सूत्रस्थोऽथशब्दो व्यर्थतामियात् ॥१८१॥
यथा न ह्यथशब्दोऽयं प्रत्यध्यायं प्रयुज्यते ।
तथा नैव प्रयोक्तव्यो भवेदत्रापि निष्फलः ॥१८२॥
किञ्च न ज्ञायतेऽद्यापि स्वाधीतेश्चरमोऽवधिः ।
यदनन्तरमारभ्या जिज्ञासा ब्रह्मणो भवेत् ॥१८३॥
प्रारब्धायामपि त्वस्यां जिज्ञासायां समीहितः ।
स्वाध्यायो नान्तमभ्येति येन कारणतां व्रजेत् ॥१८४॥
किञ्च स्वाध्यायशब्दस्य वाच्येऽर्थे प्राङ् निरूपिते ।
तदनन्तरता ब्रह्म–जिज्ञासामाश्रिता भवेत् ॥१८५॥

शब्दब्रह्मैकदेशस्य चिन्तनं चेदुदीर्यते ।
स्वाध्यायेन ततस्तत्तु तिष्ठेदाब्रह्मदर्शनात् ॥१८६॥

तस्मान्नापेक्षते ब्रह्म–जिज्ञासा तु विशेषतः ।
स्वस्मात् प्राग्भाविनं हेतुं स्वाध्यायं स्वप्रयोजकम् ॥१८७॥

केचित् कर्मावबोधस्य प्राग्भावित्वमुशन्ति हि ।
प्राहुश्च ब्रह्मजिज्ञासां तदनन्तरभाविनीम् ॥१८८॥

अत्र पक्षे च भूयांसो मतभेदाश्चकासति ।
उपन्यस्यामि तानत्र विनोदाय विपश्चिताम् ॥१८९॥

ब्रह्मचर्य – तपः – श्रद्धा – यज्ञादीनिह केचन ।
श्रेयोघातकदोषाणां [1]घातित्वेन प्रयुञ्जते ॥१९०॥

निबर्हणेन दोषाणां श्रेयसः परिपन्थिनाम् ।
कर्मावबोधः प्राग्वृत्तो जिज्ञासायाः प्रयोजकः ॥१९१॥

कश्चिच्च मनुते ' यज्ञैः संस्कारैश्चैव संस्कृते ।
[2]सेवमाने चिरं ब्रह्म, प्रत्यङ्ङात्मा प्रसीदति ॥१९२॥

ऋणत्रयापाकरणादपरस्त्विह कर्मभिः ।
मोक्षे मनोनिवेशार्थं मनुते मानवं क्षमम् ॥१९३॥

फलान्तरे प्रयुक्तानां कर्मणामपरे बुधाः ।
ब्रह्मभावोपकारित्वं ब्रुवते च फलान्तरम् ॥१९४॥

यथा हि खादिरो यूपः क्रत्वर्थः सन्नपि स्वयम् ।
वीर्यवृद्ध्या पुमर्थोऽपि वीर्यकामस्य जायते ॥१९५॥

---

१. " घातित्वेनोपयुञ्जते " इति पाठान्तरम् । २. पुंसीति शेषः ।

तथैव सर्वकर्माणि भिन्नभिन्नफलान्यपि ।
ब्रह्मचिन्तोपकारित्वात्तदङ्गानीति तन्मतम् ॥१९६॥

अपरिज्ञातरूपाणि किञ्चैतानि सुधीमताम् ।
सुदुश्चराणि कर्माणि; किं पुनः क्षुद्रचेतसाम् ॥१९७॥

तस्मात्तत्कर्मजालस्य रूपमादौ विचिन्त्यताम् ।
पश्चाच्च ब्रह्मजिज्ञासा क्रियतां मोक्षदा सदा ॥१९८॥

न चापि धर्ममीमांसापरिशीलनमन्तरा ।
कर्मजालस्वरूपस्य सोऽवबोधः प्रजायते ॥१९९॥

तस्मात् प्रागवबुद्धेषु श्रौतस्मार्तेषु कर्मसु ।
धर्ममीमांसया, पश्चाद् विधेयं ब्रह्म-चिन्तनम् ॥२००॥

पूर्वपक्षमिमं केचित् सिद्धान्तीकृत्य भूसुराः ।
रामानुजादयो मिथ्या शङ्करं प्रत्यवादिषुः ॥२०१॥

अमीषां, शब्दजालेन मूढधीमृगघातिनाम् ।
प्रागेव खण्डिता युक्तिर्विगीता विमता सताम् ॥२०२॥

यथा च स्वादवेत्ताऽपि नाऽभुञ्जानः प्रसीदति ।
न तथा सिद्धिमाप्नोति बोद्धाऽप्यकृतसत्कृतिः ॥२०३॥

ज्ञातमार्गोऽपि नाऽगच्छन् गन्तव्यं लभते यथा ।
फलं कर्मावबोद्धाऽपि नाऽकुर्वँल्लभते तथा ॥२०४॥

तेन कर्मावबोधस्य जिज्ञासायां न हेतुता ।
तदनन्तरभावश्च जिज्ञासाया न सिध्यति ॥२०५॥

कर्मावबोधात् परतः कर्मानुष्ठानसम्भवः ।
कर्मानुष्ठानतः पश्चात् पाप्मनां विनिवर्तनम् ॥२०६॥

विनिवृत्तेषु पापेषु धियो निर्मलता भवेत् ।
तया च वर्धते शक्तिः प्रत्यक्षे सोपपत्तिके ॥२०७॥

धिया निर्मलया विद्वाँस्ततः प्रत्यक्षमीक्षते ।
अनित्याशुचिदुःखैक – रूपं संसारमस्थिरम् ॥२०८॥

तादृशाज्जायते पश्चादुपरामो विरक्तता ।
वैराग्याच्च ततस्तस्य त्यागेहा जायते सतः ॥२०९॥

जिहासुश्च ततस्तस्य हानोपायानवेक्षते ।
आत्मनोऽवेक्षमाणश्च महिमानं शृणोति सः ॥२१०॥

श्रुतात्मज्ञानमहिमा ततस्तं ज्ञातुमिच्छति ।
ज्ञानेच्छा वाऽथ जिज्ञासा तदेवं जायते सतः ॥२११॥

एवं ब्रह्मात्मजिज्ञासा वैराग्यादीन्यपेक्षते ।
कारणानि, न दूरस्थं कर्मज्ञानं विशेषतः ॥२१२॥

श्रीमद्रामानुजाचार्या वन्दनीया न संशयः ।
तथाऽपि [1]नात्र रोचन्ते तेषां वचनयुक्तयः ॥२१३॥

ते हि तत्रभवन्तोऽत्र जिज्ञासायां तु कारणम् ।
पूर्ववृत्तमपेक्षन्ते मीमांसां धर्मकर्मणोः ॥२१४॥

एकदा ते प्रशंसन्ति कर्मानुष्ठानमादरात् ।
अन्यदा च स्तुवन्त्येते मीमांसामेव केवलाम् ॥२१५॥

---

१. " तथापि नो न रोचन्ते " इति पाठान्तरम् ।

(अथ कर्मज्ञानस्तुतिः ॥)

मीमांसाश्रवणेनैव कर्मज्ञानं प्रजायते ।
कर्मज्ञानाच्च जायन्ते वैराग्योपशमादयः ॥२१६॥

सविवेकाच्च वैराग्याज्जिज्ञासा ब्रह्मणो यतः ।
मीमांसां तेन ते प्राहुर्जिज्ञासायाः पुरातनीम् ॥२१७॥

(अथ कर्मानुष्ठानस्तुतिः ।)

अपरत्र पुनस्ते हि धर्ममेव स्वनुष्ठितम् ।
विना फलाभिसन्धानमभिनन्दन्ति कारणम् ॥२१८॥

विना फलाभिसन्धानात् साध्वनुष्ठितकर्मणा ।
ज्ञानावरणभूतं तत् पापं पूर्वं निरस्यते ॥२१९॥

पापं च तद् यदज्ञानमावृणोत्यात्मदर्शनम् ।
आत्मज्ञानविरोधित्वात् [1]पापं कर्माऽप्युदीर्यते ॥२२०॥

रजसस्तमसो वापि प्राधान्ये मनसि स्थिते ।
अज्ञानं जायते जन्तोर्यज् ज्ञानावरणं भवेत् ॥२२१॥

सत्त्वस्याथ समुद्भूते प्राधान्ये तु शनैः शनैः ।
ज्ञानावरणभूतं तद्—अज्ञानं शिथिलं भवेत् ॥२२२॥

एवमेकत्र ते स्तुत्वा कर्मानुष्ठानमन्यतः ।
केवलं कर्मणां ज्ञानं प्रशंसन्ति विपश्चितः ॥२२३॥

---

१. "पापं धर्मोऽप्युदीर्यते" इति पाठान्तरम् ।

(अथ कर्मानुष्ठानपक्षखण्डनम् ।)

यथोक्तं कर्म कुर्वाणा अपि मूढा भवन्ति हि ।
न ते विदन्ति विज्ञेयं रहस्यं कर्मणां मनाक् ॥२२४॥

राजसीं तामसीं चैतामहमित्युग्रभावनाम् ।
पुरस्कृत्यैव कुरुते कर्माणि फललोलुपः ॥२२५॥

तान्यहंकारपूर्वाणि कर्माणि सुकृतान्यपि ।
कथंकारमहंकारं निहनिष्यन्ति घातिनम् ॥२२६॥

प्रचुरद्रव्यसम्पत्ति – साध्यस्यास्य तु कर्मणः ।
मूलमेकोऽस्त्यहंकारः कामक्रोधपितामहः ॥२२७॥

श्रीमद्भगवती गीता रजोगुणसमुद्भवम् ।
कामं क्रोधं च निन्दन्ती कुतो न स्मर्यते बुधैः ॥२२८॥

दक्षात् प्रजापतेरन्यः को वा स्यादुत्तमः सुधीः ।
यः पटिष्ठो वरिष्ठश्च श्रौतस्मार्तेषु कर्मसु ॥२२९॥

तस्याप्यादर्शभूतस्य कर्मठस्य प्रजापतेः ।
कामक्रोधोद्भवं ध्वंसं पुराणानि प्रचक्षते ॥२३०॥

अननुष्ठितकर्माऽपि भगवान् भूतभावनः ।
लेभे पूजामगाधीशतनुजापूजितः पदे ॥२३१॥

किमासादि फलं सौर – वंशजैः सगरात्मजैः ।
अश्वमेधेन येनान्ते भस्मसात्तैरभूयत ॥२३२॥

बलिर्यज्ञविधानेन सुरलोकजिगीषया ।
रसातलमगादन्ते वञ्चितो वामनर्षिणा ॥२३३॥

तस्मान्न क्षयमायाति पाप्मा कश्चन कर्मभिः ।
वर्धते स त्वनुष्ठानादाज्यादिव हुताशनः ॥२३४॥

किञ्चादौ विविधैरन्यैरुचितानुचिताध्वभिः ।
सञ्चयादर्थसम्पत्तेः कर्मानुष्ठानसम्भवः ॥२३५॥

तदेवमतुलद्रव्यसङ्ग्रहेच्छामलीमसे ।
पापपङ्के निजाङ्गानि मज्जनीयानि सूरिणा ॥२३६॥

भगवान् मनुरध्याये चतुर्थे तु विशेषतः ।
अस्तवील्लोकजयिनम् – अश्वस्तनिकमेव हि ॥२३७॥

वर्तते यः शिलोञ्छाभ्यां प्रत्यहं नियतेन्द्रियः ।
स कथं यष्टुमीशीत यज्ञान् विपुलदक्षिणान् ॥२३८॥

तस्मान्नापेक्ष्यते किञ्चित् कर्मानुष्ठानमत्र हि ।
यस्मादनन्तरं ब्रह्मजिज्ञासा स्यादपेक्षिता ॥२३९॥

(अत्र पूर्वः पक्षः)

तथात्वे नन्वयं लोकस्त्यक्त्वा कर्माणि दूरतः ।
बाल्यादेव प्रवर्तेत ब्रह्म जिज्ञासितुं परम् ॥२४०॥

न कोऽपि नवसस्येष्टिं चातुर्मासाँस्तथाऽध्वरान् ।
आचरेन्न यजेच्चापि सोमेन पशुना तथा ॥२४१॥

श्रूयन्ते च ततो यानि नैगमागमकर्मणाम् ।
विधायकानि वाक्यानि तानि यास्यन्त्यपार्थताम् ॥२४२॥

(अत्रोत्तरः पक्षः ।)

इति चेन्न तथा वाच्यं, नैवापार्थानि सन्ति भोः ।
श्रुति–स्मृत्युक्तकल्पेषु यानि प्रोक्तान्यशेषतः ॥२४३॥

" कामात् क्रोधाच्च लोभाच्च योऽर्थः सम्पादितो भवेत् ।
सतां वेदविदामर्थे स सर्वोऽपि प्रयुज्यताम् " ॥२४४॥

इत्यभिप्रायगर्भाणि विधिवाक्यानि तानि भोः ।
पङ्कप्रक्षालनाच्छ्रेयस्तदस्पर्शनमीडते ॥२४५॥

पूतिगन्धेस्तु पङ्कस्य सञ्जाते स्पर्शनेऽप्रिये ।
प्रक्षालनमकामेनाऽप्यनुष्ठेयं मुमुक्षुणा ॥२४६॥

किञ्च येषां विधानाय श्रुतयः प्रेरयन्ति नः ।
[1]यज्ञयागादयस्तेषां कर्मणां सन्ति वाचकाः ॥२४७॥

शब्देष्वेतेषु यो धातुर्यजतिः श्रूयते सदा ।
स दाने देवपूजायां सङ्गतौ च प्रयुज्यते ॥२४८॥

एतेन यत्र साधूनां सङ्गमो दानशोभितः ।
देवस्वरूपचिन्तायै स यागः सद्भिरीर्यते ॥२४९॥

स चानेकविधः प्रोक्तः शास्त्रेषु परमर्षिभिः ।
आर्षो दैवस्तथा भौतो नारः पैत्रस्तथैव च ॥२५०॥

बहिर्यागानमूनन्ये न बुधा बहु मन्वते ।
अन्तर्यागान् प्रशंसन्ति ते हि यज्ञार्थपारगाः ॥२५१॥

---

१. शब्दा इति शेषः ।

अन्तर्यागेषु वाग्यज्ञः प्राणयज्ञस्तथैव च ।
विधीयते महाप्राज्ञैर्यज्ञः कोऽप्यैन्द्रियस्तथा[1] ॥२५२॥

ज्ञानयज्ञस्तु यः प्रोक्तः सोऽतिशेतेऽखिलानपि ।
यतो हि श्रुतयो यज्ञाञ् ज्ञानजन्यानवादिषुः ॥२५३॥

तथा हि–"श्रेयान् द्रव्यमयाद् यज्ञाज् ज्ञानयज्ञः परंतप"। (गी. ४ अ. ३३ श्लो.) " ज्ञानयज्ञेन चाप्यन्ये. "–(९, १५).

तस्माद् यज्ञविधानात्तु जिज्ञासा ब्रह्मणः परम् ।
स्तूयते यत्र, तत्रादौ यज्ञरूपं निरूप्यताम् ॥२५४॥

निरूपिते यज्ञरूपे ज्ञास्यते स्वयमेव यद् ।
" मीमांसां ब्रह्मजिज्ञासा न मनागप्यपेक्षते " ॥२५५॥

ऋक्षेष्ट्याग्रयणादीनां विधानं भगवान् मनुः ।
स्तुवन्नपि विशेषेण न तत्राऽऽग्रहवानभूत् ॥२५६॥

तथा हि–" ऋक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत् । तुरायणं च क्रमशो दाक्षस्यायनमेव च " ॥ (म. स्मृ. ६, १०)

' इष्ट्वा च शक्तितो यज्ञैः ", इत्यस्मिन् वचने प्रभुः ।
"शक्तितः "–पदमुच्चार्य सम्मेने शाङ्करं मतम् ॥२५७॥

तथा हि–" अधीत्य विधिवद् वेदान् पुत्राँश्चोत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् " ॥
(म. स्मृ. ६, ३६.)

---

१. " श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति " इत्यादि (गीतायाम् ४ अ. २६, २७, २८ श्लो.)

यत्रोपनिषदां सेवां कर्तुं मनुरुपादिशत् ।
मीमांसायास्तु चर्चाऽपि क्वचित्तत्र न लभ्यते ॥२५८॥

तथा हि—"एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् । विविधाश्चो
पनिषदीरात्मसंसिद्धये श्रुतीः" ॥ (म. स्मृ. ६, २९.॥

सर्वत्र ब्रह्मजिज्ञासा-सिद्धये गीयते स्मृतौ ।
शमादिसम्पदामेव नितरामुपकारिता ॥२५९॥

यमान् सनियमान् सर्वान् प्राणायामान् सधारणान् ।
प्रत्याहाराँश्च जिज्ञासा-सिद्धये प्रास्तवीन्मनुः ॥२६०॥

भगवानपि योगस्य प्राचार्यः स पतञ्जलिः ।
यमादीन्येव जिज्ञासासाधनान्यादिशन्मुनिः ॥२६१॥

वेदव्यासस्तु भगवानन्तर्यागमनेकधा ।
गीतायां ब्रह्मविद्यायां प्रशशंस पुरातनः ॥२६२॥

एतेन यत्र कुत्रापि यागानुष्ठानमुच्यते ।
प्रायशस्तत्र सर्वत्र ह्यन्तर्यागो विधीयते ॥२६३॥

अर्थसाध्या बहिर्यागा निरस्यन्त्यर्थजान् मलान् ।
सतां समागमस्यैते सम्भवन्ति च कारणम् ॥२६४॥

तस्मान्न व्यर्थतां यान्ति विधयः केऽप्युदीरिताः ।
श्रौताः स्मार्तास्तथा सौत्राः पौराणास्तान्त्रिकास्तथा ॥२६५॥

किन्तु नैतेन ते ब्रह्म-जिज्ञासाया विशेषतः ।
कारणीभवितुं योग्या अन्यथासिद्धतां गताः ॥२६६॥

वस्तुतस्तु निरुक्तानां समेषामेव कर्मणाम् ।
सार्थकत्वं प्रपश्यामि ब्रह्मज्ञानोदयात् परम् ॥२६७॥

साक्षात्कृतपरब्रह्ममहिमानो महर्षयः ।
समाधावेव सूक्तानि ऋचो मन्त्रान् बभाषिरे ॥२६८॥

समाधौ भाषितानां च ऋचामर्थोपपत्तये ।
समाधिरेव योक्तव्यो धारणाध्यानसंगतः ॥२६९॥

समाधिनैव मन्त्राणामर्थमालोच्य योगिनः ।
ब्राह्मणानि निरुच्याऽन्ते कल्पानेतानकल्पयन् ॥२७०॥

तस्मात् समाधिसम्पन्नो यः परे ब्रह्मणि स्थितः ।
स एव सारमासाद्य मन्त्राणां सम्प्रसीदति ॥२७१॥

ननु भो ब्रह्मनिष्ठोऽयं कर्मबन्धाद् विनिःसृतः ।
कथं पुनः कर्म कुर्याद् ब्रह्मसाक्षात्कृतेः परम् ॥२७२॥

इति चेत् स्मरणीयं तद् ऐशोपनिषदं वचः ।
"कुर्वन्नेवेह कर्माणि शतं (ज्ञानी) जिजीविषेद्" इति ॥२७३॥

ब्रह्मसाक्षात्कृतेः पश्चात् पठन्नपि च चिन्तयन् ।
कुर्वन्नपि च कर्माणि कर्मभिर्न स बध्यते ॥२७४॥

को बन्धः कश्च मोक्षोऽस्ति किं पुण्यं किञ्च पातकम् ।
तत् सर्वं ब्रह्मविद् विद्यान्नापरः कर्मठो जडः ॥२७५॥

शमादिसाधनोपेताद् योगादेव विशेषतः ।
जिज्ञासा ब्रह्मणस्तीव्रां दृढतां प्रतिपद्यते ॥२७६॥

ब्रह्मजिज्ञासया ब्रह्म ज्ञायते चानुभूयते ।
तस्मिञ्ज्ञातेऽनुभूते च पुमान् भवति निर्मलः ॥२७७॥

निर्मले नास्त्यहंकारो नाऽऽवेशो न रसोऽरसः ।
विषयेषु समानेन भावेनाऽसौ प्रवर्तते ॥२७८॥

गीताया ब्रह्मसूत्राणां किञ्च योऽसौ प्रणायकः ।
सोऽपि सर्वत्र गीतायां योगमेवाधिकं जगौ ॥२७९॥

किञ्च जैमिनिना प्रोक्तां मीमांसां दूरतस्त्यजन् ।
व्यासः स भगवान् व्याख्याद् योगं पातञ्जलं पुरा ॥२८०॥

तदेव द्योतयत्यस्मान् यन्न व्यासो महामुनिः ।
मीमांसां ब्रह्मविद्यायां साधनत्वाय मन्यते ॥२८१॥

अतो हि ब्रह्मविद्याया ज्ञानेच्छायां न कारणम् ।
कर्मज्ञानं, न वा किञ्चित् कर्मानुष्ठानमिष्यते ॥२८२॥

इष्यते यत्तु तत्प्रोक्तं शङ्करेण कृपालुना ।
साधनानां समासेन नवकं योगसम्मतम् ॥२८३॥

शमो दमस्तितिक्षा च श्रद्धोपरतिसंयुता ।
समाधानं विवेकश्च विरागश्च मुमुक्षुता ॥२८४॥

श्रीमद्भिर्वल्लभाचार्यैर्यश्चान्योन्याश्रयाभिधः ।
दोषः समुदभाव्यत्र सोऽपि सम्मृज्यतेऽञ्जसा ॥२८५॥

पञ्चक्लेशविशेषाणां प्रक्षयोपायमद्भुतम् ।
परावरज्ञो भगवान् योगमार्गमुपादिशत् ॥२८६॥

यमाः सनियमाः किञ्च प्राणायामाः सहासनैः ।
प्रत्याहारः समाधिश्च धारणाध्यानपूर्वकः ॥२८७॥

तत्र मार्गे विशेषेण प्रस्तुताः सन्ति च स्तुताः ।
तानिमानष्ट योगस्य प्राहुरङ्गानि योगिनः ॥२८८॥

योगाङ्गानामनुष्ठानाद् ध्रुवं प्रक्षीयते मलः ।
मलक्षयादनायासात् सत्त्वशुद्धिः प्रजायते ॥२८९॥

सत्त्वशुद्धेः परं योगी पुरुषं निर्गुणं परम् ।
प्रधानात् परमाव्यक्ताद् भावाद् भिन्नं समीक्षते ॥२९०॥

तदष्टविधयोगाङ्गसङ्ग्रहे च फणीश्वरः ।
जिज्ञासायाः शमादीनि साधनानि न्यवीविशत् ॥२९१॥

ब्रह्मचर्येण तपसा शौचेनापि च निग्रहम् ।
बाह्यानां चक्षुरादीनामिन्द्रियाणामुपादिशत् ॥२९२॥

स्वाध्यायाच्चैव संतोषादीश्वरप्रणिधानतः ।
श्रद्धा तितिक्षोपरतिः समाधानं च जायते ॥२९३॥

स्वाध्यायस्याङ्गभूताच्च तर्कात् प्रवचनादपि ।
सुधीरा जायते प्रज्ञा विवेकप्रवणा सती ॥२९४॥

दैहिकाद्दैविकाच्चापि क्लेशादाध्यात्मिकादपि ।
क्लिष्टस्य तार्किकस्यैवं मुमुक्षाऽपि प्रजायते ॥२९५॥

सुधीरस्य प्रशान्तस्य तार्किकस्य विवेकिनः ।
दृष्टानुश्रविके तृष्णा न चिरायावतिष्ठते ॥२९६॥

यमानां नियमानां च तदेवं परिषेवणात् ।
दृढासनैश्च चरितैः प्राणायामैस्ततः परम् ॥२९७॥

सतर्कगुरुशुश्रूषा – शास्त्रप्रवचनादिभिः ।
स्वाध्यायैश्च समभ्यस्तैर्जायन्ते ते शमादयः ॥२९८॥

शमादय उपायास्ते नोपक्षन्ते कदाचन ।
परिनिष्ठितरूपां तां ब्रह्मसाक्षात्कृतिं पराम् ॥२९९॥

तस्माद्, "वेदान्तवाक्यानां विचारव्यतिरेकतः ।
जायते नैव वैराग्य-विवेकादी"ति, येऽवदन् ॥३००॥

तेऽत्रान्योन्याश्रयाख्यस्य दोषस्योद्भावका बुधाः ।
निरस्यन्तेऽवधूयन्ते स्वयं दूषितदृष्टयः ॥३०१॥

विना विवेकवैराग्यनिग्रहादिभिरस्थिराः ।
कर्तुं वेदान्तवाक्यानां विचारमपि नेशते ॥३०२॥

गणनेऽध्ययने वार्ता-कथा-कीर्तनकर्मसु ।
सर्वत्र समपेक्ष्यन्ते क्षणिका अपि ते गुणाः ॥३०३॥

क्षणिका अपि ते सर्वे वैराग्योपशमादयः ।
ब्रह्मसाक्षात्कृतेः पश्चाज्जायन्ते बलवत्तमाः ॥३०४॥

विरागो जातमात्राणां विषयेषु प्रदृश्यते ।
विवेको न परं तत्र समुद्भिन्नः प्रतीयते ॥३०५॥

यथा यथा विवेकं तु शैशवादधिगच्छति ।
तथा तथा विरागोऽपि चेतनस्य प्रलीयते ॥३०६॥

विषयाणां विवेकेन रागस्तेषूपजायते ।
रागाच्च विलयं याति विरागः शैशवे स्थितः ॥३०७॥

विरागविलयाद् यूनः कामो लिप्सा च जायते ।
सिद्धे कामे मदो मोहो लोभः पुंसां प्रजायते ॥३०८॥

असिद्धायां तु लिप्सायां क्रोधद्रोहौ जिघांसया ।
सममेवोपजायेते बहुभिः क्लेशकारणैः ॥३०९॥

कामक्रोधादिजनितैः क्लेशैः क्लिष्टस्य धीमतः ।
मुमुक्षा क्लेशविषयात् स्वभावादेव जायते ॥३१०॥

सा क्लेशजनिता जन्तोर्मुमुक्षा रागमूर्च्छितम् ।
विरागं च विवेकं च पुनरुज्जीवयत्यरम् ॥३११॥

मुमुक्षया विरागेण विवेकस्तु पुरस्कृतः ।
गुरुशास्त्रोपदेशानां शुश्रूषां कुरुते स्थिराम् ॥३१२॥

शमं दमं तितिक्षां च श्रद्धोपरतिसंयुताम् ।
समाधानं च संसूते स विवेको जिहासतः ॥३१३॥

शमादिसाधनोपेतः स मुमुक्षाङ्गजो महान् ।
विवेको ब्रह्मजिज्ञासां जनयत्यमितादरात् ॥३१४॥

जिज्ञासायां विवेकेन ज्ञायते ब्रह्म शब्दतः ।
मननाच्च निदिध्यासात् तच्च साक्षात् स्वयं भवेत् ॥३१५॥

तस्मात्तच्छास्त्रभाषायाः परिज्ञानेन सङ्गतम् ।
योगाङ्गानामनुष्ठानमत्र पूर्वमपेक्ष्यते ॥३१६॥

(अथ नव्यमतेऽथशब्दार्थनिरूपणम्)

वेदान्तानां विचारोऽपि योगज्ञानमपेक्षते ।
योगज्ञानं च साङ्ख्यानां तत्त्वज्ञानमपेक्षते ॥३१७॥

सांख्यादिदर्शनज्ञानाद् योगज्ञानं प्रसीदति ।
योगज्ञाने प्रसन्ने च ब्रह्मज्ञानं न दुर्गमम् ॥३१८॥

तस्माद् यो ब्रह्मजिज्ञासुस्तेन साङ्ख्यादिसम्मतम् ।
सम्पाद्य सुस्थिरं ज्ञानं ज्ञेयो योगः पतञ्जलेः ॥३१९॥

वेदव्यासोऽपि भगवान् पूर्वं योगानुशासनम् ।
प्रमाण्यैव प्रवर्तते ब्रह्मसूत्रप्रणीतये ॥३२०॥

तस्माद् यस्त्वथशब्दोऽयं प्रथमो ब्रह्मसूत्रगः ।
स योगदर्शनज्ञानान्तरत्वस्य वाचकः ॥३२१॥

तद्योगदर्शनज्ञानसम्पादननिदर्शकान् ।
शमादीन् ब्रह्मविद्यायाः कारणान्याह शङ्करः ॥३२२॥

धर्मकर्मार्थमीमांसाज्ञानात् प्रागपि बुद्धिमान् ।
वेदान्तानां विचारेण ब्रह्म ज्ञातुं प्रकल्पते ॥३२३॥

नैवाश्रमक्रमः कश्चिद् ब्रह्मज्ञाने समीह्यते ।
ब्रह्मचर्यादपि प्राहुः प्रव्रज्यां श्रुतयो यतः ॥३२४॥

यत्रापि यज्ञानुष्ठानाद् ऋते मोक्षो विगीयते ।
तत्र भङ्ग्या शमोपेतो योग एव प्रशस्यते ॥३२५॥

न शेषः कर्ममीमांसा न शेषि ब्रह्मचिन्तनम् ।
उभयोरेककर्तृत्वं यतो नैव प्रमाणितम् ॥३२६॥

यज्ञेष्वधिकृतस्यैव ब्रह्मजिज्ञासने विधौ ।
अधिकारः क्वचिद् वेदे न दृष्टो नापि च श्रुतः ॥३२७॥

धर्मस्य कारणं भिन्नं ब्रह्मज्ञानस्य कारणात् ।
ब्रह्मज्ञानफलं भिन्नं धर्मजाभ्युदयात् फलात् ॥३२८॥

(धर्मकारणफलनिरूपणम् ।)

शाखानां च प्रशाखानां वैदिकीनां सहस्रधा ।
विभक्तानां पुरा कार्यः स्वाध्यायोऽर्थपुरस्कृतः ॥३२९॥

ततस्तत्र तथाऽन्यत्र कल्पसूत्रेषु भूरिषु ।
निरुक्तानि च कर्माणि विवेक्तव्यानि यत्नतः ॥३३०॥

विवेकाय पुनस्तेषां कर्मणां गूढशर्मणाम् ।
मीमांसा जैमिनिप्रोक्ता ह्यध्येतव्याऽधिकादरात् ॥३३१॥

मीमांसायामधीतायां ज्ञाते तत्त्वेऽपि कर्मणाम् ।
न जनः क्षेममाप्नोति यावत्तन्नानुतिष्ठति ॥३३२॥

अनक्षरपदभ्रंशं मात्राक्षतिविवर्जितम् ।
स्वनुष्ठितं च तत्कर्म प्रसूतेऽभ्युदयं फलम् ॥३३३॥

महताऽपि प्रयत्नेन साधितं धर्मकर्मणोः ।
न हि ज्ञानं फलं सूते यावन्नानुष्ठितं भवेत् ॥३३४॥

मीमांसाधिगमात्तस्माद् धर्मज्ञानं यदुत्थितम् ।
तत् कर्मणामनुष्ठानाद् एव सार्थकतां व्रजेत् ॥३३५॥

(ब्रह्मज्ञानकारणफलनिरूपणम्)

ब्रह्मज्ञानस्य तु प्रायः साधनानि फलानि च ।
नितरामेव भिद्यन्ते धर्मसाधनसङ्ग्रहात् ॥३३६॥

ब्रह्मज्ञानं तु जिज्ञासां सर्वतः प्रागपेक्षते ।
व्यक्त्यधीना च सा भाति जिज्ञासा ब्रह्मणः परा ॥३३७॥

न यागानामनुष्ठानं न वा वर्णविशिष्टताम् ।
कारणत्वेन सा किञ्चिद् लेशतोऽपि समीहते ॥३३८॥

मुमुक्षया विवेकेन स्वयमाविर्भवत्यसौ ।
ब्रह्मज्ञानात्मकं चेयं प्रसूते फलमुत्तमम् ॥३३९॥

मननाच्च निदिध्यासाद् ब्रह्मणः परमात्मनः ।
फलं निःश्रेयसं नाम स्वयमासादितं भवेत् ॥३४०॥

मीमांसयाऽथ सम्पन्ने धर्मज्ञानेऽपि दुर्गमे ।
न धर्मो जायते, यस्मात् स व्यापारमपेक्षते ॥३४१॥

धर्मज्ञोऽपि जनो यावन्न कर्माण्यनुतिष्ठति ।
न तावज्जायते धर्मो यतो जन्यः (भव्यः) स उच्यते ॥३४२॥

जिज्ञासया तु सम्पन्ने ब्रह्मज्ञाने, प्रकाशते ।
स्वयमेव परं ब्रह्म भास्वानिव हृदम्बरे ॥३४३॥

यथाऽऽवरणविभ्रंशात् सन्नेवेनः प्रकाशते ।
तथैवाज्ञानविध्वंसाद् ब्रह्म सत्यं प्रकाशते ॥३४४॥

यथा न भव्यो जन्यो वा भास्वानावृतिसंक्षयात् ।
ब्रह्मापि न तथा जन्यं भव्यं वाऽज्ञानसंक्षयात् ॥३४५॥

स्वयंभूतः स्वयंसिद्धः स्वयंजातो यथा रविः ।
तथा स्वयंभु संसिद्धं सत्यं ब्रह्म सनातनम् ॥३४६॥

मीमांसाज्ञानसम्पन्नैः कर्मभिर्यस्तु भावितः ।
जन्यो भव्यश्च धर्मोऽसौ न तथाऽस्ति सनातनः ॥३४७॥

तदेवं क्षणिको धर्मो जन्यो भोगप्रदायकः ।
नित्यं ब्रह्म न जन्यं वा न भाव्यं मोक्षदायकम् ॥३४८॥

तस्मान्नैवास्त्यभिप्रेतः क्रमः कोऽपि निरीहयोः ।
अन्योन्यं धर्ममीमांसा-ब्रह्मजिज्ञासयोः क्वचित् ॥३४९॥

धर्मज्ञानस्य सम्बन्धो ब्रह्मज्ञानेन कश्चन ।
'नैवास्ती'त्यवबोधाय द्वैविध्यं राजते श्रुतौ ॥३५०॥

या श्रुतिः प्रेरयत्यस्मान् विधये धर्मकर्मणाम् ।
तत्र प्रयोज्यता भाति द्वयोर्वै कर्तृकर्मणोः ॥३५१॥

'स्वर्गकामो यजेते'ति श्रुतिरत्र निदर्शनम् ।
यत्र प्रवर्त्यते कर्ता कर्म चापि पृथक् पृथक् ॥३५२॥

स्वर्गकामः प्रयोज्योऽस्ति तत्र कर्ता सुखैषणः ।
प्रयोज्यं कर्म सोमादि, श्रुतिश्चास्ति प्रयोजिका ॥३५३॥

यया तु ज्ञायते ब्रह्म न हि तत्रावलोक्यते ।
प्रयोज्यः कोऽपि कर्ता वा प्रयोज्यं कर्म वा पृथक् ॥३५४॥

'अयमात्मा परं ब्रह्म'-श्रुतिरत्र निदर्शनम् ।
यत्र कर्ताऽथवा कर्म प्रयोज्यं नास्ति किञ्चन ॥३५५॥

इत्थं प्रमाणभूतानां श्रुतीनामपि भेदतः ।
धर्मज्ञानेन सम्बन्धो ब्रह्मज्ञानस्य वार्यते ॥३५६॥

(निष्कर्षः)

अतो यस्त्वथशब्दोऽयमानन्तर्यस्य वाचकः ।
न स ज्ञानं विधानं वा धर्मस्येषत् समीहते ॥३५७॥

यस्यानन्तर्यमत्रास्ति ब्रह्मजिज्ञासयेहितम् ।
नवकं तत्समासेन प्रागेवास्त्यनुकीर्तितम् ॥३५८॥

तदित्थमथशब्दस्य वाच्यार्थं शङ्करोदितम् ।
अनूद्याभिमतार्थो मे पुनरप्यनुगद्यते ॥३५९॥

यतो हि भगवानाद्यो वेदव्यासो महामुनिः ।
पातञ्जलं योगशास्त्रं व्याचख्यौ परमादरात् ॥३६०॥

ततश्च रचयामास ब्रह्मसूत्राण्यमून्यसौ ।
अतो हि तस्यानन्तर्यमथशब्देन सोऽभ्यधात् ॥३६१॥

अज्ञात्वा सांख्यसिद्धान्तमज्ञात्वा योगदर्शनम् ।
अज्ञात्वा चेतराण्यत्र दर्शनान्यमलात्मनाम् ॥३६२॥

श्रुतिषुस्तूयमानं तत् परं ब्रह्म सनातनम् ।
नाऽवगन्तुं न वा मन्तुं न वा ध्यातुं प्रभूयते ॥३६३॥

तस्मादादौ परिज्ञेयं सांख्यानां मतमुत्तमम् ।
तदन्वितस्ततो योगो योगभाष्यं तथैव च ॥३६४॥

पश्चादुपनिषत्सूक्तः सद्ब्रह्मादिपदोदितः ।
पदार्थो ब्रह्मसूत्राणां साहाय्येनावबुध्यताम् ॥३६५॥

साहाय्याद् ब्रह्मसूत्राणां सद्ब्रह्मादिपदोदितम् ।
श्रौतं ब्रह्म परिज्ञाय कृतकृत्यो भवेद् बुधः ॥३६६॥

स सांख्ययोगयुक्तात्मा समाधिस्थः शनैः शनैः ।
मननाच्च निदिध्यासाद् ब्रह्म साक्षात्करोत्यपि ॥३६७॥

जाते समाधिभङ्गे तु स श्रौतब्रह्मरूपवित् ।
मन्त्रोक्तानामृगुक्तानां पदार्थानां विनिर्णये ॥३६८॥

प्रयतेत; यतो मूलं श्रुतीनां विविधात्मनाम् ।
तथोपनिषदामासामृचो मन्त्राश्च केवलम् ॥३६९॥

मन्त्राणां च ऋगादीनां गूढार्थस्य प्रकाशने ।
[1]प्रवृत्तान्येव भासन्ते ब्राह्मणारण्यकानि नः ॥३७०॥

ब्राह्मणारण्यकोक्तानां पदार्थानां प्रतीतये ।
प्रवृत्तानीव चाभान्ति कल्पसूत्राण्यनेकधा ॥३७१॥

कल्पसूत्रेषु चैतेषु ब्राह्मणेषु च योदियात् ।
शङ्का, तां वारयत्येषा मीमांसा जैमिनेर्मता ॥३७२॥

तदित्थं ब्रह्मसूत्राणां साहाय्येन तु बुद्धिमान् ।
ज्ञात्वोपनिषदुक्तार्थं मन्त्रार्थज्ञो भवेद् द्रुतम् ॥३७३॥

मन्त्रार्थज्ञानवेलायां ब्राह्मणारण्यकाश्रयम् ।
लभमानश्च मीमांसामाश्रयेदादरादसौ ॥३७४॥

मन्त्रार्थज्ञश्च विज्ञाय ब्रह्मणो रूपमद्भुतम् ।
भावाभावस्वरूपेण, विज्ञानाय प्रकल्पते ॥३७५॥

सगुणस्यातिसूक्ष्मस्य ज्ञात्वा भावात्मनः प्रभोः ।
स्वरूपं स समग्रस्य जगतस्तनुते शिवम् ॥३७६॥

तस्माद् भौतिकभावानां विज्ञानं चेद् बुभुत्सितम् ।
मन्त्रार्थज्ञानसाहाय्यकारि ब्रह्मैव बुध्यताम् ॥३७७॥

सांख्ययोगादिशास्त्राणां परिज्ञानादनन्तरम् ।
जिज्ञासयैव तद् ब्रह्म परिज्ञातुं च शक्यते ॥३७८॥

---

१. "प्रवृत्तानीव," इति पाठान्तरम् ।

तस्माद् यो ब्रह्मसूत्रादावथशब्दः समीरितः ।
स योगदर्शनज्ञानानन्तरत्वस्य वाचकः ॥३७९॥

इत्यथार्थमनेकोक्तमुपसंहृत्य सादरम् ।
द्वितीयो मुनिभिः प्रोक्तो ह्यतःशब्दो विविच्यते ॥३८०॥

॥ इत्यथपदार्थनिरूपणम् ॥

॥ अथातःपदार्थनिरूपणम् ॥

(तत्र श्रीमच्छङ्करवल्लभाः)

अतःशब्दस्य वाच्यार्थनिर्णये तु महाप्रभुः ।
वल्लभो नातिचक्राम शङ्कराचार्यसम्मतिम् ॥३८१॥

हेत्वर्थको ह्यतःशब्दो बभाषे गुरुणाऽमुना ।
तदर्थकत्वमेवास्य स्वीचक्रे वल्लभैरपि ॥३८२॥

"यथैव क्षीयते लोकः कर्मभिश्च चितो जितः ।
तथैव क्षीयते लोकः परः पुण्यैश्चितो जितः" ॥३८३॥

इत्यर्थकं समुद्धृत्य वचनं वैदिकं गुरुः ।
अनित्यफलतां व्याख्यद्–अग्निहोत्रादिकर्मणाम् ॥३८४॥

"ब्रह्मवित् परमाप्नोती"–त्युक्त्वा चोवाच साधनम् ।
परस्य पुरुषार्थस्य ब्रह्मज्ञानं परात्परम् ॥३८५॥

यतो हि कर्मभिर्लभ्यं फलं द्रागेव नश्यति ।
ब्रह्मज्ञानफलं चेदं न कदाचिद् विनश्यति ॥३८६॥

तस्मादनित्यफलकं त्यक्त्वा कर्म शुभाशुभम् ।
कर्तव्या ब्रह्मजिज्ञासा या हि साध्या शमादिभिः ॥३८७॥

इत्यर्थव्यञ्जनार्थोऽयमतःशब्दः समीहितः ।
यथा श्रीशङ्कराचार्यैस्तथा श्रीवल्लभैरपि ॥३८८॥

"कर्मादिभ्यो ज्ञानमेव पुरुषार्थस्य साधनम् ।
इत्यतस्तस्य ज्ञानाय विचारः (अधि) क्रियते," इति ॥३८९॥

'अतःशब्दार्थः,' इत्युक्तं वल्लभैरणुसंज्ञके ।
स्वीये भाष्ये, न चाधिक्यं किञ्चिदत्र विलोक्यते ॥३९०॥

अनधीत्यापि मीमांसां ब्रह्मज्ञाने द्विजोत्तमः ।
भवत्येवाधिकारीति ध्वन्यते च तदाशयः ॥३९१॥

(अत्र श्रीमद्रामानुजाचार्याः)

रामानुजाचार्यवराः किञ्चिदत्र विलक्षणम् ।
ध्वनयन्ति निजे भाष्ये यदतःशब्दसंगतम् ॥३९२॥

साङ्गान् सशिरसो यावन्न वेदानधिगच्छति ।
अल्पास्थिरफलत्वं तन्न तावद् वेत्ति कर्मणाम् ॥३९३॥

साङ्गान् सशिरसो वेदान् अधीत्यैव द्विजोत्तमः ।
अल्पास्थिरफलत्वं तत् कर्मणामधिगच्छति ॥३९४॥

तदनन्तरमेवास्य ज्ञातसारस्य कर्मणाम् ।
[1]स्थिरानन्तफलब्रह्मज्ञानेच्छायां रतिर्भवेत् ॥३९५॥

---

१. 'भूर्यनन्तफलब्रह्मज्ञानेच्छायाम्" इति पाठान्तरम् ।

तस्मादादावधीत्यैव साङ्गान् सशिरसस्तथा ।
सर्वान् वेदाँस्ततः कार्या जिज्ञासा ब्रह्मणो बुधैः ॥३९६॥

एवं रामानुजाचार्यैः श्रीमद्भिः स्थिरबुद्धिभिः ।
वृत्तस्य हेतुभावेऽसावतःशब्दो निरूपितः ॥३९७॥

(अथातःशब्दार्थे स्वमतम् ॥)

वस्तुतस्त्वथशब्देन यदाऽऽनन्तर्यमुच्यते ।
न तदाऽयमतःशब्दो वक्तव्यो हेतुवाचकः ॥३९८॥

व्यवहारे हि दृश्यन्ते परपश्चादनन्तराः ।
एकार्थका, यथा चैत्रात् परः पश्चाच्च माधवः ॥३९९॥

अनन्तरं माधवश्च चैत्रादित्यपि चोच्यते ।
येनाऽव्याहतमेतेषां दिक्शब्दत्वं प्रतीयते ॥४००॥

दिक्शब्दयोगे पञ्चम्याः [1]शास्त्रमस्ति प्रवर्तकम् ।
अनन्तरार्थकश्चाथशब्दो दिक्शब्द एव सः ॥४०१॥

तस्मात्तद्योगमापन्नाद् 'एतस्माद्' इत्यतः पदात् ।
परः प्रवृत्तोऽस्ति तसिल् [2]पञ्चम्यास्तसिलित्यतः ॥४०२॥

अयमेवाथशब्दस्य गमकः प्रत्ययस्तसिल् ।
आनन्तर्यार्थवाचित्वे, श्रूयते यस्त्वतःपदे ॥४०३॥

एतच्छब्देन कोऽप्यर्थो बुद्धिस्थः परिगृह्यते ।
तसिलाऽत्रधिसामान्यमुच्यते द्योत्यतेऽथवा ॥४०४॥

---

१. "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" इति (२।३।२९)
२. (५।३।७).

ततोऽथशब्देनैतेनोत्तरकालिकसम्भवः ।
भाष्यते, यस्य सम्बन्धो ब्रह्मजिज्ञासया सह ॥४०५॥

'एतत्पदार्थावधिकोत्तरकालप्रवर्त्तिनी ।
तेनेयं ब्रह्मजिज्ञासे'–त्यर्थः सूत्रस्य रोचते ॥४०६॥

कोऽयं बुद्धिस्थितश्चार्थो ब्रह्मसूत्रकृतः प्रभोः
यस्यार्थे सर्वनामैतद्–एतदस्ति प्रयोजितम् ॥४०७॥

इति चेदुच्यते श्रीमन् विनयाद्, अवधार्यताम् ।
अस्ति पातञ्जले योगे भाष्यं तत् सूत्रकृत्कृतम् ॥४०८॥

समाप्य भाष्यं भगवान् वेदव्यासो महामुनिः ।
पातञ्जलस्य योगस्य, ब्रह्मसूत्राणि निर्ममे ॥४०९॥

समीपतरवर्तित्वादेतदेव मुनीश्वरः ।
बुद्धौ कृत्वा तदर्थं च–एतच्छब्दं प्रयुक्तवान् ॥४१०॥

द्रष्टृदृश्यप्रभेदेन द्वैतं योगे प्रतिष्ठितम् ।
तद्द्वैतमण्डनायैव व्यासः सूत्राण्यसूत्रयत् ॥४११॥

'[1]एतेन योगः प्रत्युक्तः,' इति सूत्रेण स स्वयम् ।
योगस्य पूर्वभावित्वं व्यञ्जयामास बादरिः ॥४१२॥

योगदर्शनभाष्यस्य यः कर्ता विश्रुतः क्षितौ ।
स एव ब्रह्मसूत्राणां कर्ता व्यासो न संशयः ॥४१३॥

योगदर्शनभाष्यस्य कर्ताऽन्यो बादरायणात् ।
प्रणेतुर्ब्रह्मसूत्राणामिति पक्षस्तु न स्थिरः ॥४१४॥

---

१. (ब्र २।१।३)

वादाद् वादा जनिष्यन्ते ह्यन्तं यास्यति जीवितम् ।
तथापि स्थिरतां नैव पक्ष एष प्रयास्यति ॥४१५॥

व्यासव्यक्तिद्वयस्यात्र स्वीकारे तूभयोः पृथक् ।
देशकालादि निर्देश्यं निर्देष्टव्यं ध्रुवं भवेत् ॥४१६॥

कदाचिदुभयोर्भेदः स्वीक्रियेतापि तुष्टये ।
तथाप्यतःपदस्थेन योग [1]एवैतदोच्यते ॥४१७॥

योगस्यैवास्ति सम्बन्धो ब्रह्मज्ञानेन सुस्थिरः ।
न परिज्ञायते ब्रह्म योगसाधनमन्तरा[2] ॥४१८॥

तस्मात् पूर्वावधीकृत्य योगभाष्यार्थचिन्तनम् ।
तदुत्तरक्षणैः कार्या जिज्ञासा ब्रह्मणो बुधैः ॥४१९॥

अनूद्यैवमतःशब्दे विचारान् भाष्यकृत्कृतान् ।
स्वमतं च, ततो ब्रह्मजिज्ञासार्थो वितन्यते ॥४२०॥

॥ इति – अतः पदार्थनिर्वचनम् ॥

॥ अथ ब्रह्मजिज्ञासापदार्थनिरूपणम् ॥

अत्र ब्रह्मपदार्थः प्राग् जिज्ञासार्थस्ततः परम् ।
ततस्तयोश्च सम्बन्धो निर्णेतव्यतया स्थितः ॥४२१॥

(अत्र श्रीमद्वल्लभाचार्याः)

तत्र श्रीवल्लभाचार्या ब्रह्मेत्येतत्पदेन तु ।
वाच्यान् संग्राहयामासुर्वेदान्तानथवा श्रुतीः ॥४२२॥

---

१. एतदा=एतच्छब्देनेत्यर्थः ।

२. तथा हि– ' योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति " गीता ॥

तथा हि–" वेदान्तानां विचार आरम्भणीयो न वेति "। " हरिः स्वयं व्यासो विचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति ब्रह्मजिज्ञासा कर्तव्येति "। " इदं च वेदान्तविचार-व्यतिरेकेण न भवतीति "। " निर्धारिते तु वेदान्ते विचारो व्यर्थ एव "। " नहि वेदविचारस्य वेदाधि-कार्यतिरिक्तः शक्यते कल्पयितुम् "॥ (इत्यणुभाष्यम्)

न हि ते श्रुतिसंवेद्यं गीयमानं पुरातनैः ।
तत्त्वं ब्रह्मपदस्यात्र वाच्यमर्थमवादिषुः ॥४२३॥

जिज्ञासेतिपदस्यार्थो ज्ञातुमिच्छेति यः स्फुटः ।
सोऽपि तेषामभिप्रेतो नैव भाति मनागपि ॥४२४॥

जिज्ञासेति पदस्यात्र विचारार्थत्वमेव ते ।
स्थले स्थले स्फुटैः शब्दैरनेकैः प्रत्यपीपदन् ॥४२५॥

तथा हि–" न च ज्ञातुमिच्छा जिज्ञासा नाधिकर्तुं शक्येति वाच्यं, जिज्ञासापदस्य विचारार्थत्वात् "। " तदिच्छापूरणाय विचार आरभ्यते "। " तज्ज्ञानाय विचारोऽधिक्रियत इति "। " विचारस्यापि यथा ज्ञानोपयोगित्वं तथा वक्ष्यते "। (इत्यणुभा.)

किञ्च ब्रह्मण इत्यत्र या षष्ठी कर्मणि श्रुता ।
तामुशन्ति स्म सम्बन्धसामान्यस्यैव वाचिनीम् ॥४२६॥

तथा हि–" शेषषष्ठी=विशेषरहितं सामान्यं शेष इति सम्बन्ध-सामान्ये षष्ठीति फलितमित्यर्थः "। (इति श्रीमदिच्छा-रामभट्टकृतः प्रदीपः ।)

ततश्च ब्रह्मशब्दोऽयं समासघटको यथा ।
सर्ववेदान्तवाक्यानां वाचको वल्लभैर्मतः ॥४२७॥

तथैवाऽयं विरोधस्य तन्निराकरणस्य च ।
संग्राहको, न तेनासौ जगत्कारणवाचकः ॥४२८॥

जगत्कारणरूपोऽर्थो न विचार्यः कदाचन ।
स्वरूपसत्तयैवैष निःसन्दिग्धः सुनिश्चितः ॥४२९॥

तथा हि—" ब्रह्मभावे (ब्रह्मस्वरूपसत्तायां) संदेहाभावात् । सन्दिग्धस्यैव जिज्ञास्यता (निश्चयार्थं विचार्यता) " ॥

यस्तु सन्दिग्धतां यायान्निश्चेतव्यश्च यो भवेत् ।
स एव बहुधा लोके पदार्थः सुविचार्यते ॥४३०॥

स्वरूपसत्तया सिद्धे पदार्थे च ततः कथम् ।
ज्ञानशक्तिः क्रियाशक्तिः सन्देहास्पदतां व्रजेत् ॥४३१॥

असन्दिग्धस्वरूपेऽस्मिन् न शक्त्योरपि संशयः ।
तस्मान्नैव विचार्यं तज्जगत्कारणमव्ययम् ॥४३२॥

यद् विचार्यं, विचारश्च यस्य प्रस्तूयतेऽत्र भोः ।
तद् ब्रह्मपदवाच्यं तु श्रुतिवाक्यं न चेतरत् ॥४३३॥

ततश्च "श्रुतिवाक्येषु ये विरोधाः परस्परम्[1] ।
तन्निराकरणार्थाश्च ये प्रयत्नाः पुरस्कृताः ॥४३४॥

तेषामिह तु सर्वेषां विचारः श्रुतिसङ्गतः ।
प्रारभ्यते वा क्रियते," इति श्रीवल्लभाऽऽशयः ॥४३५॥

---

१. " समुत्थिताः " इति शेषः ।

(अत्र श्रीमद्रामानुजाचार्यमतम् ॥)

श्रीमद्रामानुजाचार्याः सौत्रब्रह्मपदेन तु ।
श्रुतिवाक्यान्यनादृत्य जगत्कारणमूचिरे ॥४३६॥

निरस्ता निखिला दोषा यस्मान्नित्यं स्वभावतः ।
यत्राऽनवधिकाः किञ्च विलसन्त्युत्तमा गुणाः ॥४३७॥

असंख्याऽनन्तकल्याणगुणैकनिलयो महान् ।
स एव ब्रह्मणा चात्र तैरूचे परमेश्वरः ॥४३८॥

बृहत्त्वगुणयोगेन ब्रह्मशब्दाभिधेयता ।
स्वरूपेण गुणैश्चान्यैस्तस्मिन्नेव विराजते ॥४३९॥

स एव ब्रह्मशब्दस्य मुख्योऽर्थः परमेश्वरः ।
सर्वेश्वरः स भगवान् परमः पुरुषोत्तमः ॥४४०॥

तस्मादन्यत्र यद्यपि गुणलेशानुबन्धतः ।
प्रयुक्तो ब्रह्मशब्दः स्यादौपचारिक एव सः ॥४४१॥

तापत्रयातुरैर्यश्च जिज्ञास्यः परमेश्वरः ।
स एव कर्मभूतोऽर्थो जिज्ञासायां न चेतरः ॥४४२॥

ज्ञातुमिच्छा हि जिज्ञासा, ज्ञानमत्र तथेष्यते ।
ज्ञानस्य विषयश्चासौ ब्रह्मवाच्योऽखिलेश्वरः ॥४४३॥

"कार्या च ब्रह्मविषयज्ञानेच्छे"-ति विवक्षिते ।
"ब्रह्म ज्ञातव्यमित्युक्तं भवती"-ति च तेऽब्रुवन् ॥४४४॥

जिज्ञासेति कृदन्तस्य योगे वै '[1]कर्तृकर्मणोः ।
कृती '–ति पाणिनीयेन षष्ठी चात्र प्रवर्तते ॥४४५॥

यत्तु श्रीवल्लभाचार्यैः शेषे षष्ठीरिता मुधा ।
गर्हयन्ति स्म तं पक्षं श्रीमदाचार्यपुङ्गवाः ॥४४६॥

शेषे षष्ठीं प्रयुञ्ज्यादौ पश्चाज्जिज्ञासया सह ।
सामर्थ्यविरहान्नैव समासस्यास्ति सम्भवः ॥४४७॥

आक्षेपेण च कर्मत्व–ग्रहणादभिधानतः ।
कर्मणो ग्रहणं न्याय्यमिति ते प्रत्यपादयन् ॥४४८॥

किञ्च ब्रह्मपदेनात्र यो वाच्यः पुरुषोत्तमः ।
तस्य स्वरूपबोधाय तैः प्रयेतेतरामिह ॥४४९॥

(ब्रह्मणो निर्विशेषत्वखण्डनम्)

यन्निर्विशेषचिन्मात्रं कैश्चिद् ब्रह्म निरूपितम् ।
तदेतैरप्रमेयत्वात् खण्डितं वचनासिभिः ॥४५०॥

प्रमाणानि तु सर्वाणि सविशेषं विशेषतः ।
वस्तुजातं प्रमिण्वन्ति नाऽविशेषं कदाचन ॥४५१॥

निर्विशेषस्य कुत्रापि वस्तुनो नैव सम्भवः ।
शब्देनापि न कुत्रापि निर्विशेषं निरूप्यते ॥४५२॥

प्रकृतिप्रत्ययाभ्यां हि पदमेकं प्रवर्तते ।
प्रत्ययार्थात् प्रकृत्यर्थो भिन्नश्चाभ्युपगम्यते ॥४५३॥

---

१. (पा. सू. २ । ३ । ६५)

ऋते तयोश्च संसर्ग–विशेषात्तत्पदं क्वचित् ।
निर्विशेषं कमप्यर्थं नाऽभिधातुं क्षमं भवेत् ॥४५४॥

घटादीनां विशेषाणां यत्तु व्यावर्तनान्मतम् ।
अपारमार्थ्यं विबुधैस्तच्च तैरिह खण्ड्यते ॥४५५॥

सतश्च परमार्थत्वं सिद्धं यत्त्वनुवर्तनात् ।
तत्स्वतः सिद्धमेवेति न हि साध्यतयेष्यते ॥४५६॥

सद्विशेषोऽस्ति विषयोऽनुभूतिर्विषयिण्यतः ।
नैतयोरेकतामेते स्वीकुर्वन्ति विपश्चितः ॥४५७॥

अनुभूतिस्तथा ज्ञानं संविच्चावगतिस्तथा ।
सर्वेऽप्यमी समानार्था ज्ञातुर्धर्माः सकर्मकाः ॥४५८॥

"अनुभूतिरिति स्वाश्रयं प्रति स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण्यापादनस्वभावो ज्ञानावगतिसंविदाद्यपरनामा सकर्मकोऽनुभवितुरात्मनो धर्मविशेषः" (इति श्रीभाष्यम्) ॥

ज्ञाताऽनुभविता नित्यः संवेद्यात्मा, न संशयः ।
संविज्ज्ञानाऽनुभूत्यादिः किन्त्वनित्या क्रिया हि सा ॥४५९॥

"नित्यं चेत्संवेदनं स्वतःसिद्धं, नित्यमित्येव प्रतीयेत, न च तथा प्रतीयते;" "इह तु सकलविषयविरहिणी निराश्रया च संविन्निषिध्यते" (इति श्रीभाष्यम्) ॥

सा क्रिया नियतं किञ्चिज् ज्ञेयं संवेद्यमेव वा ।
कर्मान्तरमपेक्ष्यैव ज्ञातुः कर्तुः प्रवर्तते ॥४६०॥

तस्मादहंपदार्थो यो ज्ञाता वेदी च वर्तते ।
निरस्ताखिलदुःखोऽसावनन्तानन्दभाक् स्वराट् ॥४६१॥

स एवाऽऽत्मा परं ब्रह्म ब्रह्मशब्देन गीयते ।
प्रथमे ब्रह्मसूत्रेऽस्मिन् ज्ञानाज् ज्ञेयाच्च यः परः ॥४६२॥

इत्येवमेकदा ज्ञानाज् ज्ञातुः संसाध्य भिन्नताम् ।
उभयोरथ नित्यत्वाद् – अभेदमपि तेऽब्रुवन् ॥४६३॥

ज्ञाता स एव भगवान् यो हि ज्ञानगुणाश्रयः ।
नित्यत्वाच्चास्य तज् ज्ञानं नित्यमित्यब्रुवन् बुधाः ॥४६४॥

" ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वम् । ज्ञानं चास्य नित्यस्य स्वाविकधर्मत्वेन नित्यम् " (इति श्रीभाष्यम्) ॥

ज्ञाने च ज्ञातृतायां च भेदमुद्रास्य ते ततः ।
उभयोरेकतां प्राहुः शनकैः शङ्करोदिताम् ॥४६५॥

पश्चात्त एव धीमन्तः स्वीये भाष्ये स्थले स्थले ।
ज्ञानस्वरूपमात्मानम् – अब्रुवन् – अविशङ्किताः ॥४६६॥

" न तावता निर्विशेषज्ञानमात्रमेव तत्त्वम् । ज्ञातुरेव ज्ञानस्वरूपत्वात् । ज्ञानस्वरूपस्यैव तस्य ज्ञानाश्रयत्वं मणिद्युमणिप्रदीपादिवद् युक्तमेवेत्युक्तम् " । " अस्य ज्ञानस्वरूपस्यैव ज्ञातृत्वम् " (इति श्रीभाष्यम्) ॥

ज्ञानैकाकार एवात्मा निष्कर्मा स च निष्क्रियः ।
शोकमोहादिभिर्नैव प्राकृतैर्लिप्यते गुणैः ॥४६७॥

"आत्मातु सर्वत्र ज्ञानैकाकारतया देवादिभेदप्रत्यनीकस्वरूपः" (इति श्रीभाष्यम्) ॥

नैवोपचीयते देवो न कदाप्यपचीयते ।
सदैकरूपस्तेनासौ ज्ञानाकारो महेश्वरः ॥४६८॥

इत्येवमेकतामुक्त्वा ज्ञाने ज्ञातरि चात्मनि ।
देह-देहीश्वरेत्युक्ताद् भेदादैहन्त ते त्रिताम् ॥४६९॥

तथा हि—"अतः शास्त्रेषु न निर्विशेषवस्तुप्रतिपादनमस्ति, नाप्यर्थजातस्य भ्रान्तत्वप्रतिपादनम्, नापि चिदचिदीश्वराणां स्वरूपभेदनिषेधः" (इति श्रीभाष्यम्) ॥

त्रयाणामपि वस्तूनां परीक्षा तु स्थलान्तरे ।
विधास्यतेऽत्र तु पुनः प्रकृतार्थोऽनुगम्यते ॥४७०॥

प्रकृतोऽर्थश्च विज्ञेयो ब्रह्मशब्दः समासगः ।
यत्राऽऽद्यैः शङ्कराचार्यैरुक्तं किञ्चिदनूद्यते ॥४७१॥

(अथ शाङ्करं मतम् ।)

तत्त्वे तपसि वेदे च विधौ विप्रे प्रजापतौ ।
प्रयुज्यते पवित्रोऽयं ब्रह्मशब्दः पुरातनः ॥४७२॥

कतमस्मिन्नसावर्थे प्रयुक्तः प्रस्तुते तु सः ।
इति शङ्कां समाधत्ते द्वितीयेन मुनीश्वरः ॥४७३॥

'जन्माद्यस्य यतः'–सूत्रं द्वितीयमिह दृश्यते ।
यस्मिन् ब्रह्मपदार्थोऽसौ लक्षणैरस्ति लक्षितः ॥४७४॥

कश्चास्ति तत्रेति च चेद् भवतोऽस्ति कुतूहलम् ।
श्रूयतां शङ्कराचार्यमतमन्यैः स्फुटीकृतम् ॥४७५॥

तत्र श्रीभामतीकारैर्द्विधा ब्रह्म निरूपितम् ।
अनुपाधिकमेकं तद्, अविद्योपाधिकं परम् ॥४७६॥

महाकाशाद् घटाकाशो यथा लोके विभिद्यते ।
तथैवोपाधियोगेन ब्रह्मरूपं विभिद्यते ॥४७७॥

अविद्योपाधिनाऽस्पृष्टमयुक्तं मुक्तमेव यत् ।
तदेव निर्गुणं रूपं शुद्धं बुद्धं सनातनम् ॥४७८॥

अविद्योपाधिना युक्तं यत्तु रूपं निरूप्यते ।
सगुणं तच्च सर्वज्ञं सर्वशक्तिसमन्वितम् ॥४७९॥

यत्तु तत्त्वमसीत्यत्र [1]तत्पदेनाऽभिधीयते ।
उपाधिरहितं नित्यं रूपं तन्निर्गुणं परम् ॥४८०॥

यच्च तत्र महावाक्ये त्वंपदेनास्ति लक्षितम् ।
तदविद्योपाधियुक्तं सगुणं सर्वशक्तिकम् ॥४८१॥

सामानाधिकरण्याच्च तत्त्वमोः पदयोस्तयोः ।
अभेदादुभयोरैक्यं साध्यते लक्षितार्थयोः ॥४८२॥

द्विविधं वा द्विरूपं वा तदेव ब्रह्म शाश्वतम् ।
विवृणोति द्विधाभूतैः शङ्करस्तैर्विशेषणैः ॥४८३॥

---

१. "तत्पदेनास्ति लक्षितम्", इति पाठान्तरम् ।

नित्यं शुद्धं च बुद्धं च यच्च मुक्तं सनातनम् ।
तदेतत्तु परं रूपं सर्वोपाधिविवर्जितम् ॥४८४॥

सर्वज्ञं यच्च सम्प्रोक्तं सर्वशक्तिसमन्वितम् ।
तदेतदपरं रूपम् – अवच्छिन्नमुपाधिना ॥४८५॥

निरुपाधिकरूपस्य सत्त्वे स्थूलः प्रमापकः ।
अत्रोपात्तः स्वयं ज्ञेयो ब्रह्मशब्दः सुविश्रुतः ॥४८६॥

बृंहतेर्वृद्धिरूपार्थान्मनिन्नेव प्रवर्तते ।
व्युत्पाद्यते ततश्चायं ब्रह्मशब्दो बहुश्रुतः ॥४८७॥

यश्चातिवृद्धिमानर्थो महिम्ना यो न मीयते ।
स एव ब्रह्मशब्दार्थो निरुपाधिः सनातनः ॥४८८॥

सोपाधिकस्य रूपस्य सत्त्वे यस्तु प्रमापकः ।
अयमात्माऽहमस्मी 'ति प्रसिद्धः प्रत्ययो हि सः ॥४८९॥

अविद्योपाधिना योगान्निरुपाधिः सनातनः ।
अहंप्रत्ययवानेष जीव इत्यभिधीयते ॥४९०॥

(उपाधिविरहे जीव – व्यवहारो विनश्यति ।
तस्मान्नित्या न ते जीवा न तेषां च पुनर्भवः ॥४९१॥)

इत्येवं शङ्कराचार्यमतव्याख्यानकोविदाः ।
ब्रह्मशब्दस्य लक्ष्यार्थमवोचन् भाष्यसङ्गतम् ॥४९२॥

न तेन विप्रवेदादेर्वाच्यार्थस्यात्र वाचकम् ।
शङ्कराचार्यचरणा ब्रह्मशब्दमवादिषुः ॥४९३॥

(अथ जिज्ञासापदार्थनिरूपणम्)

तादृशं ब्रह्मणो रूपं ज्ञातुमिच्छा बलीयसी ।
जिज्ञासा, सा च कर्तव्या विरक्तेन विवेकिना ॥४९४॥

उत्पन्नायामथैतस्यां जिज्ञासायां स्वभावतः ।
जिज्ञासुः श्रुतिसन्दोहं स्वयमेवादरिष्यते ॥४९५॥

समुत्पन्ने तु सन्देहे दर्शनान्तरवत् सुधीः ।
साहाय्यं ब्रह्मसूत्राणां स्वयमेवाश्रयिष्यते ॥४९६॥

तस्मादिहत्यं जिज्ञासा-पदं नैवास्ति वाचकम् ।
मीमांसाया न च श्रीमन् विचारस्य च वाचकम् ॥४९७॥

स्वया ह्यभिधया शक्त्या ज्ञानेच्छामेव केवलाम् ।
जिज्ञासेतिपदं ब्रूते ब्रह्मणा यत् समस्यते ॥४९८॥

प्राञ्चः केचिदिहाचार्याः, 'ब्रह्मणे'-पदमादिमम् ।
समासिसँश्चतुर्थ्यन्तं कृत्वा; जिज्ञासया सह ॥४९९॥

तं चतुर्थीसमासं तु ज्ञात्वा शास्त्रविसङ्गतम् ।
षष्ठीतत्पुरुषं मेने प्रशस्तमधिकं गुरुः ॥५००॥

षष्ठीतत्पुरुषेऽप्यत्र मतद्वयमजायत ।
शेषे षष्ठीमुशन्ति स्म केचित्, केचिच्च कर्मणि ॥५०१॥

शेषे षष्ठ्या तु सम्बन्धसामान्ये विदिते सति ।
'सम्बन्धः केन सामान्यो' - जिज्ञासेयमिहोदियात् ॥५०२॥

ब्रह्मसम्बन्धि यत्किञ्चिद् ब्रह्मज्ञानोपकारकम् ।
तस्य संग्राहिका श्रीमच् शेषे षष्ठी यदीष्यते ॥५०३॥

तदा तु नितरामत्र समासो व्याकुलीभवेत् ।
षष्ठ्यन्तं नैव सम्बद्धं भवेज्जिज्ञासया सह ॥५०४॥

सम्बन्धविरहादत्र सामर्थ्यविरहो भवेत् ।
सामर्थ्यविरहाच्चैव समासोऽपि न सम्भवेत् ॥५०५॥

ब्रह्मसम्बन्धिनामत्र ग्रहणायैव किञ्च भोः ।
शेषे षष्ठीविधानं तु युक्तियुक्तं न भासते ॥५०६॥

अपादानाधिकरण – करणत्वादिकं यदा ।
विवक्षितं न हि भवेत्, षष्ठी शेषे, तदा भवेत् ॥५०७॥

शेषे षष्ठी तदित्थं भोः कारकत्वाविवक्षया ।
प्रवर्तते, न तु तया पदार्थान्तरमुच्यते ॥५०८॥

पदार्थान्तरबोधाय शेषेषष्ठ्याश्रये कृते ।
सम्बन्धद्योतनार्थाय पुनः षष्ठी ह्यपेक्ष्यते ॥५०९॥

न तथा कुत्रचिद् दृष्टः प्रयोगः शास्त्रसम्मतः ।
तस्माद् बालिशतामेषा शेषे षष्ठी प्रकाशते ॥५१०॥

किञ्च शेषपदं सूत्रे पाणिनीये प्रतिश्रुतम् ।
स्वस्वामित्वादिसम्बन्धविशेषाणां हि वाचकम् ॥५११॥

वाच्ये सम्बन्धसामान्ये शेषशब्दो न युज्यते ।
तस्मात् कात्यायनस्तस्मै प्रणेषीद् वार्तिकान्तरम् ॥५१२॥

तेन शेषपदेनात्र यः सामान्यो विवक्षितः ।
सम्बन्धः सोऽपि नैवास्ति पाणिनीयेन सङ्गतः ॥५१३॥

ब्रह्मशब्दः स्वयं शक्त्या परं तत्त्वं प्रवक्ष्यति ।
स लक्षणोपचाराभ्याम् – अन्यार्थान् गमयिष्यति ॥५१४॥

तादृशाच्च ततः शब्दात् परा षष्ठीह शोभते ।
शेषे कर्मणि वा सा स्यादिति पश्चाद् विचिन्त्यताम् ॥५१५॥

मीमांसा वा विचारो वा जिज्ञासार्थोऽस्तु कश्चन ।
किन्तु कर्मानपेक्षास्ते न स्थास्यन्ति चिरं सुखम् ॥५१६॥

जिज्ञासार्थास्तु सर्वेऽपि कर्म किञ्चित् सुनिश्चितम् ।
अपेक्षिष्यन्त एवेति षष्ठी कर्मणि शोभते ॥५१७॥

ज्ञातुमिच्छा हि जिज्ञासा ज्ञानेच्छावाचिका च सा ।
ज्ञानं च विषयं कञ्चिन्नियतं स्वमपेक्षते ॥५१८॥

ब्रह्मैव विषयश्चास्य जिज्ञासोरत्र सम्भवेत् ।
विषयश्च भवेत्कर्म ज्ञानस्येष्टतमो यतः ॥५१९॥

यस्याः क्रियाया यद्वस्तु भवेदिष्टतमं त्विह ।
तस्यास्तदेव नियतं कर्म सम्पद्यते ध्रुवम् ॥५२०॥

तस्माद् 'ब्रह्मणः', इत्यत्र षष्ठी शेषे न विद्यते ।
कर्मण्येवात्र विज्ञेया षष्ठी सच्छास्त्रसम्मता ॥५२१॥

श्रीमद्रामानुजाचार्या अपि ते 'कर्तृकर्मणोः ।
कृती'ति सूत्रेण ततः षष्ठीमत्रान्वमन्वत ॥५२२॥

श्रीमद्भिर्वल्लभाचार्यैरेव शेषेऽत्र घोषिता ।
षष्ठी, शब्दत आपन्ना गौणताऽङ्गीकृताऽपि च ॥५२३॥

ब्रह्मण्यापतितो यश्च दोषोऽजिज्ञास्यतामयः ।
न च सोऽपि निराचक्रे विपरीतार्थभाषिभिः ॥५२४॥

(अत्र श्रीमद्वल्लभाचार्याणां वृत्तिभेदः)

यं यमर्थं पुरश्चक्रे पूर्वपक्षतया गुरुः ।
तं तमेव स्वसिद्धान्तं कल्पयामास वल्लभः ॥५२५॥

अधिकारार्थता याऽऽसीद् अथशब्दस्य खण्डिता ।
शङ्करैर्वल्लभाचार्यैः स्वीचक्रे सैव सूरिभिः ॥५२६॥

अतःशब्दार्थचिन्तायां नाधिकं प्राह शङ्करः ।
अतः श्रीवल्लभाचार्यास्तत्रासन् मितभाषिणः ॥५२७॥

शङ्करो ब्रह्मशब्दार्थं परं तत्त्वं यदाऽब्रवीत् ।
तदा ब्रह्मपदं मेने वल्लभः श्रुतिवाचकम् ॥५२८॥

ज्ञातुमिच्छां हि जिज्ञासां स्वीचक्रे शङ्करो यदा ।
जिज्ञासया तदाऽवोचद् विचारं वल्लभः प्रभुः ॥५२९॥

शेषे षष्ठीं यदैवाद्यः शङ्करः प्रत्युवाच भोः ।
तदाऽधिकाग्रहेणैनां वल्लभाः प्रत्यपीपदन् ॥५३०॥

तदेवं विपरीतार्थभाषिणः शङ्करोदितात् ।
सन्तोऽपि वल्लभाचार्या न नवं किञ्चिदब्रुवन् ॥५३१॥

वेदान्तवाक्यमीमांसा तर्कोपकरणा सती ।
प्रस्तूयत इति ह्यर्थः शङ्करैरप्यभाष्यत ॥५३२॥

स एवार्थस्ततो भाष्यादधिगत्य बुधोदितः ।
वल्लभैरात्मनो भाष्ये भाषया विशदीकृतः ॥५३३॥

तथापि ध्वनितं किञ्चिद् यदभिव्यज्यते नवम् ।
तदत्र केवलं ज्ञेयमधिकारिनिरूपणम् ॥५३४॥

"वेदान्तानां विचारेऽस्मिन्नधिकारोऽस्ति केवलम् ।
त्रैवर्णिकस्य, नान्यस्य शूद्रादे"रिति वल्लभाः ॥५३५॥

"मीमांसाज्ञानसम्पन्नोऽधिकारी ब्रह्मचिन्तने ।
न जैमिनीयरहितः," इति रामानुजादयः ॥५३६॥

"शमादिसाधनोपेतः सर्वोऽपि जगतीजनः ।
भवत्यत्राधिकारी"ति शङ्कराश्च बभाषिरे ॥५३७॥

(अथात्र नव्यात्ममतसङ्ग्रहः)

तदेवं ब्रह्मजिज्ञासापदार्थं शङ्करोदितम् ।
अनूद्यापि मतं किञ्चिद् मदीयं विनिवेदये ॥५३८॥

मन्मते भगवान् व्यासो यथा मान्यः प्रमाणभूः ।
तथैव भगवानाद्यो गुरुरेष पतञ्जलिः ॥५३९॥

यथा पतञ्जलिश्चैष प्रणम्यः प्राणदः सताम् ।
कपिलोऽपि तथा धीमान् भगवान् सांख्यदेशिकः ॥५४०॥

कणादगौतमौ तद्वन्मुनीशौ जैमिनिस्तथा ।
सर्वेऽप्यमी प्रमाणार्हाः सम्मानार्हा महर्षयः ॥५४१॥

नैतेषु कतमोऽप्यत्र मिथ्यावचनमब्रवीत् ।
स्वया प्रक्रियया सर्वे सत्यमर्थं समार्थयन् ॥५४२॥

उपादिशत् स भगवान् कपिलः साङ्ख्यदर्शनम् ।
यत्राऽस्तवीद् विशेषेण प्रकृतिं पुरुषं तथा ॥५४३॥

आद्योपदेष्टा योगस्य भगवान् स पतञ्जलिः ।
द्विविधं तत्त्वमादिक्षद् दृश्यं द्रष्टारमेव च ॥५४४॥

भावाभावाभिधानाभ्यां भगवन्तौ मुनीश्वरौ ।
कणादगौतमौ सत्तां प्रोचतुस्तत्त्वयोर्द्वयोः ॥५४५॥

वेदोऽपि भगवानाद्यः सर्वमान्यः सनातनः ।
त्रिपादमेकपादं च द्विविधं पुरुषं जगौ ॥५४६॥

भूतं भव्यं भवत् सर्वमेकपात् पुरुषाभिधम् ।
त्रिपाद्रूपं यदमृतं दिवि तत् पूरुषाभिधम् ॥५४७॥

एकं जन्यस्य जगतो निमित्तं निर्गुणं परम् ।
द्वितीयं तदुपादानं सगुणं सर्वशक्तिभृत् ॥५४८॥

तदित्थं द्विविधे रूपे सिद्धे तु परमात्मनः ।
व्यासः किं भगवानत्र स्वीकरोत्येकरूपताम् ॥५४९॥

किं कदाचित्कचिद् दृष्टमेकत्वं परमार्थयोः ।
निदानभूतयोः कार्यं – उपादाननिमित्तयोः ॥५५०॥

येन "ब्रह्मणः" इत्यत्र षष्ठ्येकवचनं पदे ।
विग्रहावसरे प्राप्ते शङ्करैरस्ति योजितम् ॥५५१॥

इति चेच्छ्रूयतामत्र व्यासोऽपि भगवान् स्वयम् ।
द्वैविध्यमेव रूपस्य स्वीकरोत्यविशङ्कितः ॥५५२॥

समाहारविवक्षायामुभयोरपि रूपयोः ।
पदे 'ब्रह्मणः' इत्यस्मिन् एकत्वं हि प्रयुज्यते ॥५५३॥

यदि स्यादविवक्षा वः समाहारस्य रूपयोः ।
तदा तु 'ब्रह्मणो'रित्थं द्वित्त्वमेव प्रयुज्यताम् ॥५५४॥

सत्तामात्रतया लक्ष्यं यदि तु ब्रह्म शाश्वतम् ।
तदा द्वित्वविवक्षाऽत्र सर्वथैवानपेक्षिता ॥५५५॥

रूपद्वयमिदं सूक्ष्मं यदुक्तं परमर्षिभिः ।
सत्तामात्रत्वरूपेण तयोरैक्ये न संशयः ॥५५६॥

सत्तारूपं ततो ब्रह्म तच्च द्विविधमुच्यते ।
एकं सगुणमन्यत्तु निर्गुणं निश्चलं ध्रुवम् ॥५५७॥

जिज्ञासा च तयोरत्र रूपयोर्ब्रह्मवाच्ययोः ।
कर्तव्येति च संक्षिप्तः सूत्रार्थो मे प्रकाशते ॥५५८॥

(अत्र भगवन्तो भामतीकाराः)

अत्र केचन तत्त्वज्ञा अविद्यां नाम कञ्चन ।
कल्पयित्वा महोपाधिं द्विरूपं ब्रह्म चक्षते ॥५५९॥

अविद्योपाधिना त्यक्तं निर्गुणं निष्क्रियं तु यत् ।
तदेकं ब्रह्मणो रूपं यत् परात्परमुच्यते ॥५६०॥

अनाद्यविद्यया योगात् सगुणं सक्रियं च यत् ।
तद् द्वितीयमुपादानमपरं ब्रह्म गीयते ॥५६१॥

तत्राविद्यामनिर्वाच्यामनादिं ब्रुवते च ते ।
ज्ञानोदयाच्च तद्ध्वंसमङ्गीकुर्वन्ति कोविदाः ॥५६२॥

एकत्वमद्वितीयत्वं ब्रह्मणः परमात्मनः ।
प्रख्यापयितुमेवैष यत्नश्चैषां प्रतीयते ॥५६३॥

अविद्ययैव जगतो जन्मस्थितिलयात्मिका ।
मिथ्याप्रतीतिर्जन्तूनां ज्ञानहेया प्रजायते ॥५६४॥

नेदं जगन्न चैवास्य जन्मस्थितिलयाः पुनः ।
सत्या अविद्ययैवैते कल्पिताः प्रतिभान्ति नः ॥५६५॥

एकं केवलमद्वैतं ब्रह्म सत्यं सनातनम् ।
ज्ञानरूपं, न संयुक्तं कथञ्चित्तदविद्यया ॥५६६॥

एवं कैवल्यमेकस्य ब्रह्मणः प्रतिपाद्य ते ।
वैशिष्ट्यं ब्रह्मसूत्राणां प्रथयन्त्यमितौजसः ॥५६७॥

काणादं कापिलं किञ्च पातञ्जलमपीश्वराः ।
निजेनाखर्वगर्वेण गर्हयन्ति स्थले स्थले ॥५६८॥

आद्याः श्रीशङ्कराचार्या यस्य प्रस्थापकाः पुनः ।
कस्तमेनं मतस्तम्भमुत्खनेन्मानवोऽञ्जसा ॥५६९॥

(अत्र स्वमतम्)

मयाऽल्पमतिना त्वत्र सांख्ययोगावहेलनाम् ।
सोढुमक्षममाणेन निर्भयं किञ्चिदुद्यते ॥५७०॥

यदि ह्याप्तवचाः श्रीमान् वेदव्यासो महामुनिः ।
कुतो नैवाऽऽप्तवचनो भगवान् स पतञ्जलिः ॥५७१॥

पतञ्जलिस्तु भगवान् गुरुस्थाने विराजते ।
यत्सूत्रभाष्यकरणाद् वेदव्यासोऽभवत् कृती ॥५७२॥

कथं स गुरुविद्रोहमाचरेद् बादरायणः ।
यो ब्रह्मविष्णुरूपेण कविभिः परिगीयते ॥५७३॥

यमर्थं भगवान् प्राह योगसूत्रे पतञ्जलिः ।
मन्ये तमर्थमेवासौ ब्रह्मसूत्रेषु पुष्यति ॥५७४॥

सांख्ययोगादिशास्त्राणां खण्डनप्रवणे मुनौ ।
कस्तस्मिन् निर्मलां श्रद्धामाधास्यति सुधीरधीः ॥५७५॥

तस्मान्मम तु विश्वासो यन्न योगात् पतञ्जलेः ।
[1]अन्यथार्थं कमप्यत्र व्यासश्रीः प्रत्यपादयत् ॥५७६॥

द्रष्टृदृश्यप्रभेदेन यद् द्विरूपं पतञ्जलिः ।
तत्त्वमङ्गीचकारादौ तदेतैरपि मन्यते ॥५७७॥

यमेव पुरुषं प्राह पदार्थं कपिलो मुनिः ।
तमेवाह स्वसूत्रेषु द्रष्टारं स पतञ्जलिः ॥५७८॥

यः प्रधानमथाव्यक्तं प्रकृतिः कापिले मते ।
स एव दृश्यशब्दार्थः पदार्थश्च पतञ्जलेः ॥५७९॥

दृश्यं प्रधानमव्यक्तं भावः कैश्चिदुदीर्यते ।
भावाद्भिन्नो ह्यभावात्मा पुरुषः ख्याप्यते च तैः ॥५८०॥

तत्र भावं प्रधानं वा प्रकृतिं दृश्यमेव वा ।
मन्यते जगतां व्यास आद्योपादानकारणम् ॥५८१॥

---

१. 'विरुद्धार्थम्', इति पाठान्तरम् ।

द्रष्टारं पुरुषं चासावधिष्ठानं महामुनिः ।
निमित्तकारणं मत्वा प्रस्तुवीते त्वनेकधा ॥५८२॥

[1]प्रकृत्याख्येऽधिकरणे दृश्यते दृश्यवर्णनम् ।
[2]कार्याधिकरणे चान्त्ये साक्षाद् द्रष्टा प्रशस्यते ॥५८३॥

स्थूलस्य जगतश्चास्य द्वाविमौ कारणे यतः ।
तस्माज्जन्मादिसूत्रे तौ यतःशब्दार्थतां गतौ ॥५८४॥

याभ्यामिति पदात्तत्र तसिलस्तु विधानतः ।
यतःपदं तदुभयोः सतोरेवास्ति वाचकम् ॥५८५॥

न केवलं निमित्तेन नोपादानेन केवलम् ।
किन्तु द्वाभ्यामुपेताभ्यां कार्यजातं प्रजायते ॥५८६॥

तयोरेवोभयोरत्र विशदप्रतिपत्तये ।
ब्रह्मणोरेव जिज्ञासा कर्तव्येति विगृह्यताम् ॥५८७॥

एकत्वमद्वितीयत्वम् – ऐतरेय्यां यदुच्यते ।
तन्मिषत्प्रकृतेरन्य – मिषद्व्यावर्तनार्थकम् ॥५८८॥

निमेषोन्मेषरहित – शून्याधिष्ठानवस्तुनः ।
'नान्यत् किञ्चिन्मिषदि 'ति वचनान्नास्ति खण्डनम् ॥५८९॥

---

१. "प्रकृतिश्च प्रतिज्ञासिद्धान्तानुपरोधात्" १।१।२३ इत्यादौ ।

२. "सामीप्यात्तु तद्व्यपदेशः" (४–३–९०) "दर्शयतश्चैवं त्यक्षानुमाने" (४–४–२०) इत्याभ्यां सूत्राभ्याम् ॥ "ईक्षत्यादौ च ुरुषः", इति पाठान्तरम् ।

अधिष्ठानतया कार्ये यन्निमित्तमबाधितम् ।
भावाद् भिन्नतयाऽभाव – रूपमप्येतदस्ति सत् ॥५९०॥

अधिष्ठितमुपादानमपरं यत्तु जायते ।
तद् भावरूपं सर्वत्र स्तूयते सांख्ययोगयोः ॥५९१॥

(प्रसङ्गादविद्याविचारः)

अविद्यानामकं तत्त्वं किञ्च यत् ख्याप्यते बुधैः ।
तत् किं द्रव्यं गुणो वास्ति क्रिया कस्यचिदस्ति वा ॥५९२॥

गुणत्वे वा क्रियात्वे वा यस्याऽविद्या गुणः क्रिया ।
तद् द्रव्यं नामतो वाच्यं, द्रव्यालम्बे हि ते यतः ॥५९३॥

यदि सा स्वयमेवास्ति द्रव्यरूपा तमोमयी ।
तदा किं ब्रह्मणो भिन्ना ब्रह्मरूपैव वा मता ॥५९४॥

भेदे तु स्वीकृते श्रीमन् अविद्या सा तमोमयी ।
दृश्यायां प्रकृतावेव स्वयमन्तर्भविष्यति ॥५९५॥

अभेदे च तदास्तित्वे तदीये स्वीकृते सति ।
अविद्या ब्रह्मणो रूपाद् भिद्येत न कथञ्चन ॥५९६॥

अभेदाद् ब्रह्मणः ख्याता याऽप्यस्ति ज्ञानरूपता ।
द्रागेव सा विरुध्येत न च तत् कस्यचित् प्रियम् ॥५९७॥

तस्मादद्वैतवादेऽस्मिन् सांख्ययोगौ निरामयौ ।
सत्कृत्य च पुरस्कृत्य ज्ञेयं ब्रह्म विपश्चिता ॥५९८॥

मायाऽविद्यादिभिः शब्दैः श्रुतयोऽपि सुसंगताः ।
प्रकृतिं सांख्ययोगोक्तां विशिंषन्ति विशेषतः ॥५९९॥

ता एव मायिनं प्राहुः पुरुषं तं महेश्वरम् ।
यः साङ्ख्ये प्रकृतेर्भिन्नो योगे द्रष्टा च गीयते ॥६००॥

वेदव्यासः स भगवाँस्तमेवार्थमनूचिवान् ।
सांख्ययोगविगानेन कः सत्यार्थमिहाप्नुयात् ॥६०१॥

अविद्योपाधिशब्दाभ्यां शङ्करोऽपि सुधीश्वरः ।
तमःप्रधानां प्रकृतिं ग्राहयन्निव [1]भाति मे ॥६०२॥

तस्माद् व्यासः स भगवान् अत्र ब्रह्मपदेन तु ।
प्रकृतिं पुरुषं चेति तत्त्वद्वितयमूचिवान् ॥६०३॥

ततश्च ब्रह्मजिज्ञासापदं यदिह दृश्यते ।
ब्रह्मणोरेव जिज्ञासां तदिहाभिव्यनक्ति नः ॥६०४॥

(अथ ब्रह्मसूत्रनिर्माणप्रयोजनम् ।)

योगे साङ्ख्ये च कुत्रापि ब्रह्मशब्दो न विद्यते ।
प्रकृतिः पुरुषः किञ्च द्रष्टा दृश्यं प्रदृश्यते ॥६०५॥

श्रुतिषु त्वत्र सर्वासु ब्रह्मशब्दो विशेषतः ।
श्रूयते दृश्यते चापि ततः शङ्का प्रजायते ॥६०६॥

प्रकृत्यादिपदैः सांख्ये योगे दृश्यादिभिः पदैः ।
योऽर्थः प्रतीयते श्रुत्या किन्तु [2]सैवाभिधीयते ॥६०७॥

किं ब्रह्मपदवाच्योऽर्थो द्रष्टृदृश्यादिभिः पदैः ।
अनूदितोऽथवा भिन्नौ वाच्यार्थावुभयोरपि ॥६०८॥

---

१. "वर्तते", इति पाठान्तरम् । २. सोऽचि लोपे चेत्पादपूरणम्" इतिसोर्लोपे वृद्धिः । "किन्त्वर्थः सोऽभिधीयते" इति पाठान्तरं वा ।

इतीमामुदितां शङ्कां लोकव्यामोहकारिणीम् ।
निराकरिष्णुर्भगवान् ब्रह्मसूत्राणि निर्ममौ ॥६०९॥

"ततश्च कपिलाचार्यः पुंस्प्रकृत्यादिभिः पदैः ।
यावर्थौ बोधयामास तावर्थौ ब्रह्मणा श्रुतिः ॥६१०॥

योगाचार्यश्च भगवान् द्रष्टृदृश्यादिभिः पदैः ।
यावर्थौ तावुभौ ब्रह्म – शब्देनोपनिषज्जगौ ॥६११॥

इत्याशयमिह स्पष्टं चिकीर्षुर्बादरायणः ।
"अथातो ब्रह्मजिज्ञासे" – त्याद्यं सूत्रमुदाहरत् ॥६१२॥

"सांख्ययोगप्रयुक्तानां पदानामर्थनिर्णयात् ।
परतो ब्रह्मशब्दार्थज्ञानेच्छे"त्ति तदाशयः ॥६१३॥

सांख्ययोगाधिगमनात् परतस्तत्त्वयोर्द्वयोः ।
स्वरूपमधिगन्तव्यं श्रुतिभिर्ब्रह्मवाच्ययोः" ॥६१४॥

इत्यर्थकं स भगवान् भृगुवल्लीनिदर्शकम् ।
'अथातो ब्रह्मजिज्ञासा' – सूत्रं प्रथममुक्तवान् ॥६१५॥

इति प्रथमाध्यायस्य प्रथमपादस्य प्रथमसूत्रभाष्यालोचनम् ॥

अथ द्वितीयसूत्रभाष्यालोचनं प्रारभ्यते ॥

भगवान् वरुणस्तत्र तनयं विनयान्वितम् ।
ब्रह्म ज्ञातुं मनोयत्नाननुष्ठातुमुपादिशत् ॥१॥

क्रमशस्तपसा ब्रह्म सोऽन्नं प्राणमवागमत् ।
मनो विज्ञानमानन्दं सर्वं ब्रह्मैव चागमत् ॥२॥

तदेतद् ब्रह्म संक्षेपाल्लक्षयन् बादरायणः ।
"जन्माद्यस्य यतः" – सूत्रं द्वितीयमकरोन्मुनिः ॥३॥

× × × × ×

" जन्माद्यस्य यतः " ॥ १–१–२ ॥

{ अस्य, जन्मादि, यतः, तद्, ब्रह्म. / आद्यस्य, जन्म, यतः, तद्, ब्रह्म } (इति श्रीमद्वल्लभाः)

— इति वा

(तत्रादौ श्रीमद्वल्लभाचार्याः)

अस्येत्येतत्पदेनात्र श्रीमद् – वल्लभसूरयः ।
'पुरोवर्ती प्रपञ्चोऽयं निर्दिष्टः', इति मन्वते ॥४॥

भूतैश्च भौतिकैः सर्वैर्देवदानवमानवैः ।
नभःस्थलजलौकोभिर्घटितं विस्मयान्वितम् ॥५॥

अनन्तकोटिब्रह्माण्डरूपं च यदिदं जगत् ।
दृश्यतेऽचिन्त्यरचनाचरितं सचराचरम् ॥६॥

तदेतदखिलैरार्षैः प्रमाणैः प्रमितं जगत् ।
प्रपञ्चेतिपदेनात्र ते च नः पर्यचाययन् ॥७॥

अविद्याकृतदेहादिमिथ्याध्यासेन संयुतम् ।
यदेव, स प्रपञ्चोऽस्तीत्याह चात्र प्रदीपकृत् ॥८॥

तथा हि–" प्रापञ्चिके = अविद्याकृतदेहाद्यध्यासवन्निष्ठे " इत्यपु
भाष्यप्रदीपः ॥

उत्पत्तिस्थितिभङ्गाश्च तस्यास्य जगतो यतः ।
तदेव ब्रह्म विज्ञेयं यदत्राधिकृतं पुरा ॥९॥

एवं सरलमुक्त्वाऽपि भावार्थं वल्लभः प्रभुः ।
प्राचीकटत् स्वपाण्डित्यं जन्मादिपदविग्रहे ॥१०॥

"जन्मस्थितिविनाशानां समाहारस्य बोधकः ।
जन्मादीति बहुव्रीहिस्तद्गुणज्ञापको हि यः ॥११॥

शङ्करेण पुरा प्रोचे, तत्खण्डनधिया प्रभुः ।
अतज्ज्ञानं बहुव्रीहिं ख्यापयामास वल्लभः ॥१२॥

तथ हि–" जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः
जन्मस्थितिभङ्गाः समासार्थः । " (शां. भा.)

येषां भावविकाराणां जन्माऽऽद्योऽवयवः स्मृतः ।
जसन्तं वाचकं तेषां जन्मादीत्यवदत् पदम् ॥१३॥

सतश्च लुकमत्रैच्छच्छान्दसं वल्लभो जसः ।
किन्तु नैवैनया युक्त्या समतुष्यत् स बुद्धिमान् ॥१४॥

तत्र गौरवमालोक्य बहुव्रीहौ जसौ लुकि ।
'जन्म चादिश्चे'ति कृत्वा समाहारं स ऊचिवान् ॥१५॥

'प्राथम्यस्यादिशब्दोऽयं वाचकः सन्नपि स्वयम् ।
निरूप्यते यैः प्राथम्यं तेषामत्रास्ति लक्षकः ॥१६॥

पञ्चभावविकारा ये ह्यस्तिनश्यतिसङ्गताः ।
त एवादिपदेनात्र लक्ष्यन्ते द्वन्द्ववर्तिना' ॥१७॥

इत्थमुक्त्वाऽप्यसन्तुष्यँस्तत आदिपदस्य सः ।
आधाररूपसद्धर्मि – प्रपञ्चं वाच्यमभ्यधात् ॥१८॥

सत्तां विपरिणामं च वृद्ध्यपक्षयसंक्षयान् ।
ततो लक्ष्यानुवाचासौ विकारानादिशब्दतः ॥१९॥

इत्थमादिपदार्थस्य निर्णये व्यग्रचेतसा ।
स्वीकुर्वता बहुव्रीहिं पुनर्मूषकता वृता ॥२०॥

अस्तित्वादिभिरप्येतैर्विकारैर्यन्निरूपितम् ।
आदित्वं, तत् प्रपञ्चस्य जन्मन्येवास्ति सुस्थितम् ॥२१॥

तस्माद् येषां विकाराणाम् – आदिर्जन्म व्यवस्थितम् ।
तेषां भावविकाराणां जन्मादीत्यस्ति वाचकम् ॥२२॥

जन्मादीत्येकवचनश्रवणात्तु प्रदीपकृत्[1] ।
जन्मादिर्यस्य तदिति व्यगृह्णाच्छङ्करो यथा ॥२३॥

एवं श्रीशङ्कराचार्यवचनस्यानुवादतः ।
क्षुब्धचेताः पदच्छेदमन्यथाऽन्ते चकार सः ॥२४॥

---

१. "येषामिति बहुवचनं तद्गुणसंविज्ञानेन बहूनां सङ्ग्रहार्थमुक्तम्; न तु विग्रहघटकमपि । सूत्रे एकवचनस्यैव सत्त्वात् । विग्रहवाक्यं तु–'जन्म आदिर्यस्य तद्' इत्येवंरूपम् ॥' इति प्रदीपे ॥

आद्यस्य सर्वभूतानामाकाशस्यास्ति सम्भवः ।
निरूपितस्तत्त्वविद्भिर्ब्रह्मवल्ल्यां महर्षिभिः ॥२५॥

तमेवाद्यपदेनात्र गृहीत्वाऽऽकाशमव्ययम् ।
सम्भवार्थकमाह स्म, मन्ये, जन्मपदं प्रभुः ॥२६॥

आद्यस्याकाशतत्त्वस्य जन्म यस्मादुदीर्यते ।
तद् ब्रह्मेति निरुक्त्यान्ते समासं निरकासयत् ॥२७॥

एवमस्येति नैवास्ति षष्ठ्यन्तं तन्मते पदम् ।
न वा समस्तं जन्मादि यथा श्रीशङ्करोऽभ्यधात् ॥२८॥

किञ्चास्मिन्नपरे पक्षे जन्मशब्दो न बोधकः ।
स्थित्यादीनां विकाराणां, ये निरुक्ते निरूपिताः ॥२९॥

[1]आविर्भावतिरोभावावुभयं जन्मशब्दतः ।
वक्तुमेव परं यत्नं चकारान्ते महाप्रभुः ॥३०॥

किन्त्वेकेन विरुद्धार्थौ जन्मशब्देन तावुभौ ।
आविर्भावतिरोभावौ कथं स्यातामिहोदितौ ॥३१॥

किञ्चैतावुभयौ भावावाकाशस्याऽथवा यतः ।
सम्भवत्येष तस्येति महाञ्जागर्ति संशयः ॥३२॥

एवं शङ्काग्रहग्रस्तमानसः क्षुब्धधीरसौ ।
पुनरादिपदेनात्र समासं प्राह जन्मनः ॥३३॥

स्वीकृत्यात्र बहुव्रीहिं जन्माविर्भाववाचकम् ।
आदि मत्वा तिरोभावं बहुव्रीह्यर्थमभ्यधात् ॥३४॥

---

१. " मतान्तरवज्जन्मादीनां न विकारित्वं, किन्त्वाविर्भावतिरोभावावेव तथोत्तरत्र वक्ष्यते तदनन्यत्वाधिकरणे ", इति – अणुभाष्यम् ॥

अस्येत्यनेन च पुनः प्रपञ्चं प्राङ्निरूपितम् ।
निरूप्य नामलीलायास्तत्रान्तःपातमुक्तवान् ॥३५॥

एवमस्य प्रपञ्चस्य यतः सम्भवतः स्थिरौ ।
आविर्भावतिरोभावौ तद् ब्रह्मेत्यत्र लक्ष्यते ॥३६॥

तिरोभावमुपेतोऽपि प्रपञ्चोऽयं न नश्यति ।
तस्माच्च नितरां भिन्नं ब्रह्मेत्यत्र च सूच्यते ॥३७॥

जन्माद्यस्येति पदयोरेवमुक्त्वाऽणुमाशयम् ।
अनुब्रुवे 'यतः'-शब्दे विचारान् वल्लभोदितान् ॥३८॥

यत इत्यत्र यच्छब्दात् प्रवृत्ता पञ्चमी परा ।
सा चेह जायमानस्य हेतोरेवास्ति वाचिका ॥३९॥

स हेतुर्द्विविधो लोके दृष्टश्चैवानुभूयते ।
एको निमित्तमपर उपादानं तथोच्यते ॥४०॥

प्रकृतिर्जनिकर्तुर्या स हेतुरुभयात्मकः ।
तामपादानमाह स्म भगवान् पाणिनिः स्वयम् ॥४१॥

ततश्चात्र यतःशब्दे या दृष्टा पञ्चमी परा ।
किं तया द्योत्यते हेतुर्द्विविधोऽन्यतरोऽथवा ॥४२॥

निमित्तं केवलं किं वा किमुपादानमेव वा ।
किं वा द्वितयमेवात्र पञ्चमीद्योत्यतां गतम् ॥४३॥

इतीयं महती शङ्का जागर्तीह दुरुद्धरा ।
यामाचार्याः समुद्धर्तुं प्रायतन्त पुरातनाः ॥४४॥

वल्लभस्त्वत्र कर्तृत्वद्योतिनीं प्राह पञ्चमीम् ।
'यस्मादस्य च जन्मादि कर्तुस्तद् ब्रह्म' गीतवान् ॥४५॥

(अत्र मे विचारः)

उत्पत्तिस्थितिनाशाऽऽख्या व्यापारा न सकर्मकाः ।
सामानाधिकरण्येन यतः प्रसुवते फलम् ॥४६॥
यत्रैते समवेताः स्युः स कर्तैषामिति स्थितिः ।
यो हि सञ्जायते, तस्माद् – अन्यस्तस्य न कारकः ॥४७॥
जायमानो जनेः कर्ता, भिद्यते प्रकृतिस्ततः ।
तस्मान्न जायमानस्य कर्त्री प्रकृतिरिष्यते[1] ॥४८॥
यदि भूतानि जायन्ते जीवन्त्यभिविशन्ति च ।
स्वयमेव तदा तेषां कर्ताऽन्यो नैव सम्भवेत् ॥४९॥
जायमानस्तथा तिष्ठन् प्रयन् वापि स्वयं जनः ।
भूमिदण्डरथादीनि साधनानि त्वपेक्षते ॥५०॥
तिष्ठतः प्रयतो वापि साधनं, कर्तृ नोच्यते ।
तस्माद्दण्डो रथो वा न कर्ता स्थानप्रयाणयोः ॥५१॥
स्वयं भूतानि जायन्ते जीवन्तीतः प्रयन्ति च ।
किन्तु तानि ह्यपेक्षन्ते साधनं किञ्चिदुत्तमम् ॥५२॥
भगवान् वरुणस्तस्य साधनस्यैव वस्तुताम् ।
जिज्ञासितुमुपादिक्षद् भृगुं वारुणिमात्मजम्[2] ॥५३॥

---

१ जनिकर्तुः प्रकृतिरित्यत्र प्रकृतिशब्दो न कर्तृवाचीत्यर्थः ॥

२. (नैजवर्ष्ममुद्भवम्) – अयं पाठो गुरुचरणानाम् ॥ (भृगुमात्मतनूद्भवम् ॥)

तदेव साधनं कर्तृ जगतोऽस्येति वल्लभाः ।
प्रतिशृण्वन्ति धीमन्तो यतःशब्दादिहोदितात् ॥५४॥

"उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत् " ।
इति तेषामिह स्पष्टः सिद्धान्तोऽस्ति समुद्धृतः ॥५५॥

"कर्तृ ब्रह्मे"ति वेदेन न कुत्राप्यस्ति शब्दितम् ।
तथापि ते यतःशब्दबोधितं तदमन्वत ॥५६॥

सत्यवादौ च कर्तृत्वे विभाव्यादौ विरोधिताम् ।
सामानाधिकरण्यस्य सम्भवात्तां ततोऽहरन् ॥५७॥

"स्वयं भवति यः सर्वैं रूपैः स कथमव्ययः ।
जगतोऽस्य भवेत्कर्ता " ? प्रश्न एव यदोत्थितः ॥५८॥

तदा तु सर्वभवनसामर्थ्यादेव तस्य ते ।
कर्तृत्वं कर्मतां सर्वभावित्वं चाभ्यमन्वत ॥५९॥

तदेदमा हि कर्मत्वं यदा चैवास्य कर्तृता ।
द्योत्यते, किन्तु नैतेन वस्तुभेदः प्रसाध्यते ॥६०॥

एकेनांशेन कर्तृत्वं स्वीकृत्यांशेन कर्मताम् ।
नानाविरुद्धधर्माणामाश्रयं ब्रह्म तेऽब्रुवन् ॥६१॥

(पूर्वपक्षः)

नन्वेवं कर्तृकर्मत्वधर्मभेदो हि केवलम् ।
विवक्षितो, यदा धर्मिभेदो नास्ति विवक्षितः ॥६२॥

तदा " जन्मादिवद् यत्तद् " इत्येतादृशमस्तु भोः ।
सूत्रं, वृथा किमेताभ्यां पदाभ्याम्, "अस्य", वा "यतः" ॥६३॥

किञ्च न व्यवहारेऽस्मिन् कदाचिदपि दृश्यते ।
कल्पिता भ्रामिका पुंसाम्, एकता कर्तृकर्मणोः ॥६४॥

किञ्चैकस्मिन् घटे कार्ये मृदुपादानमिष्यते ।
तदन्यानि निमित्तानि समीह्यन्ते बहूनि च ॥६५॥

तेष्वेतेषु निमित्तेषु दण्डश्चक्रं च चीवरम् ।
कुलालोऽपि तथा कर्ता नियमेनास्त्यपेक्षितः ॥६६॥

यद्येतद् ब्रह्म जगतः कर्तृस्थाने नियुज्यते ।
जगदेतत्तदा ब्रह्मकार्यस्थाने नियुज्यताम् ॥६७॥

तदा कर्तुः पृथग्भूतमुपादानं विलक्षणम् ।
किञ्चिदत्र भवेद्वाच्यं भवता कर्तृवादिना ॥६८॥

किञ्च भिन्नानि वाच्यानि साधनान्यपि यैरदः ।
कर्तृ ब्रह्म जगत्सर्वमिदं जनयति स्वयम् ॥६९॥

(उत्तरपक्षः)

इत्येतेषु तथाऽन्येषु प्रश्नेष्वाविर्भवत्सु ते ।
कर्तृतां द्विविधां प्राहुर्लौकिकीं चाप्यलौकिकीम् ॥७०॥

लौकिकी कर्तृता नित्यं करणानीतराण्यपि ।
समीहते पृथग्भूतमुपादानं तथाऽपरम् ॥७१॥

अलौकिकं तु कर्तृत्वं न हि किञ्चित्समीहते ।
करणं वाप्युपादानं स्वस्माद् भिन्नं तु यद्भवेत् ॥७२॥

तदलौकिककर्तृत्वयुक्तमेतदुदीर्यते ।
ब्रह्म यस्माज्जगत्सर्वं जायते सचराचरम् ॥७३॥

— (पूर्वपक्षः) —

ननु भो यस्य कार्यस्य कर्ता तु स्यादलौकिकः ।
तत्कार्यं लौकिकं वाच्यं किं वा वाच्यमलौकिकम् ॥७४॥

अलौकिकस्य कर्तुस्तु कार्यं वाच्यमलौकिकम् ।
लौकिकस्य च सत्कर्तुः कार्यं लौकिकमेव चेत् ॥७५॥

नालौकिकेन कर्त्रेदं लौकिकं कर्तुमीश्यते ।
न चापि लौकिकेनात्र कर्तुं किञ्चिदलौकिकम् ॥७६॥

तस्माद्यदि जगत्सर्वं लौकिकं भवतो मतम् ।
न तस्य कर्ता कोऽप्यन्यः स्यात्कथञ्चिदलौकिकः ॥७७॥

यद्यलौकिकमिष्येत जगदेव तदा तु भोः ।
वाच्यं तल्लौकिकं यस्माद् भिन्नं जगदलौकिकम् ॥७८॥

इत्थं बहुविधेष्वत्र संशयेषूद्धतेष्वपि ।
मेनिरे करणं किञ्चिज्जगतोऽस्य न लौकिकम् ॥७९॥

— (पूर्वपक्षः) —

किञ्च भो व्यवहारेऽस्मिन् कारणे द्विविधे मते ।
जनको जायमानस्य कर्ता कार्यस्य चापरः ॥८०॥

पुत्रादीनां जनयिता पिता यो जनकः स्मृतः ।
न स कर्ता क्वचिल्लोके पुत्रादीनामुदीर्यते ॥८१॥

कुम्भकारो घटादीनां कर्ता नियतमुच्यते ।
किन्तु नासौ घटादीनां जनको वा पितोच्यते ॥८२॥

सजातीयपदार्थस्य जनने कारणं पिता ।
विजातीयपदार्थस्य कृतौ कर्ता च कारणम् ॥८३॥

तस्मादस्ति महान् भेदो जनके चापि कर्तरि ।
निरूप्या कर्तृता कार्याज्जन्याज्जनकता तथा ॥८४॥

तदित्थमस्य जगतः कारणं यदलौकिकम् ।
तदस्य जनकं किंवा सम्मतं कर्तृ वा पुनः ॥८५॥

जनकत्वेऽस्य जन्यस्य (जातस्य) जगतः स्वीकृते तु भोः ।
सजातीयतया नैतदत्र वाच्यमलौकिकम् ॥८६॥

अलौकिकत्वसिद्ध्यर्थं यदि कर्तृत्वमिष्यते ।
समस्तस्यास्य जगतो जडताऽऽपद्यते तदा ॥८७॥

किञ्च यद्वद् घटो नित्यं क्रियमाणः क्रियाक्षणे ।
कर्तुरिच्छति सान्निध्यं तद्वदिच्छेज्जगच्च तत् ॥८८॥

जायामहे वयं सर्वे न तु कर्त्रा क्रियामहे ।
तथात्वे कर्तृसान्निध्यं नैवापेयात् कदाचन ॥८९॥

क्रियमाणस्य किञ्चास्य घटस्य करणक्षणे ।
कुम्भकारस्य तत्कर्तुः सान्निध्यं दृश्यते स्फुटम् ॥९०॥

न तदा दृश्यते श्रीमन् कर्ताऽन्यः कुम्भकारिणः ।
यस्मिन्भवदभिप्रेते घटकर्तृत्वमारभेत् ॥९१॥

वेदेषु जायमानत्वमुच्यते जगतः सतः ।
न क्वचित् क्रियमाणत्वं दृश्यते श्रूयतेऽथवा ॥९२॥

जगतः क्रियमाणत्वे कार्यत्वे वा श्रुतौ मते ।
'जायन्ते", "स्यां", प्रजायेये"–त्यादि व्यर्थं क्रियापदम् ॥९३॥

केवलं पौरुषं सूक्तं दृश्यतां, यत्र दृश्यते ।
जनिः सम्भवतिश्चैव बहुधाऽस्ति प्रयोजितः ॥९४॥

कृधातुस्तु द्विरेवात्र प्रयुक्तोऽस्ति, जनिः पुनः ।
तत्र द्वादशकृत्वोऽस्ति प्रयुक्तश्च ततोऽधिकम् ॥९५॥

अस्तिः सम्भवतिश्चैव जनिरुत्पद्यतिस्तथा ।
सर्वत्र श्रुतिवाक्येषु शतशः श्रूयते, यतः ॥९६॥

जगतो जायमानत्वं तेन सम्भवति स्वतः ।
न पुनः क्रियमाणत्वं कर्त्रा केनापि सिध्यति ॥९७॥

आविर्भावतिरोभावौ किञ्च श्रीवल्लभैः स्वयम् ।
यौ स्वीकृतौ, विरुध्येते कर्तृत्वस्वीकृतौ तु तौ ॥९८॥

आविर्भवति चेद् ब्रह्म स्वयमेव भवज्जगत् ।
तदा कस्यात्र कर्तृत्वं कर्मत्वं कस्य वा भवेत् ॥९९॥

किञ्चैकत्र स्वयं श्रीमान् वल्लभो विबुधाग्रणीः ।
सामर्थ्यं सर्वभवने ब्रह्मणः प्रत्यपादयत् ॥१००॥

यः स्वयं जायते स्वस्माद् वर्धते स्वयमेव च ।
स्वयं विपरिणम्याथ स्वयमेव विनश्यति ॥१०१॥

स कथं सर्वभवनसमर्थः परमेश्वरः ।
जगद्रूपः परेणेह कर्त्रा कर्तुं प्रभूयते ॥१०२॥

तस्मादत्र महागर्वाद् वल्लभैः प्रतिपादितम् ।
यदलौकिककर्तृत्वं { तन्मृषा प्रतिभाति मे
स प्रमादो विभाति मे
भाति प्रामादिकं तु तत् } ॥१०३॥ इति गुरुचरणानां पाठः ॥

अत्रालौकिककर्तृत्वस्वीकारात्तु स्वयम्भुवः ।
प्रकृते सर्वभवनसामर्थ्यंस्वीकृतं वरम् ॥१०४॥

प्रकृतिः सर्वभवनसमर्था स्वयमेव सा ।
प्रादुर्भूय निजैरंशैस्तिरोभवति सर्वदा ॥१०५॥

अंशभेदादनेकेषां धर्माणां च विरोधिनाम् ।
इयमेकाश्रयो भाति प्रकृतिः परमेश्वरी ॥१०६॥

सेयं स्थूलैर्निजैरूपैर्दृश्यते चानुभूयते ।
तामेव विविधाकारां जगदाहुर्मनीषिणः ॥१०७॥

सैवाऽऽकाशप्रकाशाभ्रभूमिवार्यनलानिलैः ।
निजै रूपैरिह ख्याता भूतभव्यभवत्पदैः ॥१०८॥

भगवान् भृगुरप्येनामतिसन्निहितामपि ।
अन्नप्राणमनोज्ञानाऽऽनन्दरूपामबुध्यत ॥१०९॥

सेयं स्वयं जायमाना वर्धमाना स्वयं स्थिरा ।
स्वयं विपरिणम्यान्ते स्वयमेव प्रलीयते ॥११०॥

निमित्तमात्रमेतस्याः प्रकृतेः पुरुषः परः ।
सोऽपि ज्ञेयो यतस्तस्माद् वरुणस्तमजिज्ञपत् ॥१११॥

तदेतद् द्वितयं सांख्ययोगादौ स्तूयते परम् ।
वल्लभस्तन्निनिन्दैव ह्यंशतः शङ्करानुगः ॥११२॥

दृश्यप्रकृत्यादिपदैर्योऽर्थः शास्त्रे प्रतीयते । (निरूपितः)
न स ब्रह्मपदेनात्र वाच्य इत्याह वल्लभः ॥११३॥

यथा ब्रह्मणि कर्तृत्वं तथैवास्मिन् स भोक्तृताम् ।
अङ्गीकरोति मतिमान् किन्तु ते द्वे अलौकिके ॥११४॥

निष्क्रियत्वमसङ्गत्वं यत्तु वेदेषु गीयते ।
तदेतल्लौकिकं ज्ञेयं, न कदाचिदलौकिकम् ॥११५॥

अलौकिके क्रियावत्त्वसङ्गतत्वे तु तिष्ठतः ।
ब्रह्मण्यस्मिन् निरावाधे इति श्रीवल्लभाशयः ॥११६॥

भोक्तृत्वसर्वगामित्वसर्वाधिपतितादयः ।
अश्रुता वा श्रुताः सर्वे गुणा अस्य ह्यलौकिकाः ॥११७॥

तदलौकिककर्तृत्वशालि ब्रह्म सनातनम् ।
क्रमेण युगपच्चापि कुरुते लौकिकं जगत् ॥११८॥

"क्रमेण कुरुते ब्रह्म जगदेतच्चराचरम्" ।
इति ब्रह्मानन्दवल्ली चिन्तनादध्यगादसौ ॥११९॥

"अग्नेर्यथा विस्फुलिङ्गा युगपद् ब्रह्मणस्तथा ।
जगद् बभूवे"ति भृगोर्वल्लीतश्चाध्यगादयम् ॥१२०॥

"ब्रह्मानन्दाभिधा वल्ली वक्त्युत्पत्तिं क्रमागताम् ।
भृगुवल्ली च युगपद्," इति वल्लभभावना ॥१२१॥

क्रमेण युगपच्चापि कर्तुमेतां जगत्ततिम् ।
तस्मादलौकिकात् कर्तुरपरो नैव पारयेत् ॥१२२॥
निरङ्कुशजगत्कर्तृभावाच्चैतत् सनातनम् ।
ब्रह्म तेनेह सम्मेने सर्वज्ञं सर्वशक्तिभृत् ॥१२३॥

(अत्र तन्मतखण्डनम्)

कृधातोस्तु न कुत्रापि यद्यप्यत्रास्ति दर्शनम् ।
सम्भवश्च जनिश्चैव श्रूयेते केवलाविह ॥१२४॥
तथाप्येष बलादाभ्यां वल्लीभ्यां कार्यकर्तृताम् ।
अस्मान् बोधयितुं यत्नाननुतिष्ठति निष्फलान् ॥१२५॥
यत्रापि श्रूयते वल्ल्यां कृधातुः सम्प्रयोजितः ।
तत्राऽऽत्मानं स्वयं कर्म ज्ञापयत्यमला श्रुतिः ॥१२६॥
स्वयमात्मकृतिर्नाम स्वयंभूतिः स्वयंजनिः ।
न तत्र कर्तृकर्मत्वभेदो वास्तविकोऽर्थतः ॥१२७॥
ब्रह्मणस्तेन वेदेषु नास्त्यलौकिककर्तृता ।
न च कर्मत्वमेतेषां भूतानां लौकिकं क्वचित् ॥१२८॥
स्थूलया सूक्ष्मया चापि यद् दृशा दृश्यते जगत् ।
मूलप्रकृतिभूतं तत् सर्वमेवास्ति लौकिकम् ॥१२९॥
मूलप्रकृतिरेवैषा कार्यरूपाऽनुभूयते ।
लोकविश्वजगच्छब्दैः स्तूयमाना सहस्रधा ॥१३०॥
अलौकिकत्वं लोकाद्वा भिन्नत्वं चेद् विवक्षितम् ।
पुंसस्तदुच्यतां, तत्र न विरुन्ध्मो मनागपि ॥१३१॥

किन्त्वस्मिन् निर्गुणे पुंसि निःसङ्गे निष्क्रियेऽनघे ।
भावाद् भिन्नेऽपि कर्तृत्व—कल्पना त्वस्ति नाऽनघा ॥१३२॥

(शास्त्रयोनित्वात्)

शास्तीति शास्त्रमित्याहुर्वेदाः शास्त्रं ततो मताः ।
तत्रास्य ब्रह्मणः प्रोक्तं कर्तृत्वमिति वल्लभाः ॥१३३॥
योनिः कारणमित्येतौ शब्दावेकार्थवाचिनौ ।
शास्त्रे योनिः शास्त्रयोनिरिति चैच्छत्स विग्रहम् ॥१३४॥
शास्त्रेषु कारणत्वेन ब्रह्मोक्तमिति कर्तृता ।
पदेन शास्त्रयोनित्वादित्येतेनाऽत्र सूच्यते ॥१३५॥
वस्तुतस्तु न कर्तृत्वं वेदे कुत्रापि घोषितम् ।
तस्मान्न शास्त्रयोनित्वादित्यस्यार्थोऽत्र सुस्फुटः ॥१३६॥
किञ्च सन्नपि शब्दोऽयं " योनिः " कारणवाचकः ।
'कर्तृत्वस्यैव नियतं वाची ' त्यस्ति न शासनम् ॥१३७॥
पञ्चम्यन्तस्य किञ्चास्य पदस्यात्र न सिध्यति ।
सम्बन्धः कोऽपि ' जन्मादि यतोऽस्ये, 'ति पदैः सह ॥१३८॥
तस्मात्तृतीयतां हित्वा सूत्रत्वेनास्य सूरिणा ।
या द्वितीयाङ्गता प्रोक्ता सा न भाति मनोरमा ॥१३९॥
जगत्कर्तृत्वपक्षस्य स्थापनाय च धीमता ।
याः कृता विविधाश्चेष्टास्ता अथो समनुब्रुवे ॥१४०॥
द्वित्राण्येवात्र वाक्यानि सन्ति तद्दृशि, यैर्बलाद् ।
जगत्कर्तृत्वमेतस्य ब्रह्मणः स्थापयत्यसौ ॥१४१॥

तैत्तिरीयोपनिषदः प्रायो वल्लीद्वये पुनः ।
असाधिततदर्थानि सन्ति तानीत्यवादिषम् ॥१४२॥

न तैः स्पष्टतया 'ब्रह्म, जगत्कर्त्रि'ति, भाष्यते ।
तथापि न जहात्येष तत्कर्तृत्वदुराग्रहम् ॥१४३॥

एतेषामेव वाक्यानां प्रामाण्याय स वित्तमः ।
शास्त्रशब्दस्य मीमांसां व्यतनोन्निष्प्रयोजनाम् ॥१४४॥

शास्त्रशब्दो हि वेदार्थवाचीत्येतैः प्रतिश्रुतम् ।
वेदेषु च न कुत्रापि ब्रह्मणः कर्तृतेरिता ॥१४५॥

प्रजापत्यादिदेवानामुच्यते तु स्थले स्थले ।
जगत्कारणता तस्मात्सन्देहो जायते महान् ॥१४६॥

तत्सन्देहनिवृत्त्यर्थं ब्रह्मकर्तृत्वपुष्टये ।
प्रजापत्यादिदेवानां कर्तृत्वोन्मूलनाय च ॥१४७॥

आदौ वेदान्तवाक्यानां सर्वेषामेव वेदताम् ।
साधयामास यत्नेन मन्त्रत्वाद् ब्राह्मणत्वतः ॥१४८॥

पदानामनुरोधेन ब्रह्मरूपार्थवाचिनाम् ।
यत्र पादव्यवस्थाऽस्ति ऋगेषाऽत्राभिधीयते ॥१४९॥

ऋगेव मन्त्रो, मन्त्रश्च वेद इत्यभिधानतः ।
वेदान्तवाक्यान्येतानि वेदा एव न संशयः ॥१५०॥

यच्च वाक्यं भवेदत्र ब्रह्मणः प्रतिपादकम् ।
तद् ब्राह्मणमिति ख्यातं वेदवाच्यमसंशयम् ॥१५१॥

तानि वेदान्तवाक्यानि ब्रह्मणः प्रतिपादनात् ।
ब्राह्मणानीति च ततस्तद्वेदत्वं न हीयते ॥१५२॥
मन्त्रब्राह्मणयोरेव वेदत्वं चास्ति विश्रुतम् ।
तन्मन्त्रब्राह्मणत्वं च वेदान्तेष्वस्ति सुस्थिरम् ॥१५३॥
तस्माद् वेदान्तवाक्यानां वेदत्वेन परिग्रहः ।
कर्तव्य एव विदुषेत्यवादीद् वल्लभः प्रभुः ॥१५४॥
निरुक्तेषु च वेदान्तवाक्येषु ब्रह्मणः स्फुटम् ।
कर्तृत्वमुच्यते तस्माद् ब्रह्म कर्त्रिति निश्चितम् ॥१५५॥
तदेवं शास्त्रयोनित्वादिति यच्छ्रूयते पदम् ।
तज्जगत्कर्तृतामेव ब्रह्मणोऽभिव्यनक्ति नः ॥१५६॥

(इति श्रीमद्वल्लभमतानुवादः ॥)

(अथ श्रीमद्रामानुजाचार्यमतानुवादः ॥)

तदेवं वल्लभाचार्यमतमालोच्य संग्रहात् ।
श्रीमद्रामानुजाचार्यमतमालोच्यतेऽञ्जसा ॥१५७॥
जन्मादीति समासस्य विग्रहे शङ्करोदितम् ।
मतमेवान्वमन्यन्त श्रीरामानुजसूरयः ॥१५८॥
सृष्टिस्थितिविनाशानां समाहारस्य वाचकः ।
बहुव्रीहिरयं 'जन्म यस्यादिरि'ति विग्रहात् ॥१५९॥
जगदेतच्च निखिलं सक्षेत्रज्ञं चराचरम् ।
अस्येत्येतत्पदस्थेन सर्वनाम्नेदमोच्यते ॥१६०॥

जन्मादयो विकाराश्च यद्यप्यस्यैव सम्मताः ।
तथापि तदनित्यत्वं नाभिनन्दन्त्यमी बुधाः ॥१६१॥

स्वयमेव प्रवर्तन्ते विकारास्तत्र कारणम् ।
सनिमित्तमुपादानं द्विविधं तेऽपि मन्वते ॥१६२॥

किं निमित्तमुपादानं किञ्चेति स्पष्टभाषणे ।
तेऽपि व्यग्रास्तयोर्भेदे विवेकं दूरतोऽत्यजन् ॥१६३॥

यन्निमित्तं तदेवास्य जगतो बृहतः सतः ।
उपादानमिति प्राहुरैक्यं कारणयोः सतोः ॥१६४॥

तदेवं कार्यरूपस्य जगतो विविधाः क्रियाः ।
लक्षयन्ति विकाराश्च कारणं ब्रह्म शाश्वतम् ॥१६५॥

तद् ब्रह्म कारणं नित्यमस्योपादानमुच्यते ।
तदेवास्य निमित्तं च न भेदः कोऽप्यथैनयोः ॥१६६॥

यतःपदे प्रवृत्ता या पञ्चमी श्रूयते परा ।
केवलं कारणत्वस्य द्योतिका साऽत्र वर्तते ॥१६७॥

तच्च प्राधान्यतो लोके कारणं द्विविधं मतम् ।
उपादानं निमित्तं चेत्यस्ति प्रागेव भाषितम् ॥१६८॥

तदेतत्कारणद्वन्द्वं यतःशब्देन सूच्यते ।
तसिलन्तेन, नैवात्र वैशिष्ट्यं किञ्चिदिष्यते ॥१६९॥

एतेन वल्लभः श्रीमान् यां जगत्कर्तृतामत्रक् ।
न तामिच्छन्ति धीमन्तः श्रीमद्रामानुजा इह ॥१७०॥

'जन्माद्यस्य यतः' – सूत्रं यदिदं व्यासनिर्मितम् ।
तदेतद् भृगुवल्लीस्थ – वचनस्य निदर्शकम् ॥१७१॥

भृगुवल्लीस्थवाक्यस्य विचारेणैव जायते ।
स्वयं सूत्रमिदं साधु व्याख्यातं च विचारितम् ॥१७२॥

यतो येन यदित्येवं त्रिभिरेभिर्विशेषणैः ।
विशिष्यते यदेवात्र तद् ब्रह्मेत्यत्र लक्षितम् ॥१७३॥

ब्रह्मणः कारणत्वस्य वाक्यमेतन्निबोधकम् ।
जगज्जन्मस्थितिलया लक्षकाश्च विशेषतः ॥१७४॥

तैरेव लक्ष्यते ब्रह्म जगज्जन्मादिभिः परम् ।
सत्यज्ञानानन्तरूपमेतैरेवोपलक्ष्यते ॥१७५॥

सत्यज्ञानानन्तरूपं यद् ब्रह्म प्राङ् निरूपितम् ।
तैत्तिरीये तदेवात्र लक्षितं चोपलक्षितम् ॥१७६॥

तदेव ब्रह्म, भूतानामुपादानमिहेष्यते ।
निमित्तं च तदेवैषां जगदाख्यावतां मतम् ॥१७७॥

निरुपाधिकसत्ताया योगात् सत्यमिदं स्मृतम् ।
नित्यासंकुचितज्ञानाऽऽकारत्वाज्ज्ञानमीरितम् ॥१७८॥

देशः कालोऽथवा वस्तु, तन्न क्वापि कदाचन ।
यतः परिच्छिनत्त्येतदतोऽनन्तमपीर्यते ॥१७९॥

सत्यज्ञानाऽनन्तरूपं तदेवं ब्रह्म शाश्वतम् ।
निमित्तं चाप्युपादानं जगतो जायते स्वयम् ॥१८०॥

(अथ श्रीमद्रामानुजमते कश्चिद् विशेषः)

विकारास्पदमेतद् यज्जगद् दृश्यमचेतनम् ।
तदस्माद् ब्रह्मणो भिन्नं भिन्नास्तस्माच्च चेतनाः ॥१८१॥

जगतश्चेतनेभ्यश्च ब्रह्मव्यावृत्तिहेतवे ।
विशेषणान्युपात्तानीत्येष रामानुजाशयः ॥१८२॥

जडादस्माच्च जगतो जीवेभ्यश्च विलक्षणम् ।
ब्रह्मैतेषामुपादानं निमित्तं चेति तन्मतम् ॥१८३॥

भृगुवल्ल्यां तथा सूत्रे श्रूयते यद् 'यतः' पदम् ।
तदेकत्वमिहाख्याति जगत्कारणयोस्तयोः ॥ ॥१८४॥

वस्तुतस्तु न सन्तोषश्चेतसस्तेन जायते ।
भाष्येण भगवद्रामानुजप्रोक्तेन विस्तरात् ॥१८५॥

उपादानं निमित्तं च नाभिन्नं दृश्यते क्वचित् ।
तयोरभेदः श्रीमद्भिर्ग्राह्यते केवलाऽऽग्रहात् ॥१८६॥

घटोपादानभूतेयं मृद् भिन्नैवात्र दृश्यते ।
चक्रचीवरकर्त्रादिनिमित्तेभ्यो निरन्तरम् ॥१८७॥

भूतभौतिकपित्रादिमात्रोपादानकारणात्[1] ।
निमित्तान्याशयादीनि भिन्नान्येवात्र जीविनाम् ॥१८८॥

जन्माद्यस्येति सूत्रेऽपि स भेदः स्पष्टमीरितः ।
भिन्नाभ्यां सर्वनामभ्यां [2]यदा चैवेदमा पुनः ॥१८९॥

---

१. मात्रशब्दोऽत्र तन्मात्रपरः । २. "यदा = यच्छब्देन" ।

इदं च मन्यते सूत्रं श्रुतेर्यस्या निदर्शकम् ।
तत्रापि भेद उभयोः स्पष्ट एव विभाव्यते ॥१९०॥

कार्ये नित्यमनुस्यूतमुपादानमतो ध्रुवम् ।
उपादत्ते ह्युपादानं कार्योपादानतो जनः ॥१९१॥

स्पृशन् घटं स्पृशत्येव मृत्तिकां सकलो जनः ।
अनिच्छन् मृत्तिकास्पर्शं घटं स्प्रष्टुं [1]न चेश्वरः॥ १९२॥

अतः सर्वत्र वेदेषु यत्र कार्यं निरूप्यते ।
निरूपितमुपादानं तत्र वेद्यं सनातनम् ॥१९३॥

"इमानि", "भूतानि" – पदद्वन्द्वमेतच्छ्रुतौ श्रुतम् ।
भूतोपादानतत्त्वस्य [2]भिन्नत्वद्योतकं हि तत् ॥१९४॥

तस्माच्च भूतोपादानान्निमित्तं भिन्नमिष्यते ।
यत्तदादिपदैस्तच्च पार्थक्येन निरूपितम् ॥१९५॥

अव्यक्तमस्त्युपादानं जगत्तस्माच्च जायते ।
तदेव जगदन्यत्र व्यक्ता प्रकृतिरुच्यते ॥१९६॥

व्यक्ताऽव्यक्तस्वरूपायास्तस्याश्च प्रकृतेः परः ।
पुरुषोऽस्ति, निमित्तं यस्तत्प्रवृत्तौ प्रजायते ॥१९७॥

इदंभूतादिभिः शब्दैः श्रुतयः शतधा पुनः ।
व्यक्ताऽव्यक्तस्वरूपायाः प्रकृतेरेव बोधिकाः ॥१९८॥

---

१. "न सेश्वरः" इति पाठान्तरम् । सोऽचि लोपे० इति सुलोपे सन्धिः ।

२. "नित्यत्वद्योतकं हि तत्" इति पाठान्तरम् ।

सैवोपादानमेतस्य जगतश्च ततः परम् ।
यत्तदादिपदैर्भिन्नं निमित्तं बोधयन्ति ताः ॥१९९॥
तमिमं वैदिकं शुद्धं सिद्धान्तमनपायिनम् ।
कपिलो भगवान् व्यासः शेषश्चानुबभाषिरे ॥२००॥
इममेवाद्यसिद्धान्तं कृत्वा मनसि सुस्थिरम् ।
श्रीमद्रामानुजो ब्रह्मजगद्भेदमवेदयत् ॥२०१॥
अङ्गीकृत्यापि भेदं तम्, उपादाननिमित्तयोः ।
यदभेदमसौ मेने, विद्वद्भ्यस्तन्न रोचते ॥२०२॥
एवं रामानुजाचार्यमतमालोच्य सादरम् ।
शङ्कराचार्यचरणमतमालोचये क्रमात् ॥२०३॥

(इति श्रीमद्रामानुजमतम् ।)

(अथ श्रीमच्छङ्कराचार्यमतानुवादः ।)

यतःपदेऽत्र पञ्चम्याः श्रवणादेव केचन ।
जगत्कर्तृत्वमेतस्य ब्रह्मणः प्रत्यपीपदन् ॥२०४॥
श्रीमन्तो वल्लभाचार्या अप्येतन्मतगामिनः ।
तदलौकिककर्तृत्वं बलाद् ब्रह्मणि मेनिरे ॥२०५॥
एतदेवानुमानं च ईश्वरास्तित्वसाधने ।
प्रकल्पेतेति च प्राहुः स्वयं श्रीशङ्करा अपि ॥२०६॥

तथा हि—" एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वसाधनं मन्यन्त ईश्वरकारणिनः " इति शां. भा.)

परमेतेन सूत्रेण प्रस्तुते किन्नु साध्यते ।
वस्तुतो हीश्वरास्तित्वम्' – इति प्रश्नो यदोत्थितः ॥२०७॥

तदा ते तं नकारेण स्पष्टं प्रत्याचचक्षिरे ।
न चैतन्मेनिरे सूत्रमीश्वरास्तित्वसाधनम् ॥२०८॥

तथा हि–"तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं, किन्तर्हि, वेदान्तवाक्यप्रदर्शनार्थम्", इति शां. भा.

संसारिव्यतिरिक्तस्य कर्तृत्वेनेश्वरस्य ते ।
न सत्तामुररीकर्तुमुत्सहन्ते मनागपि ॥२०९॥

वेदान्तवाक्यकुसुमग्रथनार्थानि मेनिरे ।
व्यासप्रोक्तानि सूत्राणि नानुमानार्थकानि ते ॥२१०॥

उदाह्रियन्ते श्रुतयः पूर्वं सूत्रैः समासतः ।
ततस्तदविरोधेन विचार्यन्ते तदाशयाः ॥२११॥

प्रस्तुतेषु विचारेषु यच्च स्यात्तत्समर्थकम् ।
अनुमानं तदप्यत्र सादरं बहु मान्यते ॥२१२॥

ब्रह्म नाम पदार्थोऽसौ स्वतन्त्रः सन्नपि स्वयम् ।
इन्द्रियाविषयत्वेन नेन्द्रियैः परिगृह्यते ॥२१३॥

जगद्रूपं कार्यमात्रमिन्द्रियैरिह गृह्यते ।
किन्तु तत् केन सम्बद्धं निश्चेतुं तन्न शक्यते ॥२१४॥

भृगुवल्ली विशेषेण सम्बन्धस्यास्य बोधने ।
प्रवृत्ता भासमानाऽऽसीद् वेदव्यासहृदम्बरे ॥२१५॥

अतो हि भगवानत्र वेदव्यासो महामुनिः ।
जन्माद्यस्येति सूत्रेण भृगुवल्लीं [1]न्यरूपयत् ॥२१६॥

भृगुवल्ली च सम्बन्धं जगतो ब्रह्मणा सह ।
नियतं द्योतयत्यस्माद् भृगुवल्ली विचिन्त्यताम् ॥२१७॥

तदेवं भगवान् व्यासः सूत्रेणानेन केवलम् ।
लक्षयत्यमलज्ञानां भृगुवल्लीं विशेषतः ॥२१८॥

न समर्थमिदं सूत्रं स्वतन्त्रेश्वरकर्तृताम् ।
अनुमातुं स्वतन्त्रं सद् – इति श्रीशङ्कराशयः ॥२१९॥

तथा मनसि कृत्वाऽपि पदार्थस्य विनिर्णये ।
प्रवृत्तोऽतिसमासेन [2]सूत्रव्याख्यानकोविदः ॥२२०॥

जन्मस्थितिविनाशेषु यास्कोक्ताः सकलाः क्रियाः ।
अन्तर्भाव्य ततस्तेषां समाहारं विवक्षति ॥२२१॥

जन्मादिर्यस्य तस्यैव समाहारस्य वाचकम् ।
जन्मादीति पदं, यत्र बहुव्रीहिर्विराजते ॥२२२॥

(अस्य)

इदमा चेन्द्रियग्राह्यमनुमेयं तथा जगत् ।
व्याकृतं नामरूपाभ्यामुच्यते सचराचरम् ॥२२३॥

देशः कालो निमित्तं च क्रिया येषां फलं तथा ।
सर्वं व्यवस्थितं तेषामाश्रयस्तच्च दृश्यते ॥२२४॥

---

१. "अदर्शयत्" इति पाठान्तरम् । २. जन्मादीति शेषः

तद् विभाति च संयुक्तमनन्तैः कर्तृभोक्तृभिः ।
मनसाऽप्यचिन्त्यरचनारूपमेतद् विलक्षणम् ॥२२५॥

षष्ठ्या च जगतस्तस्य सम्बन्धो द्योत्यते सतः ।
जन्मादिनोक्तधर्मेण धर्मिणो नियतोऽव्ययः ॥२२६॥

(यतः)

तस्यास्य जगतः किञ्चित् कारणं नियतं भवेत् ।
तच्च स्यान्नित्यसत्ताकं तदेव ब्रह्म शाश्वतम् ॥२२७॥

तत्कारणत्वबोधाय यच्छब्दात् पञ्चमी परा ।
पञ्चम्यन्ताच्च तसिलः प्रवृत्तिः शास्त्रसम्मता ॥२२८॥

यतःपदमिदं तस्मात् सर्वशक्तेः स्वयंभुवः ।
सर्वज्ञस्य [1]जगत्कार्यकारणत्वाय कल्पते ॥२२९॥

कारणं द्विविधं किन्तु लोके नित्यं विलोकितम् ।
उपादानं निमित्तं च याभ्यां कार्यं प्रजायते ॥२३०॥

तदेतद् ब्रह्म सर्वज्ञं कारणं यदिहेष्यते ।
तत् कीदृगिति तु प्रश्नस्ततः प्रादुर्भवेत् स्वयम् ॥२३१॥

न केवलेन सूत्रेण सरला तन्निराकृतिः ।
तस्मादत्र विनिर्दिष्टा भृगुवल्ली विचार्यताम् ॥२३२॥

इत्याशयेन तात्पर्यं सूत्रस्यास्य स शङ्करः ।
पर्यवासाययत् स्पष्टं श्रुतिवाक्यप्रदर्शने ॥२३३॥

---

१. "जगत्कार्यकारणत्वं प्रवक्ति नः" । इति पाठान्तरम्

श्रुतिवाक्येन सर्वज्ञं यदि ब्रह्मेह सिध्यति ।
निमित्तमस्य जगतस्तदा ग्राह्या निमित्तता ॥२३४॥

यदि तु श्रुतिवाक्येन तदुपादानमुच्यते ।
तदोपादानता ग्राह्या ब्रह्मणोऽस्य सदा सतः ॥२३५॥

तदेवमुक्त्वा सूत्रेऽस्मिन् यतःशब्दार्थनिर्णये ।
जगत्कारणतामेव बभाषे केवलां गुरुः ॥२३६॥

न चैतत्सूत्रभाष्येऽपि क्वचिदूचे स कर्तृताम् ।
न वोपादानतां नापि ब्रह्मणोऽस्य निमित्तताम् ॥२३७॥

यतःपदैकगन्तव्यं कारणत्वं स केवलम् ।
सूत्रेऽस्मिन् गमयामासेत्यहो तस्य विशिष्टता ॥२३८॥

तथापि तदभिप्रायान् व्याकुर्वद्भिर्महात्मभिः ।
बहुभिः साधयाञ्चक्रे यतःशब्देन कर्तृता ॥२३९॥

(अत्र श्रीभामतीकारादयः)

'व्याकृतं' 'नामरूपाभ्याम्' – इति दृष्ट्वा पदद्वयम् ।
साध्यते [1]गुरुकल्पैस्तैर्जगच्चेतनकर्तृकम् ॥२४०॥

'व्याकृतं नामरूपाभ्यां दृष्टं चेतनकर्तृकम् ।
यथा घटादी'–ति धिया कर्तृत्वं साध्यते च तैः ॥२४१॥

वस्तुतस्तु महान् भेदः कृतौ च व्याकृतावपि ।
कृतिरुत्पादनार्थास्ति व्याख्यार्था व्याकृतिस्तथा ॥२४२॥

---

१. गुरुकल्पैः = श्रीमद् भामतीकारप्रभृतिभिः ।

[1]गुरुर्न क्वचिदत्राह नाम्ना रूपेण वा कृतम्
किन्तु व्याकृतमित्याह जगदेतद् विलक्षणम् ॥२४३॥

घटो हि क्रियते पूर्वं, कृतो व्याक्रियते पुनः ।
कुम्भकारोऽस्य कर्तैव, न व्याकर्ता कदाचन ॥२४४॥

व्याकर्तारस्त्वनेके स्युश्चिराज्जातस्य वस्तुनः ।
न तेन तेऽस्य कथ्यन्ते कर्तारः कुत्रचिद् भवे ॥२४५॥

व्याकरोत् पाणिनिः शब्दान्, न शब्दानुदपादयत् ।
व्याकरोति गुणान् राज्ञः कविर्नोत्पादयत्यमून् ॥२४६॥

शङ्करस्तु जगन्मेने व्याकृतं नामरूपतः ।
न पुनः कृतमित्युक्त्वा प्रोवाचेश्वरकर्तृकम् ॥२४७॥

तस्माद् व्याकृतशब्दस्य श्रवणादेव [2]सूरिभिः ।
साधितं कृतिजन्यत्वं जगतो, नैव रोचते ॥२४८॥

(अथ भृगुवल्ल्यनुवादः)

अथ या श्रुतिरेतेन व्याससूत्रेण गीयते ।
निर्दिश्यतेऽथ वाऽङ्गुल्या साऽप्यत्रालोच्यते क्रमात् ॥२४९॥

ब्रह्म ज्ञातुं प्रवृत्तोऽभूद् वरुणस्य सुतो भृगुः ।
उपसृत्य स्वपितरमप्राक्षीच्चास्य लक्षणम् ॥२५०॥

'यतो भूतानि जायन्ते, येन जीवन्ति, यन्ति यत् ।
यच्चाभिसंविशन्त्येतद्, ब्रह्मे–'ति प्रोक्तवान् पिता ॥२५१॥

---

१. गुरुः = आद्यः श्रीमच्छङ्कराचार्यः ।
२. सूरिभिः = श्रीमन्मिश्रचरणाद्यैः ।

"कस्माद् भूतानि जायन्ते, केन जीवन्ति, यन्ति कम् ।
किञ्चाभिसंविशन्ती"ति ज्ञातुं सोऽन्वाचरत्तपः ॥२५२॥

"अन्नाद् भूतानि जायन्ते, जीवन्त्यन्नेन, यन्ति च ।
अन्नमेव विशन्ती"ति – सोऽन्नं ब्रह्मेत्यबुध्यत ॥२५३॥

"अन्नं ब्रह्मे–"ति स प्राह पितरं स्वमुपागतः ।
"नाऽन्नं ब्रह्मे–"ति न प्राह पिताऽपि च परात्मवित् ॥२५४॥

अन्नमेतदतिस्थूलं ब्रह्मरूपमतः पिता ।
ततः सूक्ष्मस्य बोधाय तपश्चर्यां तमादिशत् ॥२५५॥

उग्रेण तपसा स्वेन प्राणं ब्रह्म विवेद सः ।
प्रोवाच पितरं चेत्य 'प्राणो ब्रह्मे'–ति बुद्धिमान् ॥२५६॥

"न प्राणो ब्रह्म विज्ञातः", इति नोवाच वित्तमः ।
यतो ह्यन्नमधिष्ठाय ब्रह्मरूपं स राजते ॥२५७॥

किन्त्वतोऽपि परं सूक्ष्मं ब्रह्मरूपं तदाश्रितम् ।
ज्ञेयमित्यादिशत्तातः पुनस्तप्तुं तपः सुतम् ॥२५८॥

तपस्तप्त्वा ततोऽप्युग्रं मनोरूपमबुध्यत ।
"मनो ब्रह्मे"–ति चोपेत्य पितरं स्वमवोचत ॥२५९॥

"न मनो ब्रह्म विज्ञातम्" इति नैवावदत् पिता ।
यतः प्राणाश्रितं ब्रह्म–सूक्ष्मरूपं मनो मतम् ॥२६०॥

अतः सूक्ष्मतरं ज्ञेयं ब्रह्मरूपं मनःस्थितम् ।
इति कृत्वा स तपसा ज्ञातुं तं पुनरन्वशात् ॥२६१॥

सोऽप्यनिर्विण्णहृदयस्तपस्तप्त्वा सुदुश्चरम् ।
विज्ञानं ब्रह्मणो रूपं व्यजानान्मनसः परम् ॥२६२॥

"विज्ञानं ब्रह्म भगवन्"—इत्युक्तो भृगुणा पिता ।
न तस्य ब्रह्मरूपत्वं प्रत्याख्यातुमकल्पत ॥२६३॥

किन्तु यच्चरमं रूपं ब्रह्मणः श्रुतिसम्मतम् ।
तदत्युग्रतपोयोगाद् विज्ञातुं प्रैरिरत् पुनः ॥२६४॥

तपश्चचार विपुलं वारुणिर्विमलाशयः ।
विज्ञानाच्च परं रूपमानन्दमनुभूतवान् ॥२६५॥

आनन्दस्याश्रयो ज्ञानं विज्ञानस्याश्रयो मनः ।
मनसश्चाश्रयः प्राणा अन्नं प्राणाश्रयस्ततः ॥२६६॥

अन्नस्य चरमावस्थामानन्दमधिगत्य सः ।
आनन्दमेव परमं व्यजानाद् ब्रह्म वारुणिः ॥२६७॥

अन्ननिष्कर्षभूतोऽयमानन्दो यावदान्तरः ।
नोदेति, नव जनने मतिस्तावत् प्रजायते ॥२६८॥

आनन्दादेव भूतानां जननं जीवनं तथा ।
प्रायणं चाभिसंवेशं स ददर्श स्वया दृशा ॥२६९॥

अतः स पुनरभ्येत्य पितरं पारदर्शिनम् ।
"आनन्द एव परमं ब्रह्मे"-ति प्राह तापसः ॥२७०॥

ज्ञातसारं ततो मत्वा तनयं भृगुमात्मनः ।
न पुनस्तपसे प्राज्ञो वरुणस्तं न्ययूयुजत् ॥२७१॥

एवमानन्दचरमान् परिणामान् प्रयत्नतः ।
अन्नस्य ग्राहयामास वरुणस्तनयं भृगुम् ॥२७२॥

अत एवानुवाकस्य [1]षष्ठस्यान्ते पुनः श्रुतिः ।
अन्नमेवाभितुष्टाव नैवानन्दं न चापरम् ॥२७३॥

तथा हि—" अहमन्नमहमन्नमहमन्नम् " इत्यादि ।

द्वाभ्यामिदं जगज्जातमन्नाद् अन्नादिनस्तथा ।
तस्मादन्नादमन्नं च स्तुवीते सततं श्रुतिः ॥२७४॥

यदा प्राणो भवेदन्नं देहोऽन्नादस्तदा मतः ।
आपो यदाऽन्नमन्नादं तदा ज्योतिः समीरितम् ॥२७५॥

यदाऽन्नं पृथिवी प्रोक्ता तदाऽऽकाशो दुरत्ययः ।
स्तूयतेऽन्नादरूपेण भृगुवल्ल्या विशेषतः ॥२७६॥

यदि त्वाकाशमारभ्य यदानन्दान्तकं जगत् ।
तदेवान्नं, तदाऽऽन्नादमव्यक्तं ब्रह्म गीयताम् ॥२७७॥

यदि त्वव्यक्तरूपेऽपि ब्रह्मण्येवान्नरूपता ।
समीहिता, तदाऽऽन्नादः पुरुषोऽस्तु परात्परः ॥२७८॥

अन्नाद् अन्नादिनस्तस्माज्जगदेतच्चराचरम् ।
द्वाभ्यां जातमतो हेतू द्वावुच्येते यतःपदात् ॥२७९॥

किञ्च ब्रह्मानन्दवल्ली ब्रह्मरूपनिरूपणे ।
अन्नप्राणमनोज्ञानानन्दमेवाधिकं स्तुते ॥२८०॥

---

१. षष्ठस्यान्ते = सप्तमादिष्वनुवाकेषु ।

"ब्रह्मविदाप्नोति परम्" – इति वाक्यं तदादिमम् ।
येन द्विविधता स्पष्टा तत्त्वयोरवगम्यते ॥२८१॥

एकं ब्रह्मपदेनात्र वेद्यं तत्त्वमुदीर्यते ।
द्वितीयं परशब्देन प्राप्यमाणं प्रतीयते ॥२८२॥

यः पुमान् प्रथमं वेत्ति ब्रह्मतत्त्वं स्वरूपतः ।
स एव ब्रह्मवित् तत्त्वं परवाच्यमवाप्नुयात् ॥२८३॥

वृक्षाग्रशाखया यद्वद् ध्रुवतारा निदर्श्यते
यथा च्छत्रेण दृष्टेन लक्ष्यन्ते च्छत्रिणो जनाः ॥२८४॥

यथा च वाच्येनार्थेन लक्ष्यार्थो लक्ष्यते क्रमात् ।
ज्ञातेन ब्रह्मणा तद्वत् परार्थः प्राप्यते क्रमात् ॥२८५॥

एवमन्यस्य विज्ञानाद् अन्यप्राप्तिर्न बाध्यते ।
तेनाऽऽप्नोतिपदस्यात्र मुख्यार्थो नास्ति बाधितः ॥२८६॥

सत्यज्ञानानन्तरूपं ब्रह्मतत्त्वं प्रगीयते ।
परं तत्त्वं गुहा नाम परमव्योमसंज्ञितम् ॥२८७॥

तत्रास्मिन् परमे व्योम्नि गुहानाम्नि व्यवस्थितम् ।
निहितं नितरामस्ति ब्रह्मोपादानमव्ययम् ॥२८८॥

सत्यज्ञानानन्तरूपं यद् ब्रह्मेह समीरितम् ।
स एवात्मा, ततश्चैते भवन्ति महदादयः ॥२८९॥

सत्त्वाश्रयत्वात् तत् सत्यं, ज्ञानं ज्ञानाश्रयत्वतः ।
अच्छेद्यत्वादभेद्यत्वात् – तदनन्तमुदीरितम् ॥२९०॥

(अत्र दर्शनान्तरसमन्वयः)

सांख्यास्तदाहुः प्रकृतिं परमां त्रिगुणात्मिकाम् ।
सदव्यक्तप्रधानादि – संज्ञाभिस्तत् स्तुवन्ति च ॥२९१॥

तदेव दृश्यशब्देन भगवान् स पतञ्जलिः ।
योगशास्त्रेऽभितुष्टाव सत्यं ब्रह्म सनातनम् ॥२९२॥

तदेव भावशब्देन गीयते गौतमादिभिः ।
अजीवजडसंज्ञाभिः केचित्तदवमन्वते ॥२९३॥

एतद्–ब्रह्माङ्कमध्यस्थो महाकाशः प्रकाशवान् ।
तदङ्कस्थो महावायुस्तदङ्कस्थश्च पावकः ॥२९४॥

पावकाङ्कस्थिता आपो ह्यपामङ्कस्थिता मही ।
मह्यङ्कस्थाश्च विविधा ओषध्योऽन्नं तदङ्कगम् ॥२९५॥

मह्योषध्याश्रिते चास्मिन्नन्ने रेतः प्रतिष्ठितम् ।
पुरुषश्च महाप्राज्ञो रेतस्यस्मिन् प्रतिष्ठितः ॥२९६॥

स एष पुरुषो जातस्ततोऽन्नरसपिण्डितः ।
तस्मादन्नाश्रिताः सर्वे प्राणिनः पृथिवीचराः ॥२९७॥

आनन्दमूलं विज्ञानं मूलं ज्ञानस्य नो मनः ।
मनोमूलं स्मृतः प्राणः प्राणश्चैवान्नमूलकः ॥२९८॥

तस्मादत्र महादेवी श्रुतिः सत्यार्थशंसिनी ।
प्रजानां जनने मूलमन्नं कारणमभ्यधात् ॥२९९॥

"अन्नात् प्रजाः प्रजायन्ते याः काश्च पृथिवीं श्रिताः ।
अथो अन्नेन जीवन्ति – अन्नमेवापियन्ति च ॥३००॥

ज्येष्ठमन्नं हि भूतानां तत्सर्वौषधमुच्यते ।
अन्नं ब्रह्मोपासते ये तेऽन्नं ब्रह्माप्नुवन्ति च ॥३०१॥

अन्नाद् भूतानि जायन्ते वर्धन्तेऽन्नेन तानि च ।
अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते" ॥३०२॥

तदेवमन्नमहिमा गीयतेऽत्र निरन्तरम् ।
तदन्नरसभूयिष्ठे प्राणात्माऽस्ति प्रतिष्ठितः ॥३०३॥

एष प्राणमयो ह्यात्मा योऽत्राऽन्यः परिचाय्यते ।
स चान्नरसपिण्डं तमाश्रित्यैवावतिष्ठते ॥३०४॥

"अन्तरे"–पदमत्यर्थं प्रयुज्य श्रीमती श्रुतिः ।
प्राणस्याऽन्नरसेनाऽस्य विना भावं निषेधति ॥३०५॥

प्राणन्ति प्राणमेवानु [1]पशवो देवमानवाः ।
आयुः प्राणो हि भूतानां तस्मात् सर्वायुषं स्मृतः ॥३०६॥

ये प्राणं ब्रह्मरूपेण योगिनः पर्युपासते ।
ते सर्वं सुखरूपेण भुञ्जते पुरुषायुषम् ॥३०७॥

---

१ "समस्ता हि जनुर्जुषः" इति श्रीमद्भारतीकृष्णतीर्थ शङ्कराचार्याणामभिप्रेतः पाठः ।

एषोऽन्नरसपिण्डस्य ह्यात्मा शारीर उच्यते ।
तस्मिन् विनष्टे [1]देहोऽयं मृत इत्यभिधीयते ॥३०८॥

नैतस्य प्राणपिण्डस्य मिथ्यात्मत्वेन कुत्रचित् ।
परिकल्पिततां प्राह श्रुतिः श्रीशङ्करो यथा ॥३०९॥

इमं प्राणमधिष्ठाय ह्यात्माऽत्रान्यो मनोमयः ।
प्रवर्तते यतश्चैषामिन्द्रियाणां प्रवृत्तयः ॥३१०॥

प्राणानामयमात्मेति प्रोच्यते पारदृश्वभिः ।
नैतस्य महिमा किन्तु प्रस्तुतेऽतिप्रतन्यते ॥३११॥

अन्तरे पुनरेतस्य मनसोऽन्यः प्रगीयते ।
आत्मा तदाश्रितो नाम्ना यो विज्ञानमयः स्मृतः ॥३१२॥

विज्ञानादेव कर्माणि यज्ञाश्च विविधास्ततः ।
ज्येष्ठं ब्रह्मेति विज्ञानं सर्वे देवा उपासते ॥३१३॥

विज्ञानं ब्रह्म जानानस्तस्माद् यो न प्रमाद्यति ।
स हित्वा पाप्मनः सर्वान्, सर्वान् कामान् समश्नुते ॥३१४॥

तद्विज्ञानमयादन्यो ह्यन्तरे कोऽप्यनुत्तमः ।
आनन्दमय आत्माऽस्ति यो विज्ञाने प्रतिष्ठितः ॥३१५॥

प्रीतिर्मोदः प्रमोदश्च तदीयाङ्गतया स्थिताः ।
ब्रह्मैव मूलमेतस्य यत् पुच्छमिति कीर्तितत् ॥३१६॥

ब्रह्मणः परिणामोऽयं तदेवं श्रुतिसम्मतः ।
आकाश आद्यश्चरमस्तथाऽऽनन्दः परात्परः ॥३१७॥

---

१. "पिण्डोऽयम्" इति पाठान्तरम् ।

निरूपयन्ती रूपाणि तदेवं ब्रह्मणः श्रुतिः ।
वर्गद्वितयरूपेण ब्रह्माभिव्यक्तिमाह नः ॥३१८॥

(अत्र साङ्ख्यसिद्धान्तसमन्वयः ।)

आकाशात् पृथिवीं यावद् एको वर्गः प्रकल्प्यते ।
अन्नादानन्दपर्यन्तो द्वितीयश्चात्र कल्प्यते ॥३१९॥

आकाशात् पृथिवीं यावत् कल्पितं वर्गमादिमम् ।
महदित्याख्यया सांख्याः ख्यापयन्ति मनीषिणः ॥३२०॥

अन्नादानन्दपर्यन्ते वर्गे चास्मिन् द्वितीयके ।
तत्त्वद्वाविंशतेः स्वस्या अन्तर्भावं प्रचक्षते ॥३२१॥

आकाशादथ वाऽऽरब्धः आनन्दे योऽवसायितः ।
स एकः सकलो वर्गो ज्ञातव्यो व्यक्तसंज्ञया ॥३२२॥

अयमेवाखिलो वर्गः सांख्ये व्यक्ताह्वया स्तुतः ।
ब्रह्माण्डपिण्डभुवनजगन्नामभिरीर्यते ॥३२३॥

मूलमेतस्य जगतो व्यक्तनाम्नो यदिष्यते ।
तदेतद् ब्रह्म, यत् सत्य–ज्ञानानन्तमिहोच्यते ॥३२४॥

मूलस्य ब्रह्मरूपत्वाद् व्यक्तस्य ब्रह्मरूपता ।
मूलस्य चात्मरूपत्वाद् व्यक्तस्याप्यात्मरूपता ॥३२५॥

(अथाविद्याया अकारणत्वम्)

न क्वचिच्छ्रुतिवाक्येऽस्मिन् निरुक्तं कोशपञ्चकम् ।
अविद्यायाः समुत्पन्नं कृतं वेत्यभिधीयते ॥३२६॥

अन्नादीनां समुद्भूतिराकाशादिभ्य ईरिता ।
आकाशादेश्च सम्भूतिर्ब्रह्मणोऽत्र स्फुटेरिता ॥३२७॥

तस्मादारब्धमाकाशादानन्दे चावसायितम् ।
व्यक्तं ब्रह्मोद्भवं वेद्यं नैवाऽविद्याकृतं क्वचित् ॥३२८॥

(ब्रह्मण एवोपादानत्वम्)

अतः कुत्रचिदाकाशशरीरं ब्रह्म कीर्तितम् ।
क्वचिच्च वायुरेवोक्तः प्रत्यक्षं ब्रह्म शाश्वतम् ॥३२९॥

क्वचिदग्निः क्वचिच्चापः क्वचिद् भूमिः क्वचिन्मनः ।
आत्मब्रह्मादिभिः शब्दैः स्तूयन्तेऽत्र निरङ्कुशम् ॥३३०॥

अन्नस्य ब्रह्मरूपत्वं प्राणानां ब्रह्मरूपता ।
ज्ञानस्य समनस्कस्य ब्रह्मत्वे ज्येष्ठता पुनः ॥३३१॥

आनन्दस्यापि च तथा ब्रह्मणः परिणामता ।
स्पष्टमूचे निजैः शब्दैर्भगवत्या स्थले स्थले ॥३३२॥

क्वचिदन्नमयो ह्यात्मा क्वचित् प्राणमयः स्मृतः ।
क्वचिन्मनोमयः प्रोक्तः स विज्ञानमयः क्वचित् ॥३३३॥

स आनन्दमयोऽप्युक्तो यतो ह्यात्मा स्थले स्थले ।
तेनाप्येषामुपादानं ज्ञेयं ब्रह्मात्मसंज्ञितम् ॥३३४॥

यद्येतेषामुपादानं न स्याद् ब्रह्मात्मसंज्ञितम् ।
न श्रुतिस्तद्विकारेषु तास्ताः संज्ञाः प्रयोजयेत् ॥३३५॥

मृदुपादानकः कुम्भो मृत्तिकामय उच्यते ।
स्वर्णोपादानिका भूषा स्वर्णमय्यभिधीयते ॥३३६॥

ब्रह्मोपादानकं व्यक्तमिह ब्रह्ममयं स्मृतम् ।
तस्मादेषामुपादानं व्यक्तानां ब्रह्म निश्चितम् ॥३३७॥

आऽऽकाशाद् आ तथाऽऽनन्दाद्, यद् व्यक्तं जगदीरितम् ।
यदुपादानमेतस्य तद् ब्रह्माऽऽत्मा स एव च ॥३३८॥

तत् प्रधानं तदव्यक्तं सा मूलप्रकृतिः परा ।
स एव भावस्तद् दृश्यं त एव परमाणवः ॥३३९॥

यद्यप्याचार्यवर्योऽसावाकाशादिकमुद्गतम् ।
आनन्दान्तं जगत् सर्वमविद्याकृतमुक्तवान् ॥३४०॥

तथाप्येतस्य जगतो नित्याविकृतलक्षणम् ।
सत्यज्ञानानन्तरूपं ब्रह्म कारणमुक्तवान् ॥३४१॥

ब्रह्मणः कारणत्वोक्ताववविद्याकृततावचः ।
न प्रमाणतया भाति विरोधात् प्रस्तुतश्रुतेः ॥३४२॥

किञ्चासौ ब्रह्मणः सत्तास्थापनाय स्वयं गुरुः ।
आकाशादेः समस्तस्य संघातस्याह कार्यताम् ॥३४३॥

कार्यभूतस्य सङ्घस्य सत्त्वे सिद्धे स्वभावतः ।
ब्रह्मणः कारणस्यापि सत्त्वं सिध्यत्यबाधितम् ॥३४४॥

ब्रह्मणोऽस्तित्वसिद्ध्यर्थं कार्यास्तित्वमिहाश्रितम् ।
कार्यस्यास्तित्वयोगाच्च ब्रह्मास्तित्वं प्रसाधितम् ॥३४५॥

अविद्या त्वसती, तस्याः कार्यं सन्नैव सम्भवेत् ।
सत्कार्यजननार्थं तु कारणं सदपेक्ष्यते ॥३४६॥

तत्सत्यं कारणं सूक्ष्मं यथा सांख्ये प्रसाधितम् ।
तथैवात्रैतया श्रुत्या, शङ्करेण च साध्यते ॥३४७॥

तस्मादविद्याकृतता ख्यापिता जगतः सतः ।
निर्मूलैवाधिगन्तव्या क्वचिदुक्ताऽप्यनीहया ॥३४८॥

(इत्यविद्यायाः कारणत्वनिरासः ।)

(अथ परतत्त्वस्य निमित्तत्वेन निरूपणम् ।)

प्रधानाऽव्यक्तसंज्ञस्य तदेवं ब्रह्मणः सतः ।
उपादानत्वमुक्त्वाऽपि श्रुतिरत्र न शाम्यति ॥३४९॥

उपादानात् पृथग्भूतं निमित्तं किञ्चिदव्ययम् ।
बोधयत्यत्रभवती प्रयुक्तैस्तैर्विशेषणैः ॥३५०॥

यदाप्यते ब्रह्मविदा निमित्तं तत्परं स्मृतम् ।
सा गुहा, तदधिष्ठानं परमव्योमसंज्ञितम् ॥३५१॥

सद्भिन्नत्वादसद्वाच्यं तन्निमित्तं निरूप्यते ।
भिन्नं च तदुपादानाद् द्योतते ब्रह्मणः सतः ॥३५२॥

"असन्नेव भवत्येष ह्यसद् ब्रह्मेति वेद चेत् ।
अस्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदुः" ॥३५३॥

इत्यस्माज्ज्ञायते वाक्याद् भेदः सदसतोर्द्वयोः ।
सदत्र प्रोच्यते ब्रह्म परं तत्त्वमसत्तथा ॥३५४॥

"असद्वा इदमग्रे", भोः, "आसीद्" इति महाश्रुतिः ।
असदाख्यस्य तत्त्वस्य न सत्तां प्रतिषेधति ॥३५५॥

किन्तु तस्य निमित्तत्वं, "ततो वै सदजायत" ।
इत्येतद्वाक्यघटकाद् अभिधत्ते ततःपदात् ॥३५६॥

क्रियाश्रयमुपादानं सत्यं ब्रह्मेह कीर्त्यते ।
क्रियैव सुकृतं चास्य स एव रस ईर्यते ॥३५७॥

रस एवायमानन्दो ब्रह्माऽऽनन्दमयं ततः ।
तदधिष्ठानमानन्दी रसवानुच्यते क्रमात् ॥३५८॥

स एव परमाकाशो यत्राऽऽनन्दः प्रकाशते ।
अदृश्यः स तथाऽनात्म्योऽनिलयो न निरुच्यते ॥३५९॥

अधिष्ठानतयैवैष केवलो रसवान् स्मृतः ।
स आनन्दी सतो भिन्नः परमाकाशसंज्ञितः ॥३६०॥

तमिमं परमाकाशं परं ब्रह्मेति केचन ।
परमात्मेति चाख्यान्ति केचित्तं पुरुषं परम् ॥३६१॥

त्रिपादमृतरूपोऽयं वेदेष्वपि च गीयते ।
स एवाऽऽसु प्रजास्वोतः प्रोतो विभुरुदीर्यते ॥३६२॥

अस्माद् भीता [1]इवाभान्ति पवमानाः प्रकल्पनाः ।
अस्माद् भीता इवोद्यन्ति भग्रहा भास्करादयः ॥३६३॥

अग्निरिन्द्रस्तथा मृत्युरितराश्चापि देवताः ।
किञ्च भीता इवैवाऽस्मात् प्रवर्तन्ते शुचिव्रताः ॥३६४॥

केचित्तं परमाकाशं ब्रुवते ब्रह्म निर्गुणम् ।
द्रष्टारं दृशिमात्रं तं शुद्धं प्राह पतञ्जलिः ॥३६५॥

---

१. "इवाऽऽवान्ति" इति पाठान्तरम् ।

स एव प्रकृतेर्भिन्नः पुरुषः साङ्ख्यसम्मतः ।
स एव भिन्नो भावेभ्यः प्रोच्यतेऽभावनामतः ॥३६६॥

तं शून्यवज्रमद्वैतं सौगताः पर्युपासते ।
स एवाऽजीवमध्यस्थ आकाशः कैश्चिदुच्यते ॥३६७॥

उपेक्षितोऽपि चार्वाकैर्निर्गुणत्वादसत्त्वतः ।
स एवाक्षर आकाशः परमो गीयते श्रुतौ ॥३६८॥

(अत्र गुहापदार्थनिरूपणम् ।)

गुहा च परमव्योम तमेवाकाशमाहतुः ।
तथापि मतभेदोऽस्ति तयोरर्थविनिर्णये ॥३६९॥

हृदयस्थ इहाकाशे या बुद्धिः सा गुहा परा ।
तत्रैव निहितं ब्रह्मेत्याहुरेके विचक्षणाः ॥३७०॥

परमेतन्मतं युक्तं प्रकृते नैव राजते ।
यतो बुद्धिश्च हृदयं जायते च विनश्यति ॥३७१॥

अन्नप्राणमये देहे हार्दाऽऽकाशः प्रजायते ।
अन्नप्राणमयश्चात्मा भूतसंघात् प्रजायते ॥३७२॥

सम्भवो भूतसंघस्य ब्रह्मरूपाच्च कारणात् ।
तद् ब्रह्म कारणं चास्यां गुहायां निहितं स्मृतम् ॥३७३॥

तस्मादिह गुहा नाम या परं व्योम कीर्त्तिता ।
न सा हृदयमध्यस्थां गुहां बुद्धिं प्रभाषते ॥३७४॥

चिरादुन्मिषिता बुद्धिः क्षिप्रं लयमुपेयुषी ।
कथं भवेदधिष्ठानं कारणब्रह्मणः सतः ॥३७५॥

तस्मादत्र गुहाशब्दो निर्गुणाधारवाचकः ।
तमधिष्ठानमाख्यान्ति सांख्याश्च पुरुषं परम् ॥३७६॥

(अथ श्रुत्युपसंहारः)

एवं भगवती भेदाद् – आश्रयाश्रितयोः सतोः ।
द्विविधं कारणं प्रोचे व्यक्तस्य जगतः सतः ॥३७७॥

एकं ब्रह्म प्रधानाख्यमुपादानं तयेरितम् ।
द्वितीयं पुरुषाख्यं च यन्निमित्तं परात्परम् ॥३७८॥

जन्माद्यस्येतिसूत्रस्थं श्रूयमाणं यतःपदम् ।
न तयोरुभयोर्भेदबोधनाय क्षमं भवेत्' ॥३७९॥

इति मत्वेव, मन्येऽहम्, आचार्यः शङ्करो गुरुः ।
तैत्तिरीयोपनिषदो दर्शकं तदमन्यत ॥३८०॥

(पूर्वः पक्षः)

यद्यपीह यतो – येन – यदित्यादिः पदावली ।
प्रायेणैकत्वसंख्याया द्योतिकैवावलोक्यते ॥३८१॥

अन्नादन्नेन चानन्दाद् आनन्देनेति यद्यपि ।
पदेष्वेकत्वसंख्यैव स्फुटमेतेषु दृश्यते ॥३८२॥

तेनोपादानरूपस्य ब्रह्मणः प्रतिपादने ।
केवलस्य प्रवृत्तेयं श्रुतिरित्यवभासते ॥३८३॥

तस्यैकस्यैव बोधाय पर्याप्तेऽत्र यतःपदे ।
श्रुतिदर्शनतात्पर्यभाषि भाष्यं निरर्थकम् ॥३८४॥

(उत्तरः पक्षः)

इतिचेन्न तथा वाच्यं, श्रुतिर्नैकार्थबोधिनी ।
सा तु द्वितयमेवात्र कारणं प्राह संहतम् ॥३८५॥

उपादानात् पृथग्भूतं निमित्तं नास्त्युपेक्षितम् ।
यतो हि ब्रह्मविज्ञानात परप्राप्तिरुदीर्यते ॥३८६॥

तददृश्यमसत्तच्च तद् व्योम परमं स्मृतम् ।
तच्चानिलयनं तच्चानिरुक्तं तदनात्मकम् ॥३८७॥

तस्मात्तदुभयोरत्र बोधायैव महाश्रुतिः ।
प्रवृत्तेति न तज्ज्ञानं सूत्रेणैतेन कल्पते ॥३८८॥

तस्मादेतस्य सूत्रस्य श्रुतिदर्शकमात्रता ।
यदवाचि, न सा मिथ्या मनाङ् मह्यं तु भासते ॥३८९॥

(मन्मतम्)

याभ्यामिति पदादेव यदीह तसिलिष्यते ।
तदा तु कारणद्वन्द्वलक्षकं स्याद् यतःपदम् ॥३९०॥

आद्यसूत्रस्थितो ब्रह्मशब्दोऽप्यत्राऽस्तु वाचकः ।
द्वयोः कारणयोरेवमुपादाननिमित्तयोः ॥३९१॥

परत्वेनापरत्वेन ब्रह्मता तिष्ठतु द्वयोः
निमित्ते परता ब्रह्मण्युपादाने तदन्यता ॥३९२॥

सगुणं स्यादुपादानं, निमित्तं ब्रह्म निर्गुणम् ।
द्योतकत्वं द्वयोरत्र केवलेऽस्तु यतःपदे ॥३९३॥

(इति परतत्त्वस्य निमित्तत्वेन निरूपणम् ।)

आकाशादा तथाऽऽनन्दाद् यच्चाभिव्यज्यते जगत् ।
तत्सर्वमिदमा ग्राह्यं षष्ठ्यन्तेन मनीषिणा ॥३९४॥

अव्यक्तेर्व्यक्तापत्तिर्वस्तुनो जन्म कीर्तितम् ।
पुनरव्यक्तापत्तिस्तिरोभावः प्रकीर्तितः ॥३९५॥

आभिव्यक्तेस्तिरोभावादा च यत्किञ्चिदीक्ष्यते ।
तदेतत् सकलं ब्रह्म व्यक्तं जगदुदीर्यते ॥३९६॥

"अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः" ।
इति यद् भगवद्गीतावाक्यं तदितराशयम् ॥३९७॥

निर्गुणस्य निमित्तस्य स्वरूपज्ञापनाय तत् ।
प्रयुक्तमिति विज्ञेयं यदुपादानतः पृथक् ॥३९८॥

निमित्तं निर्गुणं शून्यमधिष्ठाय गुणान्वितम् ।
अव्यक्तं व्यक्ततामेत्य ब्रह्मेदं कीर्त्यते जगत् ॥३९९॥

न ब्रह्म जगतो भिन्नं न भिन्नं ब्रह्मणो जगत् ।
स्वयं भूत्वा स्वयं स्थित्वा स्वयं स्वस्मिन् प्रलीयते ॥४००॥

अभिव्यक्तेः परं स्वीयगुणधर्मानुसारतः ।
नामानि व्यक्तमाधत्ते व्यवहारे पृथक् पृथक् ॥४०१॥

व्यक्तस्य गुणधर्माभ्यां सहितस्य यदा लयः ।
अव्यक्ते जायते, मृत्युर्व्यवहारे तदा स्मृतः ॥४०२॥

न मृतस्य पुनर्जन्म दृष्टं कस्यापि वस्तुनः ।
न विनष्टो घटः पश्चात् सोऽयमेवं प्रतीयते ॥४०३॥

उत्पत्तेश्च लयं यावद्देहोऽयं जीव उच्यते ।
देहे ब्रह्मणि लीने तु न जीवो न पुनर्भवः ॥४०४॥

सकृज्जन्म सकृन्मृत्युस्तस्माद् व्यक्तस्य वस्तुनः ।
प्रागीश्वरस्वरूपेऽपि तदिदं स्पष्टमीरितम् ॥४०५॥

तदेवं द्विविधं ब्रह्म सगुणं निर्गुणं तथा ।
उपादानं निमित्तं च लक्ष्यतेऽत्र समासतः ॥४०६॥

उभयोरप्यजन्यत्वं नित्यता चोभयोः सतोः ।
तृतीयेनाथ सूत्रेण वेदव्यासेन सूत्र्यते ॥४०७॥

शास्तृत्वमुभयोरस्य जगतः सुप्रतिष्ठितम् ।
अतस्तयोरयोनित्वं तृतीयेन निरूप्यते ॥४०८॥
॥६१५॥

॥१०२३॥

इति श्रीमद्ब्रह्मसूत्रभाष्यालोचने प्रथमाध्यायस्य प्रथमपादस्य द्वितीयं सूत्रम् ।

॥ अथ श्रीमद्ब्रह्मसूत्रभाष्यालोचनस्य प्रथमाध्यायस्य प्रथम-पादस्य तृतीयं सूत्रम् ॥

॥ शास्त्रयोनित्वात् ॥ १ । १ । ३ ॥

(अत्र श्रीमद्वल्लभमतालोचनम् ।)

"शास्त्रे योनिः शास्त्रयोनि "स्ततस्त्वे प्रत्यये कृते ।
शास्त्रयोनित्वशब्दोऽयं व्युत्पन्न इति वल्लभाः ॥१॥

ब्रह्मणः कारणत्वस्य शास्त्रेषु प्रतिपादनात् ।
अस्त्यलौकिककर्तृत्वं ब्रह्मणीति च [1]तन्मतम् ॥२॥

सप्तम्यन्तं पदं 'शास्त्रे'—इति यत्त्विह दृश्यते ।
तस्य त्वान्तेन सम्बन्धः किं वा केवलयोनिना ॥३॥

भावार्थकोऽथवा योऽयं प्रत्ययस्त्वः प्रवर्तते ।
योनिशब्दात् समासाद्वा स परः किं प्रवर्तितः ॥४॥

इति न स्पष्टमेतस्मिन् पक्षे नः प्रतिभासते ।
यतो ह्यर्थानुवादे तैः परो योनेः प्रयोजितः ॥५॥

इहत्यश्च विशेषोऽस्ति भाषितो वल्लभेरितः ।
शागेवेत्यनुभाषेऽथ श्रीमद्रामानुजाशयम् ॥६॥

(अथ श्रीमद्रामानुजाचार्यमतम्)

गुरुणा शङ्करेणात्र समासो द्विविधः स्मृतः ।
षष्ठीतत्पुरुषश्चाद्यो बहुव्रीहिस्ततः परम् ॥७॥

---

१. "तेऽवदन्" इति पाठान्तरम् ।

उपेक्षमाणास्तत्राद्यं श्रीरामानुजसूरयः ।
द्वितीयं श्लाघयामासुर्बहुव्रीहिं विशेषतः ॥८॥
यस्य योनिः स्वयं शास्त्रं शास्त्रयोनीति तत् स्मृतम् ।
तद्भावः शास्त्रयोनित्वं तस्माद् ब्रह्मावबुध्यते ॥९॥
प्रत्यक्षेण प्रमाणेन न हि ब्रह्म प्रमीयते ।
नानुमानेन केनापि तत्साधयितुमीश्यते ॥१०॥
शास्त्रं केवलमत्रास्ति प्रमाणं कारणं परम् ।
येनाऽस्य ब्रह्मणः सत्ता सद्भिर्बोद्धुं प्रभूयते ॥११॥
न बाह्येन्द्रियसम्भूतं [1]न चाभ्यन्तरसम्भवम् ।
न योगसम्भवं किञ्चित् प्रत्यक्षं ब्रह्मबोधकम् ॥१२॥
सामान्यतोऽथवा दृष्टमनुमानं विशेषतः ।
सर्वं कुण्ठितमेवास्ति ब्रह्मास्तित्वप्रसाधने ॥१३॥

(अथ जगत्कर्तृत्वकल्पना तत्खण्डनं च)

महीमहीधरादीनां दृष्ट्वाऽवयवितां बुधाः ।
बहवः कार्यतामेषां साध्नुवन्त्यनुमानतः ॥१४॥
कार्योपादानविज्ञानविधानादिबलान्विताद् ।
ऋते च कर्तुस्तत्कार्यं जायते नैव कुत्रचित् ॥१५॥
तस्मादेषामुपादानकारणज्ञानवान् परः ।
चतुरः कोऽपि कर्ताऽस्ति ब्रह्मेश्वरपदाभिधः ॥१६॥

---

१. "नान्तरिन्द्रियसम्भवम्" इति पाठान्तरम् ।

एवं साध्नुवतामत्र जगत्कर्तृत्वमीश्वरे ।
मतं सम्मर्दयामासुराचार्याः स्थिरयुक्तिभिः ॥१७॥
महीमहार्णवादीनि कार्याण्येतानि नैकदा ।
युगपत् सन्ति जातानि किन्तु कालान्तरे क्रमात् ॥१८॥
कालभेदात्ततश्चैषां कार्याणामपि भेदतः ।
कर्तृभेदोऽपि कस्मान्न भवेदत्र प्रकल्पितः ॥१९॥
कल्पिते कर्तृभेदे च यदेकेश्वरसाधनम् ।
तदेषामनुमानस्य पूजकानां न सिध्यति ॥२०॥

यद्येकः कालभेदेन कार्याणि कुरुते जनः ।
तस्मान्न कालकार्यादिभेदात् कर्ता विभिद्यते ॥२१॥
इत्युच्यते, तदाप्यत्र कर्तृ ब्रह्म न सिध्यति ।
अत्यन्तादृष्टरूपत्वात् कल्पनानुपपत्तितः ॥२२॥
कालकार्यादिभेदाच्च कर्तृभेदे प्रकल्पिते ।
जीवेषु कर्तृता तेषामनुमानात् प्रसेत्स्यति ॥२३॥
कृतं पुनः कल्पितेन ब्रह्मणैकेश्वरेण वा ।
जीवेभ्य एव भिन्नेभ्यो भिन्नानामिह सम्भवात् ॥२४॥

यः प्रयोजनवानस्ति यश्चावयववान् प्रभुः ।
स एव कर्ता लोकेऽस्मिन् कुम्भकार इवेक्षितः ॥२५॥
सिषाधयिषितो यस्तु भवतां जगदीश्वरः ।
स प्रयोजनशून्यश्च निःशरीरश्च साध्यते ॥२६॥

न प्रयोजनशून्यस्य निःशरीरस्य कुत्रचित् ।
कर्तृत्वं दृश्यते, तस्मान्नैव ब्रह्मानुमीयते ॥२७॥
निःशरीरं मनो नैव कुर्वत् कार्यं विलोकितम् ।
तस्मान्न नित्यमनसः कर्तृत्वमपि कल्पते ॥२८॥
किञ्च कर्तृत्वसिद्ध्यर्थं व्यापारः प्रागपेक्षितः ।
निर्व्यापारो न कुत्रापि कर्ता न्यायस्य सम्मतः ॥२९॥
तस्मादीश्वरनिष्ठं तत् कर्तृत्वं नैव सिध्यति ।
निर्व्यापारमनस्कत्वादशरीरतया पुनः ॥३०॥
ईश्वरस्य शरीरित्वे शरीरं तस्य कीदृशम् ।
किं नित्यमथवाऽनित्यमिति शङ्कोदियात् स्वयम् ॥३१॥
नित्यत्वेऽस्य शरीरस्य नित्यावयविनस्तदा ।
देशः कालोऽपि कल्प्यः स्यान्नित्यः साधनसङ्ग्रहः ॥३२॥
किञ्चावयविनो नित्यसत्त्वे तु स्वीकृते त्वया ।
अस्यैव जगतो नित्यं सत्त्वं स्वीक्रियतां प्रभो ॥३३॥
कृतं ततोऽतिरिक्तेन कल्पितेनेश्वरेण ते ।
येनास्य जगतः श्रीमन् कार्यता साध्यते मुधा ॥३४॥
किञ्चास्येश्वरदेहस्य यद्यनित्यत्वमिष्यते ।
तदा तद्व्यतिरिक्तोऽत्र तद्धेतुः स्पृहयिष्यते ॥३५॥
तदेवं पूर्वपूर्वस्य देहस्यात्र समीहिते ।
हेतुत्वे, स्यादवस्थानं कल्पनाया न कुत्रचित् ॥३६॥

(उपसंहारः)

तस्मान्नैवानुमानेन केनाप्यत्र प्रसिध्यति ।
कर्तृत्वं कारणत्वं वा ब्रह्मणो वेश्वरस्य वा ॥३७॥

(अथेश्वरसत्तायां शास्त्रस्यैव प्रामाण्यम् ।)

तस्मादेतस्य सत्तायाः स्थापनाय तु केवलम् ।
शास्त्रमस्ति समर्थं यत् सूत्रेणानेन बुध्यते ॥३८॥

यदाप्तवचनं सर्वं तच्छास्त्रमिह कीर्तितम् ।
अन्तःपतितमेतस्य वाङ्मयं नः पुरातनम् ॥३९॥

व्यासस्तु भगवानत्र भृगुवल्लीं विनिर्दिशन् ।
शास्त्रशब्देन भातीति मन्ये श्रीभाष्यसम्मतम् ॥४०॥

किञ्च यद्यपि शब्दोऽयं योनिः कारणवाचकः ।
तथाप्यत्र प्रमाणस्य वाचकत्वेन गृह्यते ॥४१॥

ततः शास्त्रमिदं सर्वं प्रमाणं यस्य केवलम् ।
तद् ब्रह्म शास्त्रयोनित्वादित्येतेनावबुध्यते ॥४२॥

भृगुवल्ली च जगतः कारणं यद् विवक्षति ।
तदभेदं पुरस्कृत्य ह्युपादाननिमित्तयोः ॥४३॥

श्रीभाष्याशयमत्रत्यमेवं संक्षिप्य सादरम् ।
स्थानेऽनुवदितुं मन्ये शाङ्करं मतमुज्ज्वलम् ॥४४॥

(इति श्रीमद्रामानुजमतम्)

(अथ श्रीमज्जगद्गुरुमतम्)

गुरवः शङ्कराचार्या उपन्यास्यन्मतद्वयम् ।
षष्ठीतत्पुरुषं पूर्वं बहुव्रीहिं ततः परम् ॥४५॥

कतरन्मतमुत्कृष्टमित्यत्र तु मनीषिणः ।
स्वयं प्रमाणभूता ये नीरक्षीरविवेकिनः ॥४६॥

मन्मते त्वत्र नो शस्तो बहुव्रीहिः प्रतीयते ।
अद्यत्वे सर्वशास्त्राणां दुर्गमत्वाद् विशेषतः ॥४७॥

किञ्चात्र शास्त्रशब्देन यः पदार्थो विवक्षितः ।
न स वेदादिविद्याभ्यो व्यतिरिक्तोऽवभासते ॥४८॥

एता वेदादिविद्याश्च समधीत्यापि नारदः ।
सनत्कुमारमासाद्य जिज्ञासां व्यतनोन्निजाम् ॥४९॥

सनत्कुमारो भगवान् ज्ञातशास्त्रमहानिधिम् ।
अत्यल्पज्ञमिव प्राज्ञो नारदं पर्युपाहसत् ॥५०॥

"नाममात्रमिदं सर्वं तस्माद् वाचं च भूयसीम्" ।
"वाचोभूयो मन"श्चोक्त्वा शास्त्रे गौणत्वमादधात् ॥५१॥

शास्त्राध्ययनमात्रेण नैवेन्द्रस्तत्त्वमध्यगात् ।
शतमेकोत्तरं वर्षाण्युवास गुरुमन्दिरे ॥५२॥

अकल्पनीयः शास्त्राणां प्रयोगविषयो महान् ।
ह्रासवृद्ध्यादियोगेन न तद्रूपं निरूप्यते ॥५३॥

किञ्च तेषां प्रमाणत्वे संशयग्रस्ततां गते ।
ब्रह्मापि संशयग्रस्तं भवेत्तत्प्रतिपादितम् ॥५४॥

तस्माद् यावन्ति शास्त्राणि सुगमानीह भूतले ।
ब्रह्मस्वरूपचिन्तायां साहाय्यं तैर्वितीर्यते ॥५५॥

न, 'तानि केवलान्येव ब्रह्मरूपनिरूपणे ।
कारणानि प्रधानानी 'त्याशयस्तु समर्थ्यते ॥५६॥

किञ्चात्र श्रुतयः काश्चिदवाङ्मनसगोचरम् ।
वाचाऽनभ्युदितं चाहुर्ब्रह्म नित्यं निरञ्जनम् ॥५७॥

यदवाच्यमविज्ञेयममन्तव्यं च यद् भवेत् ।
तत् कथं स्यात् परं ब्रह्म शास्त्रमात्रप्रमाणकम् ॥५८॥

ऋचो यजूँषि सामानि किञ्च यस्माद् भवन्ति, तत् ।
शास्त्रमात्रैकसंवेद्यं कथंकारं भविष्यति ॥५९॥

तस्मान्नात्र बहुव्रीहिः प्रशस्यो भाति मन्मते ।
षष्ठीतत्पुरुषार्थस्तु ऋङ्मन्त्रैरपि गीयते ॥६०॥

"तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत"
(शु. य. ३१ अ. ७ मं.)

इत्यस्यामृचि सुस्पष्टः शास्त्राणामेष सम्भवः ।
यज्ञात् सर्वहुतो ब्रह्मरूपादद्यापि गीयते ॥६१॥

यथार्द्रेन्धनसंयोगाद् अग्नेर्धूमस्य सम्भवः ।
तथैव सर्वशास्त्राणां ब्रह्मणः सम्भवः श्रुतः ॥६२॥

यथैव वेदाश्चत्वारो विद्या उपनिषद्युताः ।
पुराणानीतिहासाश्च ब्रह्मणः प्रादुरासत ॥६३॥

तथैव सकलाः श्लोकाः सूत्राणि सकलान्यपि ।
व्याख्यानानि च सर्वाणि ब्रह्मणः प्रादुरासते ॥६४॥

व्याख्यानान्तं च वेदादि वाङ्मयं यन्निरूपितम् ।
बृहदारण्यके सर्वं तदेतच्छास्त्रमीर्यते ॥६५॥

वस्तुतस्त्वत्र शब्दो यो जायते श्रुतिगोचरः ।
स एव शास्त्रशब्दस्य प्रस्तुते वाच्यतां गतः ॥६६॥

शब्दोऽयं शासनायाऽलं शब्दे शास्त्रं प्रतिष्ठितम् ।
न हि शब्दमनादृत्य शासनस्यास्ति सम्भवः ॥६७॥

शब्दोत्पत्तिश्च निःश्वासान्निःश्वासः शब्दकारणम् ।
उद्भूतायां विवक्षायां निःश्वासो याति शब्दताम् ॥६८॥

अत एव च वेदादि वाङ्मयं निखिलं श्रुतिः ।
प्राह निःश्वसितं तस्य भूतस्य महतः सतः ॥६९॥

तथा हि—" स यथाऽर्द्रेन्धनाग्नेरभ्याहितात् पृथग् धूमा विनिश्चरन्ति—एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः " इत्यादि।
(बृह. २ अ. ४ ब्रा. १० कं.)

निःश्वासस्याश्रयं चोक्त्वा व्यक्तं भूतमिदं महत् ।
तमात्मानं तथा ब्रह्म मैत्रेयीमाह योगिराट् ॥७०॥

शब्दनिःश्वासरूपेण तदेवं स्थूलकर्मणा ।
सूक्ष्मं कारणमव्यक्तं गमयत्यमला श्रुतिः ॥७१॥

तामेव सरणीं प्राञ्चः साङ्ख्याचार्याः समाश्रयन् ।
तामेवाभिव्यनक्त्यत्र भगवान् बादरायणः ॥७२॥

निःश्वासः शब्दतामेत्य शास्त्रत्वमधिगच्छति ।
शब्दः शास्त्रं च निःश्वासस्ततः पर्यायतां गताः ॥७३॥

निःश्वासकारणत्वाद्धि ब्रह्म शब्दस्य कारणम् ।
शब्दकारणतायाश्च शास्त्राणामपि कारणम् ॥७४॥

योनिशब्दः प्रसिद्धोऽस्ति कारणार्थे प्रयोजितः
अतः शास्त्रस्य योनित्वं निर्बाधं ब्रह्मणि स्थितम् ॥७५॥

(अत्र कस्यचिद् वल्लभभृत्यस्य विचारः)

अत्र वल्लभभृत्येन केनापि बुधमानिना ।
वेदाश्चैवोपनिषदो हन्तैवमवहेलिताः ॥७६॥

यदि भूतस्य महतः शास्त्रं निःश्वसितं भवेत् ।
अबुद्धिपूर्वकत्वं हि ततस्तेषां प्रसेत्स्यति ॥७७॥

अबुद्धिपूर्वको लोके निःश्वासः प्रत्ययं गतः ।
निःश्वासरूपं तच्छास्त्रं ततश्चाबुद्धिपूर्वकम् ॥७८॥

तथा हि—" द्वितीये निःश्वासस्याबुद्धिपूर्वकत्वेन तथात्वात् "....
"निःश्वासात्मकवेदोपादानत्वेनाबुद्धिपूर्वकनिःश्वासोपादानपुरुषदृष्टान्तसनाथेन प्रतिसाधनेनापास्तम् " ॥ (सविवरणे ब्रह्मसूत्राणुभाष्ये, शास्त्रयोनित्वादित्यत्र, विवरणटिप्पणम् ; पृ. सं. ३८ ॥)

(अथ तद्विचारविमर्शः ।)

अत्रैवमवधातव्यं बुद्धिर्निःश्वासपूर्विका ।
वेदाश्च सकला लोके दृश्यन्ते बुद्धिपूर्वकाः ॥७९॥

निःश्वासजननात् पश्चाद् बुद्धिरुत्पद्यते सती ।
निःश्वासप्रक्षयात् पूर्वं बुद्धिश्च प्रविलीयते ॥८०॥

न निःश्वासमनाश्रित्य बुद्धिः कुत्रापि तिष्ठति ।
तस्मान्निःश्वासजन्यत्वं बुद्धेरत्रावधार्यताम् ॥८१॥

बुद्धेर्निःश्वासजन्यत्वात सूक्ष्मं रूपं प्रतिष्ठितम् ।
निःश्वासे, कलशस्येव कपालेऽव्यावहारिकम् ॥८२॥

किञ्च बुद्ध्या यथा वस्तुस्वरूपमवगम्यते ।
तथा निःश्वसितेनापि सत्पदार्थोऽवगम्यते ॥८३॥

अन्धकारे प्रसुप्तोऽपि निःश्वासादवबुध्यते ।
कामक्रोधादिकान् भावान् निःश्वासोऽभिव्यनक्ति नः ॥८४॥

निःश्वासे बुद्धितत्त्वस्य सम्भवो न भवेद् यदि ।
ततः कथं प्रजायेत प्रतीतिः प्रत्ययः प्रमा ॥८५॥

गुणानां मृत्तिकायाश्च सद्भावाद्धि कपालयोः ।
मृत्तिकावर्तिनः कुम्भे गुणानुपलभामहे ॥८६॥

अत एव न निःश्वासो यावन्नश्यति देहिनः ।
न तावन्मृत इत्येष व्यवहारः प्रवर्तते ॥८७॥

किञ्च भो भवता शास्त्रप्रामाण्यं प्रतिशृण्वता ।
किं शास्त्रत्वमिति ख्यातुं कल्पान्तेऽपि न शक्यते ॥८८॥

भवतो यत्र शास्त्रत्वं तत्राऽन्यस्याऽस्त्यशास्त्रता ।
सर्वमान्यं प्रमाणत्वं कथं तत्र प्रसेत्स्यति ॥८९॥

किञ्चोपनिषदा वेद्यं ब्रह्म केवलया हि तत् ।
न शास्त्रान्तरसंवेद्यमिति ते गुरुरभ्यधात् ॥९०॥

तथा हि—" तं त्वौपनिषदं पुरुषं पृच्छामि, ' इति केवलोपनिषद्वेद्यं ब्रह्म, न शास्त्रान्तरवेद्यम् ॥ " इति कर्तव्यपदाध्याहार-विचारे पृ. ९ सविवरणेऽणुभाष्ये) ॥

यत्तु शास्त्रान्तरावेद्यं तस्य योनिः कथं भवेत् ।
शास्त्रे इत्यवधानेन प्रष्टव्यः स्वो गुरुस्त्वया ॥९१॥

किञ्च स्वैरकथारूपं यस्य शास्त्रमसौ मुनिः ।
प्रथयेत् स्वां कथं श्लाघां शास्त्रे योनित्वमीरयन् ॥९२॥

किञ्च नैवोपनिषदां शास्त्रत्वं क्वचिदीरितम् ।
शास्त्रं शासनकारित्वाद् राजसं न तु सात्त्विकम् ॥९३॥

वेदाश्चैवोपनिषदः सात्त्विका, न तु राजसाः ।
तस्मान्न तेभ्यः कुत्रापि शास्त्रशब्दः प्रणोदितः ॥९४॥

निःश्वासः सर्वभूतानामाद्यो वेदः प्रतिष्ठितः ।
प्रणिन्युर्दृदृशुः प्रोचुर्वेदान् निःश्वाससेविनः ॥९५॥

मातापितृस्वरूपस्य निःश्वासस्यावहेलनात् ।
मृतप्रोक्तं भवेच्छास्त्रं भवदीयमनोगतम् ॥९६॥

अबुद्धिपूर्वकत्वे तु निःश्वासस्य प्रतिश्रुते ।
अबुद्धिपूर्वकास्तेस्युर्वेदा निःश्वासरूपिणः ॥९७॥

यस्मिन्नृचः साम यजूंषीत्यादौ त्रैष्टुभे यतः ।
ऋगादीनां प्रतिष्ठानं मनः प्रोक्तं निरामयम् ॥९८॥

मनसः सम्भवः प्राणात्, प्राणो निःश्वाससंज्ञकः ।
निःश्वासे बुद्धिहीने तु बुद्धिहीनं मनो भवेत् ॥९९॥

बुद्धिहीने मनस्येवमृचः साम यजूंषि वा ।
कथं प्रतिष्ठितानि स्युर्यत्प्रामाण्यं तवेहितम् ॥१००॥

तस्मान्न बुद्धिहीनोऽयं निःश्वासो जगदाश्रयः ।
निःश्वासान्मनसो जन्म, शास्त्राणां मनसस्तथा ॥१०१॥

तन्मनःसम्भवं शास्त्रं ब्रह्मरूपनिरूपणे ।
साहाय्यकारि निःशङ्कं, प्रमाणं केवलं तु न ॥१०२॥

तैत्तिरीयेऽप्यतः शिक्षाध्याये शिष्यानुशासने ।
उपेक्ष्य शास्त्रं, गुरुतां ब्राह्मणस्याह वै श्रुतिः ॥१०३॥

जातायां विचिकित्सायां वृत्ते कर्मणि वा क्वचित् ।
श्रुतिः सम्मर्शिनां शास्ति विप्राणामनुशासनम् ॥१०४॥

न तत्र शास्त्रस्योल्लेखो विचिकित्सानिवारणे ।
दृश्यते, येन शास्त्रस्य प्रामाण्ये स्यान्महाग्रहः ॥१०५॥

अलूक्षा धर्मकामा ये युक्ताः सम्मर्शिनस्तथा ।
ब्राह्मणास्ते हि सर्वत्र प्रमाणं संशयोदये ॥१०६॥

निःसन्दिग्धश्च शास्त्रेण केवलेन न गम्यते ।
कोऽप्यर्थस्तत्र विज्ञेयं सूत्रमेतन्निदर्शनम् ॥१०७॥

कश्चिदत्र बहुव्रीहिं कश्चित्तत्पुरुषं तथा ।
कश्चित् पूर्वपदे षष्ठीं कश्चिदिच्छति सप्तमीम् ॥१०८॥

तस्माद् यदत्र भवता शास्त्रे योनित्वमिच्छता ।
षष्ठीतत्पुरुषस्त्यक्तो वेदैस्त्यक्तस्ततोऽभवः ॥१०९॥

वैदिकत्वं तथाऽऽस्तिक्यं त्वयि तावद्धि तिष्ठति ।
षष्ठीतत्पुरुषं यावन्मुक्तकण्ठं प्रशंससि ॥११०॥

भूतनिःश्वासरूपत्वं वेदानां च स्वयं श्रुतिः ।
बृहदारण्यके प्राह याज्ञवल्क्यमुखोद्गता ॥१११॥

तस्मादबुद्धिपूर्वत्वं निःश्वासस्य विवृण्वता ।
व्यक्ता वल्लभशिष्येण निजा बालिशता कृता ॥११२॥

अतो न सप्तम्यन्तस्य समासः श्रुतिसम्मतः ।
षष्ठीतत्पुरुषस्यैव श्रुतिरस्ति समर्थिनी ॥११३॥

षष्ठीतत्पुरुषस्यैवं प्राशस्त्ये सम्मतेऽपि या ।
समुदेति पुनः शङ्का धीरैः साऽप्यवधार्यताम् ॥११४॥

जन्मादिसूत्रे पूर्वोक्ते वर्तते'ऽस्य'–पदं श्रुतम् ।
इदमः सर्वनाम्नो यन् ङसि निष्पाद्यते बुधैः ॥११५॥

तत्रत्येनेदमा सर्वे शङ्कराद्या गुरूत्तमाः ।
ग्राहयन्ति जगत्सर्वं भूतभौतिकसंकुलम् ॥११६॥

महाभूतादिनश्चास्य यतो जन्मादि जायते ।
तद् ब्रह्मेति च सूत्रार्थस्ततः स्पष्टोऽवबुध्यते ॥११७॥

एतेनैतस्य महतो भूतस्यापि च कारणम् ।
ब्रह्मेति बालिशेनापि सुस्पष्टमवगम्यते ॥११८॥

एतन्निःश्वसितं चास्य भूतस्य महतः सतः ।
ऋग्वेदोऽथ यजुर्वेदो वाङ्मयं चेतरद् बृहत् ॥११९॥

एवं ब्रह्मणि भूतानां कारणत्वे प्रतिष्ठिते ।
भूतनिःश्वसितस्यापि कारणत्वं न हन्यते ॥१२०॥

भूतनिःश्वसितं शास्त्रं ब्रह्म तस्यास्ति कारणम् ।
सा च कारणता भूतकारणत्वेन गम्यते ॥१२१॥

पुनस्तत्कारणत्वस्य द्योतनाय महर्षिणा ।
पुनरुक्तिप्रपञ्चोऽयं निरर्थः किं प्रतायताम् ॥१२२॥

सूत्रेण शास्त्रयोनित्वादित्येतेन यदीष्यते ।
शास्त्रकारणतैवात्र सिषाधयिषिता मुनेः ॥१२३॥

सा तु जन्मादिसूत्रेण स्वयमेव प्रसेत्स्यति ।
निष्फलं शास्त्रयोनित्वादिति सूत्रं ततो भवेत् ॥१२४॥

(अथ नव्यमतेन सूत्रार्थः ।)

इति चेच्छ्रूयतामत्र वेदव्यासो महामुनिः ।
न शास्त्रकारणत्वेन ब्रह्मसिद्धिं चिकीर्षति ॥१२५॥

अनवस्थात्मकं दोषं कल्पितं प्रतिवादिभिः ।
सूत्रेण स तृतीयेन देवः परिजिहीर्षति ॥१२६॥

याभ्यामेतस्य भूतादेरानन्दान्तस्य जायते ।
जन्मादि जगतस्ते द्वे जायेते कारणे कुतः ॥१२७॥

परैरुद्भावितामेनामपशङ्कां निवारयन् ।
तृतीयं शास्त्रयोनित्वादिति सूत्रं चकार सः ॥१२८॥

ग्रसितस्कभितेत्यत्र शास्तेस्तृचि, निपातनाद् ।
इडभावस्य; वेदेषु शास्तृशब्दः प्रसाध्यते ॥१२९॥

लोकेऽपि भगवान् व्यासः शतधा तं प्रयुक्तवान् ।
सर्वज्ञस्य मुनेरर्थे प्रयुक्तो बहुधा श्रुतः ॥१३०॥

तथा हि—" मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् गोपानां
स्वजनोऽसतां क्षितिभुजां "शास्ता" स्वपित्रोः शिशुः " ॥
(श्रीमद्भागवत १०-४३-१७)

" मुनीन्द्रः श्रीघनः शास्ता ". इत्यत्र अमरकोषे च ॥

तेनैव शास्तृशब्देन कारणद्वितयं मुनिः ।
विवक्षँस्तस्य कार्यत्वम् अयोनित्वान्न्यवारयत् ॥१३१॥

शासनीयमिदं सर्वं महाभूतादिकं जगत् ।
उपादानं निमित्तं च तदीयं शासकद्वयम् ॥१३२॥

विकृतं व्यक्ततां यातं शासनीयमिहोच्यते ।
अव्यक्तमविकारं च शास्तृ कारणमुच्यते ॥१३३॥

अव्यक्ता प्रकृतिः शास्त्री शास्ता च पुरुषोऽव्ययः ।
उभयोरप्ययोनित्वं सूत्रेणानेन सूच्यते ॥१३४॥

जन्मार्थको योनिशब्दो, योनिर्यस्य न विद्यते ।
अयोनिः सो,ऽस्य तद्भावस्तेनायोनित्वमुच्यते ॥१३५॥

प्रधानपुरुषाख्यौ द्वौ शास्ताराविह विश्रुतौ ।
तयोः शास्त्रोरयोनित्वादनवस्था निवार्यते ॥१३६॥

उपादानात् प्रधानाच्च निमित्तात् पुरुषात् परात् ।
न परं कारणं किञ्चिज् जायेतां तौ यतः परात् ॥१३७॥

एतेन पुनरुक्त्यात्मा दोषोऽपि विनिवारितः ।
योनिशब्दस्य मुख्यार्थो न मनागत्र बाधितः ॥१३८॥

सांख्ययोगादिभिः ख्यातो विरोधश्च निरोधितः ।
ऐकमत्यं मुनीनां च स्थापितं साधुसम्मतम् ॥१३९॥

(अथ चतुर्थसूत्रावतरणम् ।)

नन्वेवं स्वीकृते सत्त्वे शास्त्रोः कारणयोर्द्वयोः ।
तदित्यादिपदज्ञातमेकत्वं परिहीयते ॥१४०॥

केनोपनिषदारम्भे वाङ्मनश्चक्षुषादिभिः ।
इन्द्रियैर्दुर्गमं ब्रह्म तदेवेत्येकमीरितम् ॥१४१॥

उपादानं निमित्तं चेत्येवं स्यात् कारणद्वयम् ।
ब्रह्मवाच्यं, ततः कस्मात्तदेवेत्येकतेरिता ॥१४२॥

इति चेदुत्थितामेनां शङ्कां परिजिहीर्षति ।
सूत्रकृद् भगवान् व्यासः सूत्रात् तत्तु समन्वयात् ॥१४३॥

तत्तुरीयमतः सूत्रं यत्तु "तत्तु समन्वयात्" ।
इह प्रस्तूयते, बह्व्यो यत्र व्याख्याश्चकासति ॥१४४॥

॥१०२३॥

॥११६७॥

इति ब्रह्मसूत्रभाष्यालोचने प्रथमाध्यायस्य प्रथमपादस्य तृतीयं सूत्रम् ॥

अथ ब्रह्मसूत्रभाष्यालोचने प्रथमाध्यायस्य प्रथमपादस्य चतुर्थं सूत्रम् ॥

॥ तत्तु समन्वयात् ॥ १-१-४ ॥

कुत्रचिद् ब्रह्म वेदेषु कर्तृरूपं प्रतीयते ।
क्वचिन्निमित्तरूपं च समवायितया क्वचित् ॥१॥
तत्र किं वस्तुतो ब्रह्म निमित्तं कर्तृ वा स्वयम् ।
किं वा स्वयमुपादानं कारणं समवायि यत् ॥२॥
इत्यस्मिन्त्संशये श्रीमान् वल्लभः प्राह यद् वचः ।
मन्ये तस्यानुवादेन सूत्रार्थः स्पष्टतामियात् ॥३॥

(अथ श्रीमद्वल्लभमतम् ॥)

'जन्माद्यस्य यतः' – सूत्रे पूर्वमेभिर्महात्मभिः ।
कर्तृत्वमेव वाच्यार्थो यतःशब्दस्य बोधितः ॥४॥
अधुना च निमित्तत्त्वं वाच्यमुक्त्वैव केवलम् ।
यतःशब्दस्य कर्तृत्ववाचकत्वं निषिध्यते ॥५॥

तथा हि–"एवं हि सः। पञ्चमी श्रूयते यत इति पञ्चम्यास्तसिरिति। आत्मन इत्यपि पञ्चमी। निमित्तत्वे न सन्देहः पञ्चम्या निमित्तत्वकथनात्। उपादाने कर्तृत्वे च सन्देहः। तद्वचकाश्रवणात् कल्पनायां प्रमाणाभावात्॥" (इत्यणुभाष्ये – तत्तु समन्वयाद् – इत्यस्य भूमिकायाम्)॥

सन्दिग्धमस्ति कर्तृत्वं तथोपादानताऽपि च ।
तद्वाचकस्य शब्दस्य पूर्वमश्रवणात् क्वचित् ॥६॥

इत्युक्त्वा तैर्विशेषेण सूत्रेणानेन सूरिभिः ।
समवायित्वमेवास्य ब्रह्मणः प्रतिपाद्यते ॥७॥

ये ब्रह्मणि न कर्तृत्वं न चोपादानतां तथा ।
मन्यन्ते तान्निराकर्तुं तुकारोऽत्र प्रयोजितः ॥८॥

तच्छब्दश्चात्र निर्दिष्टो बुद्धिस्थब्रह्मवाचकः ।
तत्तु ब्रह्म ततः कर्तृ तथोपादानमुच्यते ॥९॥

वस्तुतस्त्वत्र कर्तृत्वसाधकं नास्ति किञ्चन ।
साधनं येन कर्तृत्वं ब्रह्मण्यवगतं भवेत् ॥१०॥

'समन्वयाद्' इतिपदमुपादानत्वसिद्धये ।
प्रयुक्तं, न हि कर्तृत्वसाधने सुक्षमं भवेत् ॥११॥

तस्मादेतेन सूत्रेण साध्यते ब्रह्मणि स्थिरे ।
एतज्जगदुपादानकारणत्वं हि केवलम् ॥१२॥

अत्र तच्छब्दनिर्देश्यं ब्रह्म पक्षः प्रतीयते ।
साध्यं च समवायित्वं, हेतुरुक्तः समन्वयात् ॥१३॥

"किन्तु सूत्रेऽत्र साध्यस्य संकेतोऽपि न दृश्यते ।
तत्कथं समवायित्वं साध्यं वक्तुं प्रभूयते" ॥१४॥

इति शङ्कां समाधातुमितरे वल्लभानुगाः ।
ब्रह्मेति पक्षं मन्यन्ते लभ्यमत्राधिकारतः ॥१५॥

तच्छब्दात् समवायित्वं साध्यमुक्त्वा च ते बुधाः ।
पूर्णाङ्गमनुमन्यन्ते समवायित्वसाधनम् ॥१६॥

कश्चिच्च पक्षमत्रोक्त्वा जगतः समवायिनम् ।
ब्रह्माधिकारसुलभं साध्यं प्राह विचक्षणः ॥१७॥

वस्तुतस्त्वत्रभवतो वल्लभस्य न भासते ।
सिषाधयिषिता साध्या केवला समवायिता[1] ॥१८॥

समवायित्वमेवास्ति सन्दिग्धमिति वल्लभः ।
पुनः पुनः स्वशब्देन सूत्रावतरणेऽभ्यधात् ॥१९॥

नामरूपक्रियारूपे कार्येऽस्मिञ्जगदाह्वये ।
अस्ति भाति प्रियत्वेन सम्यग् ब्रह्मानुवर्तते ॥२०॥

अस्तित्वात् सदिदं कार्यं भानाच्चिदिदमुच्यते ।
प्रियत्वाच्च तथाऽऽनन्दरूपमेतत् प्रतीयते ॥२१॥

सच्चिदानन्दता चैवं यतः कार्येऽनुभूयते ।
तस्माद् ब्रह्माऽन्वितं सम्यगस्मिन्नित्यनुमीयते ॥२२॥

नाभविष्यद् यदि ब्रह्म सच्चिदानन्दविग्रहम् ।
कार्ये समन्वितं, नेदं प्रत्यैष्यत तदा तथा ॥२३॥

अतो ब्रह्मास्य जगतो नामरूपक्रियात्मनः ।
समवायीति सिद्धान्तो वल्लभस्यापि सम्मतः ॥२४॥

"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥

---

१. "ब्रह्मणः" इति शेषः

खवाय्वग्निजलोर्वीषु देवतिर्यङ्नरादिषु ।
अभिन्नात् सच्चिदानन्दाद् भिद्येते रूपनामनी " ॥
(वाक्यसुधा. २१-२२ श्लोकौ).

इति वाक्यसुधाग्रन्थे शङ्करोऽप्यकरोत् पुरा ।
प्रथितं निजसिद्धान्तं वल्लभाः प्रथयन्ति यम् ॥२५॥

एतेन यदुपादानमथवा समवायि यत् ।
तदेतत् सकलं ब्रह्मेत्याशयः स्पष्टतां गतः ॥२६॥

साङ्ख्याः प्रकृतिमाख्यान्ति परमाणून् परे बुधाः ।
कारणं समवायीति ब्रह्माख्यास्ते न संशयः ॥२७॥

अतो भावोऽथवा ब्रह्म प्रकृतिः परमाणवः ।
सर्वेऽप्यमी समानार्थाः पूर्वग्रन्थे प्रतिश्रुताः ॥२८॥

किन्तु हन्त पुरा काले पूर्वाचार्यकदर्थने ।
मत्त्वा गौरवमारेभे बहुभिः शब्दविग्रहः ॥२९॥

वल्लभैः परमाणूनां ब्रह्मत्वप्रतिपादने ।
सङ्कुचद्भिरनेकत्वदोषस्तेषां प्रकाशितः ॥३०॥

यदि कार्यं जगद्रूपमेकमेतस्य कारणम् ।
तदोपादानमप्येकं कल्पनीयं मनीषिणा ॥३१॥

लोके च परमाणूनामनेकत्वं सुविश्रुतम् ।
तस्मादनेके नैकस्य भवन्ति समवायिनः ॥३२॥

घटोपादानभूतास्ते भिन्ना मृत्परमाणवः ।
पटोपादानभूतेभ्यस्तन्त्वणुभ्यो विलक्षणाः ॥३३॥

अतस्तन्त्वणवो नैव घटोपादानकारणम् ।
न मृत्तिकाणवस्तद्वत् पटोपादानकारणम् ॥३४॥

एवं शब्दच्छलेनात्र निन्दिता अणुवादिनः ।
तथापि ते न निन्दार्हा यतस्ते तथ्यभाषिणः ॥३५॥

कार्यत्वेन जगत्त्वेन यथैकत्वं तवेहितम् ।
कार्ये जगति, तद्वद् भोः कारणेऽपि समीह्यताम् ।
एकत्वं कारणत्वं च, ततोऽसौ[1] ब्रह्मवाचकः । ॥३६॥

किञ्चैकत्वविवक्षायामणूनां भवतोच्यताम् ।
परमाणुपदस्थाने ब्रह्मशब्दो भवत्प्रियः ॥३७॥

न चैवं शब्दभेदेन तत्त्वार्थो भिद्यते क्वचित् ।
अप्शब्देन जलस्यार्थः कविभिर्ग्राहितो यतः ॥३८॥

(अत्र पूर्वपक्षः)

ननु भो यदुपादानं समवाय्यथवा भवेत् ।
तदेव ब्रह्म चेदिष्टं न तदा दुर्गमं हि तत् ॥३९॥

समवेतः पटो यत्र त्वन्मते तन्तवोऽपि ते ।
ब्रह्मवाच्या यतस्तेषु सुस्थिता समवायिता ॥४०॥

---

१. असौ = परमाणुशब्दः ।

कपालयोर्घटस्यैवमुपादानात्मनो मृदः ।
ब्रह्मत्वं न विहन्येत यतस्ते समवायिनः ॥४१॥

तदेवं समवेतानां कारणे समवायिनि ।
ब्रह्मत्वे सुस्थिते, कार्ये ब्रह्मता स्वयमागता ॥४२॥

ततश्च कारणे कार्ये सर्वस्मिन् ब्रह्मतां गते ।
किं वा तदस्ति यन्न स्याद् ब्रह्मरूपं सनातनम् ॥४३॥

ततश्च घटकार्यस्य कर्तृ ब्रह्म यदिष्यते ।
कुलालात्तन्न भिद्येत ब्रह्मत्त्वात्तस्य धीमतः ॥४४॥

कार्यकारणभावोऽयं तदेवं व्यावहारिकः ।
ब्रह्मण्येवेति न ब्रह्म भिद्यते जगतः पुनः ॥४५॥

ततश्च शङ्करेणोक्तः सिद्धान्तो यः पुरातनः ।
स एव वल्लभेनात्र किं न स्पष्टमनूदितः ॥४६॥

"कारणं व्यतिरेकेण पुमानादौ विलोकयेत् ।
अन्वयेन पुनस्तद्धि कार्ये नित्यं प्रपश्यति"

(अपरोक्षानुभूतिः)

इत्येतद्वचनेनात्र कार्ये ब्रह्मान्वयं गुरुः ।
अपरोक्षानुभूत्याख्यग्रन्थे व्यक्तमुदाहरत् ॥४७॥

(अत्रोत्तरः पक्षः)

इति चेन्न तथा वाच्यं; विशेषः कोऽपि विद्यते ।
श्रीमद्वल्लभसूरीणां मते; योऽत्र प्रकाश्यते ॥४८॥

द्विविधां तेऽभिमन्यन्ते कर्त्रुपादानसन्ततिम् ।
लौकिकीं प्रथमामन्यां स्वाभिप्रेतामलौकिकीम् ॥४९॥
घटो हि लौकिकं कार्यं, कर्ता तस्याऽस्तु लौकिकः ।
कुलालस्तदुपादानं मृत्तिकाऽप्यस्तु लौकिकी ॥५०॥
किन्तु तस्यैव कार्यस्य कर्ताऽस्त्यन्योऽप्यलौकिकः ।
उपादानं निमित्तं च भिन्नमस्याऽस्त्यलौकिकम् ॥५१॥
अलौकिकं तत्कर्तृत्वमुपादानत्वमेव च ।
निमित्तत्वं तथैकस्मिन् ब्रह्मण्येवास्त्यवस्थितम् ॥५२॥
तदलौकिककर्तृत्वनिमित्तत्वादि – धर्मवान् ।
परमात्मा परो ह्यस्मात् कार्यकारणसङ्ग्रहात् ॥५३॥
ततश्च कार्यमात्रस्य भवन्तु परमाणवः ।
उपादानत्वधर्मेण प्रख्याताः समवायिनः । ॥५४॥
किन्तु तेभ्यः पृथग्भूतो लौकिकेभ्योऽस्त्यलौकिकः ।
ब्रह्मनामा पदार्थो यः सर्वोपादानमव्ययम् ॥५५॥
तमलौकिककर्तारं तं निमित्तमलौकिकम् ।
विरुद्धसर्वधर्माणामाश्रयं ते प्रचक्षते ॥५६॥
लोके कर्तृविशेषाणां सद्भावेऽपि ततो यथा ।
अलौकिकस्य कर्तृत्वं ब्रह्मणो नैव हीयते ॥५७॥

तथा हि–"लोके कर्तृविशेषवदुपादानविशेषग्रहणेऽपि न ब्रह्मणि व्यभिचार;" इति सविवरणब्रह्मसूत्राणुभाष्ये ५८ पृष्ठेऽणुभाष्यम् ॥

तथैव लौकिकाणूनामुपादानविशेषता ।
नैवोपादानतां हन्याद् ब्रह्मणोऽस्याप्यलौकिकीम् ॥५८॥

इत्थं नित्याणुवादेऽस्मिन् यथाणुभ्यो विलक्षणः ।
स्वीकृतः कैश्चिदीशोऽत्र तथा तैः स्वीकृतो विभुः ॥५९॥

तथैव सांख्यसिद्धान्तखण्डनाय कृतश्रमैः ।
समवायित्वमव्यक्ते यद्यप्यङ्गीकृतं बलात् ॥६०॥

तथापि तस्य तैस्तत्त्वं तदंशत्वात् समादृतम् ।
अतदंशस्य नैवास्ति कुत्रचित् समवायिता ॥६१॥

अलौकिकस्य बृहतः सर्वेषां समवायिनः ।
अंशभूतामिमे ख्यान्ति प्रकृतिं सांख्यसम्मताम् ॥६२॥

ज्ञानं चाज्ञानमित्येवं प्रकृत्यंशावतः क्वचित् ।
प्रियत्वं चाप्रियत्वं च परिच्छेदश्च दृश्यते ॥६३॥

नानात्वमपि लोकेऽस्मिन् प्रकृतीच्छासमुद्भवम् ।
अत एव न सर्वत्र सच्चिदानन्दता समा ॥६४॥

प्रकृतीच्छावशादेव जडे सत्त्वं प्रतीयते ।
जीवे सत्त्वं च चित्त्वं च अन्तर्यामिणि च त्रयम् ॥६५॥

एवं स्तुत्वापि माहात्म्यमव्यक्तप्रकृतेः परम् ।
ब्रह्मांशतां प्रतिज्ञाय तस्यां गौणत्वमादधुः ॥६६॥

(अत्र पूर्वपक्षः)

प्रकृतीच्छाबलादेव यदा सर्वं प्रसिध्यति ।
न तस्या अंशिनोऽन्यस्य सम्भवे फलमीक्ष्यते ॥६७॥

मैवास्तु प्रकृतेरन्यस्तस्या अंशी विलक्षणः ।
प्रकृतिः केवलैवास्तु जगतः समवायिनी ॥६८॥

निमित्तस्य व्यपेक्षायां पुरुषो यस्ततः परः ।
ततो भिन्नगुणः सोऽस्य निमित्तं सम्भविष्यति ॥६९॥

कृतं पुनः कल्पनया पुंस्प्रकृत्यतिरेकिणः ।
कस्यचिद् भगवन्नाम्नः स्वतन्त्रेच्छावतोऽंशिनः ॥७०॥

येन शित्वेन भवता प्रतिष्ठाप्यः परोऽंशवान् ।
तदंशित्वं निरुक्तायां प्रकृतौ प्रतितिष्ठतु ॥७१॥

किञ्चालौकिककर्तृत्वे मानं किञ्चिन्न लभ्यते ।
येनात्र कर्तृद्वैविध्यस्वीकारः स्यादबाधितः ॥७२॥
उपादानस्य किञ्चैवं द्वैविध्यं नास्ति विश्रुतम् ।
यतो मृदतिरिक्तस्य स्यादुपादानता प्रभोः ॥७३॥
तस्मात् प्रकल्पितो भेदः कर्त्रुपादानयोः पृथक् ।
लौकिकालौकिकत्वाभ्यां, स मृषेति न संशयः ॥७४॥
"असद्वा इदम्०" इत्यादिः श्रुतिरस्तौदसत्पदात् ।
पुरुषं सांख्यसिद्धान्ते यस्त्वधिष्ठानमुच्यते ॥७५॥

सदाख्या प्रकृतिः प्राप्य तमाधारमजायत ।
स्वयमेव, न तां कोऽपि कर्ता घटमिवाकरोत् ॥७६॥
सैव स्वयेच्छयाऽऽत्मानं नानाविधमथाकरोत् ।
सैवाभवदतो भूतभौतिकात्मा जगत्त्रयी ॥७७॥
प्रकृतेरेव सद्भावाज्जगदेतच्चराचरम् ।
वेदैराद्यैश्च मुनिभिः सत्तया बहुधा स्तुतम् ॥७८॥
'तदात्मानं स्वयम्०" इति श्रुतिरप्यत्र केवलाम् ।
तत्पदेन सदात्मानं स्तुवीते प्रकृतिं पराम् ॥७९॥
अतः सत्पदमत्रत्यं प्रकृतेरेव वाचकम् ।
यत् सद्भिन्नमसत्तच्च पुरुषार्थमसत्पदम् ॥८०॥
अतो न किञ्चिद् वचनं प्रमाणं वाऽत्र विद्यते ।
अलौकिकस्य येन स्यादुपादानस्य कल्पना ॥८१॥
ततो न जगतः कोऽपि भिन्नः कर्ताऽस्त्यलौकिकः ।
न चाणुप्रकृतेर्भिन्नमुपादानमलौकिकम् ॥८२॥

(उत्तरपक्षः)

इत्येवं पूर्वपक्षस्य खण्डने क्षीणबुद्धयः ।
प्रायतन्तेतराचार्यमानभङ्गाय वल्लभाः ॥८३॥

(अत्र श्रीमद्रामानुजमतानुवादः ।)

अत्र केचन मीमांसां षोडशाध्यायसम्मिताम् ।
एकामखण्डितां प्राहुरङ्गद्वयविभूषिताम् ॥८४॥

पूर्वाङ्गं पूर्वमीमांसा द्वादशाध्यायसम्मिता ।
प्रोक्ता चोत्तरमीमांसा चतुरध्यायसम्मिता ॥८५॥

यथा च पूर्वमीमांसा क्रियार्था, प्रतिपादिका ।
धर्मस्य केवलस्यैवमुत्तराऽपीति तन्मतम् ॥८६॥

(अत्र श्रीमद्वल्लभकृतं तत्खण्डनम् ॥)

तन्मतं खण्डयन्त्येते यथा वल्लभसूरयः ।
तदत्र नितरामेव समासेन निवेद्यते ॥८७॥

न हि सर्वत्र वेदेषु धर्म एवास्ति केवलः ।
जिज्ञास्यः, किन्तु जिज्ञास्यं ब्रह्माऽप्यस्तीतरत्ततः ॥८८॥

धर्मस्योत्पादकं कर्म, वेदैः कर्माऽवबुध्यते ।
सन्देहानुत्थितानत्र जैमिनिः सन्न्यवारयत् ॥८९॥

मोक्षप्रदायकं ब्रह्म, वेदैर्ब्रह्माऽवबुध्यते ।
सन्देहानुत्थितानत्र वेदव्यासो न्यवारयत् ॥९०॥

तदेवं कर्मणां ज्ञाने जैमिनिः शरणं परम् ।
ब्रह्मज्ञाने च भगवान् वेदव्यासो महामुनिः ॥९१॥

उभाभ्यामपि काण्डाभ्यां यद्यभोत्स्यत केवलः ।
धर्मस्तदाऽभविष्यद् भो व्यर्थो वैयासिकः श्रमः ॥९२॥

अथातो वेदजिज्ञासेत्युक्त्यैवोभयकाण्डयोः ।
अलौकिकार्थोपयोगी संस्कारार्थः प्रसेत्स्यति ॥९३॥

ततो द्विविधजिज्ञासा – करणं स्यान्निरर्थकम् ।
धर्माङ्गत्वात्ततो भिन्न – ब्रह्मचिन्ताऽनपेक्षणात् ॥९४॥

(सिद्धान्तः)

धर्मस्य साधनाद् भिन्नं ब्रह्मज्ञानस्य साधनम् ।
धर्मस्य च फलाद् भिन्नं ब्रह्मज्ञानफलं बृहत् ॥९५॥

क्रियानुपूर्वी कल्पोक्ता वर्तते धर्मसाधनम् ।
स्वर्गादि च विशेषेण कल्पे धर्मफलं श्रुतम् ॥९६॥

वेदान्तानां विचारश्च ब्रह्मज्ञानस्य साधनम् ।
ततश्च श्रूयते मोक्षः फलं तस्यातिदुर्लभम् ॥९७॥

फलसाधनयोरेवं धर्मस्य ब्रह्मणस्तथा ।
भेदात्तद्बोधकौ काण्डौ विभिद्येते परस्परम् ॥९८॥

ततश्च पूर्वकाण्डे यो साध्यो धर्मो निरूपितः ।
तत्प्रवर्तकता नित्यं विधिवाक्ये प्रतिष्ठिता ॥९९॥

यच्च प्रस्तूयते ज्ञानमुत्तरे ब्रह्मणः परम् ।
तत्तु वेदान्तवाक्येषु स्वयं सिद्धं प्रतिष्ठितम् ॥१००॥

(अत्र पूर्वपक्षः ।)

ननु वेदान्तवाक्यानां सिद्धार्थप्रतिपादनात् ।
न प्रवर्तकता, नापि पुरुषार्थोपयोगिता ॥१०१॥

अतस्तदप्रमाणत्वं कुतो न परिकल्प्यते ।
इति चेच्छ्रूयतां श्रीमद्वल्लभाभिमतं मतम् ॥१०२॥

पूर्वकाण्डेऽपि, सिद्धान्ते, सिद्धार्थप्रतिपादनम् ।
वर्तते, न हि साध्योऽर्थः कोऽप्यत्र प्रतिपाद्यते ॥१०३॥

साध्यार्थप्रतिपादित्वे, निषेधैः प्रतिषेधनात् ।
निषिद्धं नरकं नैव पुनरस्तित्वमाप्नुयात् ॥१०४॥

नैवास्ति साध्यं नरकं क्वचिद् वेदागमादिषु ।
तत्कथं साध्यतां प्राप्तं, साध्यार्थप्रतिपादने ॥१०५॥

(साधक (प्रवर्तक) निरूपणम् ।)

वेदादिव्यतिरिक्तोऽस्ति सर्वात्मा हरिरेव सः ।
यः सर्वान् साधयत्यर्थान् साध्वसाधून् स्वरादिकान् ॥१०६॥

स प्रवर्तयिता सर्वपदार्थानां परात्परः ।
यज्ञस्वर्गादयः सर्वे तेन सिद्धा, न साधिताः ॥१०७॥

सिद्धा एव च ते यज्ञाः सर्ववेदेष्वनूदिताः ।
मन्त्राः कर्माणि सर्वाणि सिद्धान्येव चचक्षिरे ॥१०८॥

मन्त्राणां कर्मणां चैव दर्शनं श्रूयते श्रुतौ ।
येन तेषामसाध्यत्वं सिद्धत्वं च प्रसिध्यति ॥१०९॥

साध्यं न दृश्यते पूर्वं, सिद्धं पश्चात् प्रदृश्यते ।
दर्शनं चाग्निहोत्रादेः सिद्धं श्रुत्यैव गीयते ॥११०॥

सिद्ध एव ततो यज्ञो विष्णुरूपः सनातनः ।
क्रियानुपूर्वीकरणात् प्रादुर्भवति स स्वयम् ॥१११॥

ध्यानादिक्रियया यद्वद् भगवान् प्रकटीभवेत् ।
आधानादिविधानेन तथा यज्ञोऽपि कल्पते ॥११२॥

तदेवं सिद्धवस्तूनां याथार्थ्यप्रतिपादनात् ।
नाप्नुवन्त्यप्रमाणत्वं वेदवाक्यानि कुत्रचित् ॥११३॥

पुरुषार्थोपयोगित्वमप्येतेषां न हीयते ।
यतः पुमर्थः स्वर्गादिस्तैः सिद्धोऽप्युपलभ्यते ॥११४॥

आख्यानान्यपि सिद्धानामर्थानां प्रतिपादनात् ।
न मिथ्यार्थानि मन्यन्ते श्रीमद्वल्लभसूरिभिः ॥११५॥

तदेवं श्रुतिवेदोक्तपदार्थानां प्रसाधकः ।
प्रवर्तकश्च भगवान् हरिरेव न चेतरः ॥११६॥

तत्प्रवर्तितसिद्धार्थयाथार्थ्यप्रतिपादनात् ।
वेदाः प्रमाणतां यान्ति पुरुषार्थोपयोगिनः ॥११७॥

(अत्रोद्भावितोऽन्योन्याश्रयः)

स्वातन्त्र्येणात्र वेदानां प्रामाण्ये स्थिरबुद्धयः ।
अन्योन्याश्रयनामानं दोषं पश्यन्ति केचन ॥११८॥

योनित्वं हि प्रमाणत्वं वल्लभैः प्रागुदीरितम् ।
तद् योनित्वं हरेश्चास्य शास्त्र एव प्रतिष्ठितम् ॥११९॥

शास्त्रेणैव हरेः सत्ता यतश्चात्राऽवबुध्यते ।
तस्मात् प्रमाणं, सत्तायां हरेः शास्त्रं न चापरम् ॥१२०॥

तदेतच्छास्त्रयोनित्वाद्, इत्यत्रास्त्यभ्युदीरितम् ।
अत्रोच्यते च शास्त्रेण सिद्धार्थप्रतिपादनम् ॥१२१॥

सिद्धार्थप्रतिपादित्वे वेदानां तु, न सिध्यति ।
शास्त्रप्रमाणकं ब्रह्म, स्वतः सिद्धं यतो हि तत् ॥१२२॥

स्वतःसिद्धत्वसिद्ध्यर्थं प्रमाणान्तरमिष्यते ।
नैवानुवादकेनात्र वेदेनैतत् प्रसेत्स्यति ॥१२३॥

हरिसत्ताप्रसिद्ध्यर्थं वेदप्रामाण्यमिष्यते ।
सिद्धानुवादितासिद्ध्यै हरिप्रामाण्यमिष्यते ॥१२४॥

तदेवं वल्लभाचार्यमतेऽन्योन्याश्रयाभिधः ।
दोषो दुर्वारतां यातीत्येकेषां निश्चलं मतम् ॥१२५॥

अनुद्धृत्य तमेतं ते दोषमाचार्यपुङ्गवाः ।
क्रियापरत्वं पूर्वस्य, प्राहुर्नैवोत्तरस्य ते ॥१२६॥

'क्रियापरत्वं सर्वस्य वेदस्यैव,' वदन्ति ये ।
तानेतानखिलान् मूर्खान् प्रवदन्ति मनीषिणः ॥१२७॥

'आम्नायस्य क्रियार्थत्वाद्०' इति सूत्रं चकार यः ।
स जैमिनिरपि ह्येषां मते मूर्खश्च सिध्यति ॥१२८॥

आम्नायशब्दस्त्वत्रत्यः काण्डयोरुभयोरपि ।
सर्वस्यापि च वेदस्य वाचकोऽभ्युपगम्यते ॥१२९॥

न काण्डभेदो वेदेषु पौर्वापर्येण दृश्यते ।
येनैकतरकाण्डस्य वाच्याम्नायपदं भवेत् ॥१३०॥

यद्याम्नायपदेनात्र केवला संहितोच्यते ।
नैवोपनिषदस्तेन प्रोच्यन्त इति मन्यते ॥१३१॥

तदा तु तासां वेदत्वे सन्देहः स्याद् दुरुद्धरः ।
वेदाम्नायपदद्वन्द्वे पर्यायत्वस्य दर्शनात् ॥१३२॥
"तदा तासामवेदत्वं स्वयमेवाऽवहीयते" इतिश्रीमद्-
भारतीकृष्णतीर्थशङ्कराचार्यचरणसम्मतः पाठः ।

किञ्च वेदगता यद्वद् ऋगेकाऽऽम्नायते बुधैः ।
तथोपनिषदोऽप्यत्र ह्याम्नायन्ते विचक्षणैः ॥१३३॥

तस्मादाम्नायशब्दोऽयं नैकस्यांशस्य वाचकः ।
किन्तु सर्वस्य वेदस्य वाचकत्वाय सम्मतः ॥१३४॥

तस्याम्नायस्य भगवाञ्जैमिनिर्यः क्रियार्थताम् ।
ब्रवीति, हन्त स मुनिर्वल्लभैर्मूर्ख ईर्यते ॥१३५॥

था हि—"तस्मात् पूर्वमीमांसानभिज्ञाः क्रियापरत्वं सर्वस्यापि
वेदस्य वदन्तो मूर्खा एव" इत्यत्राणुभाष्यम् ।

कर्मस्वनुपयोगित्वं ब्रह्मज्ञानस्य ये पुनः ।
वदन्ति, तानपि ह्यज्ञानुवादोत्तरवादिनः ॥१३६॥

तथा हि–" उत्तरवादिनोऽपि पूर्वज्ञानमङ्गीकृत्य पूर्वानुपयोगित्वं ब्रह्मज्ञानस्य वदन्तो वेदानभिज्ञाः " । इत्यणुभाष्यमत्रत्यम् ।

यद्यप्येषा न मे वाणी परुषा वल्लभेरिता ।
भाति, किन्तु मतं त्वेतन्नितरामस्य रोचते ॥१३७॥

(अत्र यथार्थभाषिता श्रीमद्वल्लभानाम् ।)

तन्मते ब्रह्मणो ज्ञानं क्रियायामुपकारकम् ।
क्रिया च ब्रह्मणो ज्ञाने नितरामुपकारिका ॥१३८॥

ब्रह्मज्ञानात् परं कर्म कुर्वन् भयविवर्जितः ।
सरहस्यं समग्रस्य कर्मणः फलमश्नुते ॥१३९॥

क्रियाकलापः सकलः कल्पितो ब्रह्मवेदिभिः ।
ब्रह्मवेदी हि तेनाऽस्य रहस्यं ज्ञातुमर्हति ॥१४०॥

ब्रह्मज्ञानादपेतस्य कर्मश्रद्धाऽभिवृद्धये ।
अपूर्वस्वर्गनरकाः कल्पिता ब्रह्मवेदिभिः ॥१४१॥

अनन्तजीवनित्यत्वं धर्माधर्मौ प्रकल्प्य च ।
श्रूयन्ते रक्षितानीह कर्माणि ब्रह्मवेदेभिः ॥१४२॥

निष्फलं न च मन्येऽहं तेषु कर्मसु किञ्चन ।
येषां संरक्षणायैष यत्नो मुनिभिरादृतः ॥१४३॥

ब्रह्मविद् यदि कर्माणि कुर्वन्, मन्त्रार्थचिन्तने ।
रमेत, नूनमेवासौ ज्ञानविज्ञानवान् भवेत् ॥१४४॥

हस्तामलकवत्तस्य दैविकं भौतिकं तथा ।
समस्तमपि विज्ञानमुपकाराय संभवेत् ॥१४५॥

तान्त्रिकं मान्त्रिकं किञ्च रहस्यं चिन्तयन् बुधः ।
यदि कर्माणि कुरुते द्रुतं ब्रह्म स बुध्यते ॥१४६॥

अतः सर्वेषु वेदेषु व्यत्ययेनापि भाषितौ ।
काण्डावन्योन्यसाहाय्यकारिणावेव सम्मतौ ॥१४७॥

एवं श्रीवल्लभो वेदे काण्डद्वयभिदां पुरा ।
स्वीकृत्यापि तदन्योन्योपकारित्वं प्रशंसति ॥१४८॥

नन्वेवं पूर्वकाण्डेऽपि प्रस्तावो ब्रह्मणस्तथा ।
कर्मणामुत्तरे काण्डे प्रस्तावः किं न लभ्यते ॥१४९॥

इति चेद् भगवानादौ मनुरेव स्वयं प्रभुः ।
प्रास्तवीदुभयत्रैतदुभयं धर्मनिर्णये ॥१५०॥

नन्वेवं न स्वतन्त्रेण काण्डेनैकेन केनचित् ।
पुमर्थः सिद्धतां गच्छेन्मिथः साहाय्यकारणात् ॥१५१॥

इति चेदहमत्रार्थे सम्मतः किन्तु वल्लभाः ।
पुमर्थसिद्धौ नाभेदमङ्गीकुर्वन्ति काण्डयोः ॥१५२॥

(अथ प्रकृतानुसरणम्)

तैरेवमाग्रहेणैव शङ्करप्रतिवादिभिः ।
ब्रह्मणः समवायित्वं सूत्रेणानेन साध्यते ॥१५३॥

परस्परविरुद्धार्थवाचित्वेनावभासिनाम् ।
वचनानामनेनोक्तः शङ्करेण समन्वयः ॥१५४॥

तत्रैते विविधान् दोषान् समुद्भाव्य मनीषिणः ।
ब्रह्मणः समवायित्वसाधकं सूत्रमूचिरे ॥१५५॥

त एव पुनरस्थूलमनण्वादि श्रुतेर्वचः ।
उद्धृत्य समवायित्वे विरोधमुदभावयन् ॥१५६॥

विरुद्धसर्वधर्माणामुक्त्वा च पुनराश्रयम् ।
चक्रुर्विरुद्धवाक्यानां स्वयमेव समन्वयम् ॥१५७॥

तदेवं दूषयित्वाऽपि शङ्करस्य मतं पुरा ।
बलाद् भङ्ग्यन्तरेणैव तन्मतं मानयन्ति ते ॥१५८॥

किञ्च "ब्रह्म स्वयं स्वस्माद् भिन्नाञ्जीवजडादिकान् ।
सृजती"ति मतं तत्र वैषम्याद् गर्हयन्ति ते ॥१५९॥

"तत्तत्कर्मानुसारेण जीवानां सुखदुःखयोः ।
कारणं परमात्मे"ति मतं तेभ्यो न रोचते ॥१६०॥

तथात्वे परमेशस्य खण्ड्येत (भज्येत) परमेशता ।
विनश्येत् सर्वमाहात्म्यं स्वातन्त्र्यं कर्तृता तथा ॥१६१॥

(अत्र शङ्कराचार्यमतानुवादः ।)

कर्तृत्वं किञ्च भोक्तृत्वं मा भूद् ब्रह्मणि केवले ।
तदस्तु केवलं शुद्धं गुणकर्मविवर्जितम् ॥१६२॥

खपुष्पादेरवस्तुत्वान्न तत्कर्ता यथेप्सितः ।
प्रपञ्चस्याप्यवस्तुत्वात् तत्कर्तृत्वं न चिन्त्यताम् ॥१६३॥

विशेषादर्शनादेव रज्जौ सर्पभ्रमो यथा ।
ब्रह्मण्यविद्यया तद्वत् प्रपञ्चस्यास्तु सम्भ्रमः ॥१६४॥

तथा च समवायित्वसाधनाय परिश्रमः ।
व्यर्थ एव यतो मिथ्या कर्तृत्वं कर्मता तथा ॥१६५॥

(तत्खण्डनोपक्रमः)

इति शाङ्करसिद्धान्ते शास्त्रानर्थक्यमुक्तवान् ।
आसुरत्वं तथा वस्तुपरिच्छेदादसङ्गतिम् ॥१६६॥

वल्लभो निष्प्रपञ्चत्वं ब्रह्मणो वेदसम्मतम् ।
मत्वाऽपि तस्य कर्तृत्वं न निषेधति कुत्रचित् ॥१६७॥

अध्यारोपापवादेन श्रुतीनां यः समन्वयः ।
निर्गुणे ब्रह्मणि प्रोक्तः शङ्करेण महात्मना ॥१६८॥

तत्र वैमत्यमात्मीयं दर्शयन् वल्लभः प्रभुः ।
महासाहसिकान् प्राह शङ्करं च तदध्वगान् ॥१६९॥

तथा हि–" अतः स्वबुद्ध्या शास्त्रार्थं परिकल्प्य तत्र वेदं योजयन्तो महासाहसिकाः सद्भिरुपेक्ष्याः " । इतीहत्यमणुभाष्यम् ।

श्रुतीनामभिधेयार्थो ग्राह्यस्तत्र न लक्षणा ।
न व्यञ्जनाऽथवा ग्राह्या तात्पर्यार्थान्तरं न वा ॥१७०॥

भासमानो विरोधश्च श्रुतीनां स परस्परम् ।
ब्रह्मणो भूषणत्वेन ग्राह्य इत्याह वल्लभः ॥१७१॥

चेतो विशुद्धिं प्राप्नोति बहिरङ्गैः शमादिभिः ।
मनने च निदिध्यासे जाते श्रवणपूर्वके ॥१७२॥

ततः प्रादुर्भवत्यत्र स्वप्रकाशः स्वयं प्रभुः ।
तेन सायुज्यमेतेषां पुरुषार्थः परो मतः ॥१७३॥

तदेवं सर्ववेदान्तान् स्वार्थे युक्तान् प्रभाष्य सः ।
ब्रह्मणः समवायित्वसाधकं सूत्रमुक्तवान् ॥१७४॥

एवं श्रीवल्लभाचार्यमतमुक्त्वा स्वभाषया ।
श्रीमद्रामानुजाचार्यमतमप्यनुगद्यते ॥१७५॥

(इति श्रीमद्वल्लभाचार्यमतनिरूपणम् ।)

(अथ श्रीमद्रामानुजाचार्यमतानुवादः ।)

तत्तु समन्वयात् ॥ (१ अ. १ पा. ४ सू.)

ब्रह्म पक्षस्, तदित्येत् साध्यं, हेतुः समन्वयात् ।
तुकारश्च प्रसक्ताया आशङ्काया निवर्तकः ॥१७६॥

किञ्चित् प्रवर्तकं शास्त्रमास्तां किञ्चिन्निवर्तकम् ।
किन्त्वेकं तु ततो भिन्नमप्रवृत्तिनिवृत्तिकम् ॥१७७॥

वेदान्तशास्त्रमेकं तत् सिद्धस्यार्थस्य शासकम् ।
यन्न प्रवर्तकं, नापि क्वचिद् दृष्टं निवर्तकम् ॥१७८॥

तत्तु केवलमेकस्य सिद्धरूपस्य वस्तुनः ।
ब्रह्मणः प्रतिपादित्वाद् [1]अन्येषां मूर्धनि स्थितम् ॥१७९॥

ततो ब्रह्मेदमखिल – जगज्जन्मादिकारणम् ।
शास्त्रप्रमाणकं सिद्धं हेतोरत्र समन्वयात् ॥१८०॥

नानाविधानां वाक्यानामभिधेयः परात्परः ।
परमः पुरुषार्थोऽस्ति यो ब्रह्मेत्यभिधीयते ॥१८१॥

अभिधेयं परं ब्रह्म शास्त्रं तस्याभिधायकम् ।
अभिधेयाभिधायित्वसम्बन्धश्च समन्वयः ॥१८२॥

तस्मात् समन्वयाद् ब्रह्म नित्यं शास्त्रप्रमाणकम् ।
प्रमाणान्तरगम्यत्वमेतेनैतस्य वारितम् ॥१८३॥

अप्रवृत्तिनिवृत्त्यर्थे शास्त्रे सिद्धार्थवाचिनि ।
प्राप्ता निष्फलता चात्र तैरेवं विनिवार्यते ॥१८४॥

लोके सिद्धार्थवाचीनि वाक्यान्यपि पदे पदे ।
सफलान्येव दृष्टानि, निष्फलानि न कुत्रचित् ॥१८५॥

"जातोऽस्ति भवतः पुत्रः" – इति वस्त्वभिधायकम् ।
वचनं जनयत्येव पितुरानन्दमद्भुतम् ॥१८६॥

---

१. शास्त्राणामिति शेषः ।

"नायं सर्पः, परं रज्जु" – रिति वस्त्वभिधायकाद् ।
वचनाद् भीतभीतस्य भयं दूरात् पलायते ॥१८७॥

"भवतो वेश्मनः कोणे वर्तते निधिरव्ययः" ।
इति सिद्धवचः श्रुत्वा गृही हृष्टः प्रवर्तते ॥१८८॥

मार्गाद् भ्रष्टोऽपि, वर्षेभ्यः परं, राजसुतः पितुः ।
श्रुत्वाऽभियुक्तपुरुषात् प्रवृत्तिमतिहृष्यति ॥१८९॥

राजाऽपि तनयं ज्ञात्वा सर्वशास्त्रविशारदम् ।
जीवन्तमाप्तसर्वार्थ इव धावति तं प्रति ॥१९०॥

अतः प्रवर्तकं मास्तु, मास्तु शास्त्रं निवर्तकम् ।
तथापि पुरुषार्थेऽस्य सिद्धा पर्यवसायिता ॥१९१॥

न ह्युपच्छन्दनार्थानि वाक्यान्येतानि तन्मते ।
वाक्यार्थबोधे संवृत्ते ब्रह्मसद्भावनिश्चयात् ॥१९२॥

जाते वाक्यार्थबोधे तु यद्यभावोऽस्ति वस्तुनः ।
अप्रमाणं तदा वाक्यं तदुपच्छन्दनार्थकम् ॥१९३॥

युक्तास्तु श्रुतिवाक्यानामनुरोधेन केवलम् ।
सर्वज्ञं सिद्धसङ्कल्पं सत्यं ब्रह्म प्रपेदिरे ॥१९४॥

अतः शास्त्रमिदं सिद्धं सिद्धार्थप्रतिपादकम् ।
अप्रवृत्तिनिवृत्त्यर्थं सफलं सप्रयोजनम् ॥१९५॥

"क्षेत्रज्ञानामनन्तानामानन्दजनकं परम् ।
ब्रह्मास्ती "त्यत्र विहितं श्रुतिभिस्तदुपासनम् ॥१९६॥

ज्ञानध्यानादिकं चेदं तदुपासनसाधनम् ।
येनाऽऽप्नुवन्ति क्षेत्रज्ञा ब्रह्माऽऽनन्दं सनातनम् ॥१९७॥

एवमाभाष्य सूत्रस्य सारं श्रीरामबन्धुभिः ।
निष्प्रपञ्चपरब्रह्मविषयः खण्डितो विधिः ॥१९८॥

(निष्प्रपञ्चब्रह्मविषयकविधिखण्डनम् ।)

न हि वेदान्तवाक्यं ते विधिवाक्यतया क्वचित् ।
नियोजकतया किंवा स्वीकुर्वन्ति विपश्चितः ॥१९९॥

विधित्वे वा नियोगत्वे नियोज्यं, विषयस्तथा ।
इतिकर्तव्यता, कर्ता, करणं चास्त्यपेक्षितम् ॥२००॥

तदेतत् किञ्चिदप्यस्मिन् पक्षे नैव प्रसिध्यति ।
तस्मान्न विधिवाक्यत्वं श्रुतेः कस्याश्चनेष्यते ॥२०१॥

(ब्रह्मध्यानविषयकविधिखण्डनम् ॥)

"आत्मा वा अर" इत्यादौ वाक्ये यद्यपि दृश्यते ।
विधानं श्रवणस्यैवं मननध्यानयोरपि ॥२०२॥

तथापि नहि ते तस्य मन्वते विधिवाक्यताम् ।
विधित्वे तु निदिध्यासो विहितः स्यात् स्वभावतः ॥२०३॥

विहिते तु निदिध्यासे निदिध्यास्यमपेक्ष्यते ।
ध्येयं च तन्निदिध्यास्यं सदसद्वेति संशयः ॥२०४॥

यद्यसत् स्यान्निदिध्यास्यं तदा ध्यानं मृषा भवेत् ।
श्रवणं मननं बद्वद् असतः स्यादनर्थकम् ॥२०५॥

बालातुरेभ्यो वचनं यथोपच्छन्दनार्थकम् ।
मृषा भवति, तद्वद् भो, ध्यानवाक्यं मृषा भवेत् ॥२०६॥

सत्ये सति निदिध्यास्ये ध्येये वस्तुनि तु स्थिते ।
विधानं वा नियोगो वा निष्फलः सिद्धसाधनात् ॥२०७॥

असिद्धमेव विधिना साध्यते बहुसाधनम् ।
सिद्धं न साध्यतामेति विरोधात् सिद्धसाध्ययोः ॥२०८॥

यत् सिद्धं तन्न वै साध्यं, साध्यं सिद्धं न कुत्रचित् ।
सिद्धता साध्यता चेति द्वयं नैकत्र तिष्ठति ॥२०९॥

तस्मान्न ध्यानविधिना लब्धवन्त्येकवाक्यताम् ।
प्रमाणं ब्रह्मवाक्यानीत्येष तेषां विनिर्णयः ॥२१०॥

वेदान्तशास्त्रं सकलं स्वतन्त्रं ब्रह्मबोधकम् ।
अतो ब्रह्मेह गदितं स्वतः शास्त्रप्रमाणकम् ॥२११॥

अविद्यामूलतामुक्त्वा भेदज्ञानस्य तैः पुनः ।
खण्डितं भास्करप्रोक्तं भेदाभेदात्मकं मतम् ॥२१२॥

"वेदान्तोक्तपदार्थस्य यज्ञार्थज्ञानमात्रतः ।
प्रतिबन्धा निवर्तन्ते नित्यो मोक्षश्च सिध्यति ॥२१३॥

अनुत्पाद्यस्तथाऽप्राप्यो मोक्षोऽयं निगमोदितः ।
अविकार्यस्तथैवायमसंस्कार्योऽपि सम्मतः ॥२१४॥

अतश्चायमसाध्योऽस्ति नित्यो मोक्षः सनातनः ।
न हि वेदान्तवाक्यार्थज्ञानादेष प्रसिध्यति ॥२१५॥

वेदान्तोक्तपदार्थस्य ज्ञानात्तु विनिवर्तते ।
प्रतिबन्धस्ततो मोक्षः स्वयं सिद्धोऽनुभूयते" ॥२१६॥

इत्येष यश्च सिद्धान्तः शङ्कराचार्यसम्मतः ।
सोऽपि तैः खण्डयाञ्चक्रे ध्यानविध्यनुसारिभिः ॥२१७॥

ध्यानविध्येकवाक्यत्वं खण्डयित्वा ततः स्तुतम् ।
ब्रह्मप्राप्तेरुपायत्वं ध्यानोपासनकर्मणाम् ॥२१८॥

मत्वापि पूर्वमीमांसां पूर्वाङ्गं जैमिनीरिताम् ।
व्यासोक्तामुत्तराङ्गं च चतुरध्यायसम्मिताम् ॥२१९॥

अहो ते विधिवाक्यैकवाक्यतायास्तु खण्डने ।
तथा प्रवृत्ता अभवन् यथा श्रीशङ्करोऽभवत् ॥२२०॥

अतः श्रीशङ्कराचार्यमतमप्यत्र सङ्ग्रहात् ।
निर्वाच्यमिति तत्प्रोक्तं यथामति निरुच्यते ॥२२१॥

(अत्र श्रीमच्छङ्कराचार्यमतानुवादः ॥)

सर्वज्ञं सर्वजगतामुद्भवादेश्च कारणम् ।
यद् ब्रह्म, तदिह प्रोक्तं [1]तदा पक्षतयेप्सितम् ॥२२२॥

शास्त्रप्रमाणकत्वं च साध्यमत्र विवक्षितम् ।
अनुक्तमपि तत्साध्यमध्याहार्यं तथेष्यते ॥२२३॥

समन्वयादिति पदं हेतोरस्ति निदर्शकम् ।
अतस्तद् ब्रह्म वेदान्तैर्वेद्यं तत्र समन्वयात् ॥२२४॥

प्रमाणान्तरवेद्यत्वं तुकारेण निवार्यते ।
वेदान्तानां [2]तथाऽन्यार्थपरत्वमपि वार्यते ॥२२५॥

सर्ववेदान्तवाक्यानां तात्पर्यं ब्रह्मणि स्थितम् ।
समन्वितानि दृष्टानि यतो ब्रह्मणि केवले ॥२२६॥

न हि कस्यचिदप्यत्र कर्तृत्वं कर्मता तथा ।
श्रुतिवाक्येन केनापि कथञ्चित् प्रतिपाद्यते ॥२२७॥

तथा हि–" न च तेषां कर्तृस्वरूपप्रतिपादनपरताऽवसीयते, – तत्केन कं पश्येत् – इत्यादिक्रियाकारकफलनिराकरणश्रुतेः "
इति व्याख्यात्रयोपेतश्रीभाष्यपुस्तकस्य ६३ पृष्ठे ॥

तत्केन कमिति श्रुत्या कारकत्वं निषिध्यते ।
सर्वब्रह्मात्मभावश्च विशेषेणावगम्यते ॥२२८॥

---

१. तच्छब्देनेत्यर्थः । २. तुनाऽन्यार्थः ।

परिनिष्ठितसद्वस्तुरूपे ब्रह्मणि सत्यपि ।
अज्ञानाद् भिन्नता लोके भासते ब्रह्मजीवयोः ॥२२९॥

तयोरभेदश्चैकत्वं सिद्धान्ते ब्रह्मजीवयोः ।
तत्त्वमस्यादिवाक्येभ्यः केवलेभ्यः प्रजायते ॥२३०॥

नानुमानं तथा किञ्चित् प्रत्यक्षं तादृगीक्षितम् ।
येनाभेदस्तथैकत्वं ज्ञायेत ब्रह्मजीवयोः ॥२३१॥

अतो ब्रह्मात्मभावोऽयं शास्त्रेणैवावबुध्यते ।
शास्त्रमात्रप्रमाणत्वं ब्रह्मणस्तेन सिध्यति ॥२३२॥

ब्रह्मात्मभावबोधाद्धि क्षीयन्ते क्लेशराशयः ।
सर्वक्लेशक्षयश्चैष पुरुषार्थस्य साधकः ॥२३३॥

मा भूद् ब्रह्म ततो हेयमुपादेयं तथापि तद् ।
विज्ञातं पुरुषार्थस्य साधनायाऽलमिष्यते ॥२३४॥

[1]हेयोपादेयशून्यत्वाद् उपास्यत्वमपि श्रुतम् ।
अभेदबोधकं ज्ञेयं जीवात्मपरमात्मनोः ॥२३५॥

लोकसिद्धे ह्युपास्यत्वे ब्रह्मण्यङ्गीकृते तु भोः ।
उपासकानां पार्थक्यमङ्गीकार्यमुपास्यतः ॥२३६॥

तथात्वे चाद्वितीयत्वमभेदश्च श्रुतौ श्रुतः ।
व्याहन्येत, न कस्यापि यश्चेष्टो धिषणावतः ॥२३७॥

---

१. "हानोपादानशून्यत्वाद्" – इति श्रीमद्भारतीकृष्णतीर्थशङ्कराचार्य-चरणसम्मतः पाठः ।

तस्मात्सर्वेऽपि वेदान्ताः केवलैकत्वबोधने ।
ब्रह्मणः पर्यवस्यन्ति यन्मानान्तरदुर्गमम् ॥२३८॥

(अत्र श्रीमन्मीमांसकाचार्याः)

केचिन्मीमांसकाचार्या मन्त्रब्राह्मणपूर्वकम् ।
समग्रोपनिषद्भागं प्राहुराम्नायसंज्ञकम् ॥२३९॥

तस्मिन्नाम्नायवाच्येऽर्थे श्रुतयोऽन्तर्भवन्त्यतः ।
तासां श्रुतीनां सार्थक्यं क्रियार्थत्वाद् ब्रुवन्ति ते ॥२४०॥

जिज्ञासितव्योऽन्वेष्टव्यः श्रोतव्यश्चेति शासनैः ।
क्रियाभाव्यं क्रियासाध्यं ब्रह्मात्मानं वदन्ति ते ॥२४१॥

श्रवणान्मननाच्चैव निदिध्यासाद् विशेषतः ।
ब्रह्म भाव्यमुपास्यं च धर्मकार्यमुशन्ति ते ॥२४२॥

ज्ञानादिविधिशेषत्वमुक्त्वैवं ब्रह्मणि स्थिरे ।
जीवब्रह्मात्मभावस्य भावत्वं भावयन्ति ते ॥२४३॥

एवं ते पूर्वमीमांसाक्रममाश्रित्य केवलम् ।
सर्ववेदान्तशास्त्राणां समीहन्ते समन्वयम् ॥२४४॥

(अत्र मीमांसकमतखण्डनम् ।)

तत्र प्रत्यवतिष्ठन्ते शङ्कराचार्यसूरयः ।
तानेवानुसरन्तश्च सन्ति रामानुजादयः ॥२४५॥

प्रख्यापयितुमात्मीयमुत्कर्षं किन्तु कञ्चन ।
क्वचित् क्वचित्ते वैमत्यमपि प्राचीकटन्निजम् ॥२४६॥

ते ब्रह्मपक्षमाक्षिप्य सूत्रस्थेन तदा पुनः ।
शास्त्रप्रमाणकत्वं हि साध्यमाहुर्मनीषिणः ॥२४७॥

शङ्करस्तु [1]तदा ब्रह्म पक्षमुक्त्वैव केवलम् ।
साध्यं शास्त्रप्रमाणत्वमाक्षेपेणाधिगच्छति ॥२४८॥

तदेवं मतभेदं स्वं समुद्भाव्यापि शाङ्करे ।
शास्त्रप्रमाणकत्वे तु सम्मता रामबन्धवः ॥२४९॥

शङ्करोक्तदिशैवैते ब्रह्मणः शास्त्रगम्यताम् ।
निरुच्य, विधिशेषत्वं दूषयामासुरादरात् ॥२५०॥

दूषणप्रक्रिया सा च पूर्वमुक्ताऽप्यनूदिता ।
पुनरत्र समासेन यथामति निरूप्यते ॥२५१॥

धर्मे ब्रह्मात्मभावे च वर्तते महदन्तरम् ।
अतो न धर्ममीमांसा ब्रह्मभावोपकारिणी ॥२५२॥

धर्ममीमांसया पूर्वं कार्यरूपं निरूप्यते ।
निरूपितक्रमेणैव ततः कार्यं विधीयते ॥२५३॥

कर्मणां साध्वनुष्ठानात् परं धर्मः प्रजायते ।
स धर्मः सुखरूपं च प्रसूते क्षणिकं फलम् ॥२५४॥

---

१. तदा = तच्छब्देन ।

धर्मज्ञानमनुष्ठानं धर्मस्तज्जं सुखादिकम् ।
तदेवं सकलं भाव्यं जन्यं नश्यं च सिध्यति ॥२५५॥

जीवब्रह्मात्मभावस्तु तादृशो नैव विद्यते ।
न भाव्यते न केनापि जन्यते नापि नश्यति ॥२५६॥

नित्यामभाव्यां तामेतां जीवब्रह्मात्मभावनाम् ।
नैवानुशास्ति कुत्रापि श्रुतिर्भावयितुं पराम् ॥२५७॥

यत्र यत्र च विध्यर्थाः प्रत्ययाः श्रुतिगोचराः ।
तत्र सर्वत्र ते सर्वे विधिसारूप्यबोधकाः ॥२५८॥

विधिसारूप्यमेतच्च सिद्धार्थस्यानुवादकम् ।
सिद्धार्थस्यानुवादित्वे भाव्यत्वं च निवर्तते ॥२५९॥

जिज्ञासितव्यो द्रष्टव्यः श्रव्यश्चेत्येवमादयः ।
प्रयोगाः ख्यापयन्त्येकमभेदं ब्रह्मजीवयोः ॥२६०॥

तज्जीवब्रह्मणोरैक्यं जीवब्रह्मात्मभावनम् ।
नित्यो मोक्षो, न सा सम्पद् न चाध्यासो न संस्कृतिः ॥२६१॥

न स कार्यो न वा वेद्यो दृश्यो वाच्योऽपि नास्त्यसौ ।
नोपासनीयो नाराध्यः साध्यो बाध्यो न कस्यचित् ॥२६२॥

नोत्पाद्यो न विकार्यश्च ध्येयो गेयो न कस्यचित् ।
नैवाप्यो नैव संस्कार्यो ब्रह्मभावः सनातनः ॥२६३॥

ब्रह्मभावो हि वेदान्ते मोक्षः प्राज्ञैः प्रकीर्तितः ।
व्यक्तितन्त्रो न चाप्येष विधितन्त्रो न वा क्वचित् ॥२६४॥

सिद्धवस्तुस्वरूपस्य ब्रह्मभावस्य भावनाम् ।
उत्पादयितुमेतन्नः कथं शास्त्रं प्रवर्तयेत् ॥२६५॥

अतो हि यत्र कुत्रापि विध्यर्थः प्रत्ययो भवेत् ।
भावनोत्पादनार्थत्वं ततस्तस्य निवार्यताम् ॥२६६॥

सिद्धवस्तुप्रशंसायां प्रयुक्त इति बुध्यताम् ।
सिद्धश्च केवलो ब्रह्मभाव इत्यवधार्यताम् ॥२६७॥

यथा ह्युपलशैलेषु सम्प्रयुक्ताः क्षुरादयः ।
कुण्ठीभवन्ति तद्वद् भो ब्रह्मभावे लिङादयः ॥२६८॥

सदासिद्धात्मनि ब्रह्मभावे नैव लिङादयः ।
विधिज्ञानविधिज्ञान् वा प्रवर्तयितुमीशते ॥२६९॥

विधिच्छायामुपेतास्ते लोकानथ बहिर्मुखान् ।
कृत्वा त्वन्तर्मुखान् बाढं व्रजन्ति कृतकृत्यताम् ॥२७०॥

ननुशास्त्रप्रमेयत्वं ब्रह्मणः प्राक् प्रतिश्रुतम् ।
सूत्रेण शास्त्रयोनित्वादित्येतेन विशेषतः ॥२७१॥

तत् कथं तदवेद्यं स्यान्न च स्याद् विषयो धियः ।
इति चेदुच्यते, शास्त्रं न साक्षाद् ब्रह्मबोधकम् ॥२७२॥

अज्ञानाद् भासमानानां पदार्थानां विभिन्नताम् ।
साक्षात् स्वभावतः शास्त्रं निवर्तयति कल्पिताम् ॥२७३॥

निवृत्ते भेदभावे च सर्वोपादानकारणम् ।
केवलं सकलं ब्रह्म स्वयमेव विराजते ॥२७४॥

अमी सर्वेऽपि वेदान्ता अहङ्कारात् समुत्थितान् ।
कल्पितान् सकलान् भेदान् निरस्यन्ति समन्विताः ॥२७५॥

ततश्च ब्रह्मभावोऽयं स्वयमेव प्रकाशते ।
अतः शास्त्रप्रमेयत्वं ब्रह्मणः प्रतिपाद्यते ॥२७६॥

सिद्धवस्तुस्वरूपस्य ब्रह्मणश्चास्य मानसः ।
प्रत्ययोऽनुभवो वा यः स प्रकाश उदीर्यते ॥२७७॥

निर्मले द्वैतरहिते तस्मिन् मनसि दर्पणे ।
स्वाभाविकोऽयमुदितः प्रकाशो ज्ञानमुच्यते ॥२७८॥

तज्ज्ञानं न क्रियातन्त्रं व्यक्तितन्त्रं न विद्यते ।
न क्वचिद् विधितन्त्रं वा, वस्तुतन्त्रं हि केवलम् ॥२७९॥

तद् वस्तु केवलं ब्रह्म स्वतःसिद्धं सनातनम् ।
न शेषतामिदं याति विधिवाक्यस्य कस्यचित् ॥२८०॥

केवलोपनिषद्वाक्यैरस्य कूटस्थनित्यता ।
एकता, समता, सर्वभूतस्थत्वं च बुध्यते ॥२८१॥

शुद्धबुद्धसदामुक्तस्वभावमिदमव्ययम् ।
वेदवेद्यमतः सिद्धं सर्वोपनिषदीरितम् ॥२८२॥

"रज्जुरेषा, न सर्पोऽयम् ", इति वाक्यं यथा भयम् ।
तथैव भूतवस्तूक्तिः संहरेन्मानसं भ्रमम् ॥२८३॥

"अहमस्मि", "ममेदं च शरीरम्" – इति कल्पना ।
तत्त्वमस्यादिभिर्वाक्यैः समूलं विनिहन्यते ॥२८४॥

समूलं हन्यमानायां कल्पनायां तु तादृशि ।
जीवतः सशरीरस्याप्यशरीरत्वमिष्यते ॥२८५॥

ब्रह्मविज्जायते ब्रह्म ब्रह्मैवेदं तथाऽखिलम् ।
अहंममेति धीस्तस्य ब्रह्मज्ञस्य कथं भवेत् ॥२८६॥

'अहमस्मि' 'शरीरं मे' – इत्याद्याः प्रत्ययाः सतः ।
नश्यन्ति जीवतस्तस्माद् – अशरीरः स उच्यते ॥२८७॥

सुखिते दुःखिते वाऽस्मिञ् शरीरे ब्रह्मवेदिनः ।
हर्षः शोकोऽथवा नैव कदाचिदपि तं स्पृशेत् ॥२८८॥

अतोऽशरीरत्वमतिर्मोक्षः शास्त्रेषु गीयते ।
शरीरत्वमतेः किं वाऽप्यभावो मोक्ष ईर्यते ॥२८९॥

शरीरित्वमतिर्नाऽभूत् प्राक् शरीरस्य सम्भवात् ।
ध्वंसात् परं शरीरस्य सा च दृष्टा न कुत्रचित् ॥२९०॥

शरीरसम्भवात् पश्चात् क्रमशश्च शनैः शनैः ।
'अहं, मम शरीरं चे' – त्येवं भावा भवन्ति नः ॥२९१॥

अतो हि यस्य नैवास्ति 'अहं देही'ति भावना ।
स बालो गृहमध्यस्थान्न बिभेति हुताशनात् ॥२९२॥

सोऽयं भावः 'शरीरी'ति तावदेवात्र तिष्ठति ।
यावन्न विलयं यान्ति क्षीणाः प्राणादिवायवः ॥२९३॥

प्राणादिषु विनष्टेषु वायुष्वपि च देहतः ।
'ममायं देह' इत्येवं न धीः कस्यापि लक्षिता ॥२९४॥

अतः खनन्ति तं केचिन्निर्दहन्ति च केचन ।
केचिच्च कुर्वते भक्ष्यं कुम्भीरपशुपक्षिणाम् ॥२९५॥

एतेनाहं शरीरीति भावना न सनातनी ।
आदौ नास्ति न चान्तेऽस्ति मध्ये भ्रान्त्यैव भासते ॥२९६॥

तस्माद् यस्तु विशेषज्ञो ब्रह्म जानाति मानवः ।
शरीरित्वमतेर्लोपात् स जीवन्नेव मुच्यते ॥२९७॥

तस्मान्मोक्षोऽशरीरत्वं जीवतोऽपि प्रसिध्यति ।
स नित्यो, न समुत्पाद्यः कर्तव्यो न क्रियाशतैः ॥२९८॥

(पूर्वपक्षः)

ज्ञाते ब्रह्मणि, नष्टायां क्रियेच्छायामकर्मकृत् ।
न जह्यान्नाप्युपादद्यात् किञ्चित् कर्मपराङ्मुखः ॥२९९॥

एवं कर्तव्यताहानौ पतितो ब्रह्मविद् भवेत् ।

(उत्तरः पक्षः)

इति चेन्न तथा वाच्यं साऽवस्था स्तूयते श्रुतौ ॥३००॥

आत्मरूपस्य विज्ञाता ब्रह्मविद् ब्रह्मणि स्थितः ।
निरीहो नैव कामाय कस्मैचित् स प्रवर्तते ॥३०१॥

अतो हि कृतकृत्योऽसौ गीतायां गदितः पुमान् ।
सर्वकर्तव्यताहानिरलङ्कारश्च तद्विदः ॥३०२॥

तस्मान्न कस्यापि विधेर्विषयो ब्रह्म जायते ।
ब्रह्मज्ञाने न कस्यापि कर्मणश्चास्त्यपेक्ष्यता ॥३०३॥

(ब्रह्मणः केवलोपनिषद्गम्यत्वम्)

प्रवर्तकविधेः क्वापि निवर्तकविधेस्तथा ।
शेषत्वं ब्रह्मणः काऽपि नैवोपनिषदाह नः ॥३०४॥

यमाहोपनिषद् ब्रह्म स पुमाँस्तु विलक्षणः ।
सर्वसाक्षी समश्चैको नित्यः कूट इव स्थितः ॥३०५॥

सर्वभूतस्थितः सोऽसौ नैवाऽन्यत्र क्वचित् स्तुतः ।
केवलोपनिषद्भागे स्तूयमानः स दृश्यते ॥३०६॥

तादृशस्यास्य सत्तां च प्रतिवक्तुं क ईश्वरः ।
यस्तूपनिषदः सर्वा आम्नायत्वेन मन्यते ॥३०७॥

स पुमानविनाशी च विक्रियाहेतुवर्जितः ।
नित्यः शुद्धश्च बुद्धश्च मुक्तश्चास्ति स्वभावतः ॥३०८॥

नहि तस्मात् परं किञ्चित् स सर्वेषां गतिः परा ।
नैवाहंप्रत्ययज्ञेयस्तत्साक्षित्वेन वर्णनात् ॥३०९॥

तमौपनिषदं प्राहुराचार्याः पुरुषं परम् ।
नैवोपनिषदोऽन्यत्र दृश्यते वर्णनं यतः ॥३१०॥

(उपनिषदां क्रियार्थत्वाभावः)

त्यक्त्वोपनिषदां भागमाम्नायाऽन्यः क्रियार्थकः ।
नैवोपनिषदाम्नायः क्रियार्थः कैश्चिदिष्यते ॥३११॥

स तूपनिषदाम्नायो ब्रह्मात्मानं निराकुलम् ।
तथैवोपदिशन् भाति येनाज्ञानं निवर्तते ॥३१२॥

संसारबन्धहेतुर्यो ह्यहङ्कारोऽतिदुःखदः ।
तन्निवर्तनमेवास्य प्रयोजनमुदीर्यते ॥३१३॥

एवंभूताऽऽत्मतत्त्वस्य ह्युपदेशोऽयमस्ति यः ।
सार्थकः स तु विज्ञेयः क्रियासाधनवस्तुवत् ॥३१४॥

"ब्राह्मणो नैव हन्तव्यः" – इति वाक्यं यथाऽर्थवत् ।
भूतवस्तूपदेशोऽपि तथा भवति [1]चार्थवान् ॥३१५॥

---

१. "सार्थकः" इति पाठान्तरम् ।

पुरुषार्थोपयोगीनि ह्युपाख्यानान्यपीह तु ।
सार्थकान्येव बोध्यानि न निरर्थानि कानिचित् ॥३१६॥

"रज्जुरेषा, न सर्पोऽयम्" – इति वस्तूपदेशनम् ।
सप्रयोजनमेवास्ति सर्पभीतेर्निवारणात् ॥३१७॥

तथाऽऽत्मवस्तुमात्रस्य भूतस्यात्रोपदेशनम् ।
सप्रयोजनमेवास्ति – ह्यहङ्कारनिवर्तनात् ॥३१८॥

विज्ञातब्रह्मभावस्य [1]ह्यहङ्कारो निवर्तते ।
अहंकारी न जानाति, शुद्धब्रह्मात्मभावनाम् ॥३१९॥

सर्पबुद्ध्या पुरा भीतो रज्ज्वा अपि सुमन्दधीः ।
विज्ञातायां यथा रज्ज्वां न बिभेति मनागपि ॥३२०॥

तथाऽहंकारवाञ्जीवस्तावदेवात्र दूयते (खिद्यते) ।
यावन्न स ह्यहंकारं ब्रह्मभावेन मुञ्चति ॥३२१॥

धनापहारे धनिकः खिद्यमानो हि दृश्यते ।
स एव त्यक्तसंसर्गो निर्धनोऽपि प्रसीदति ॥३२२॥

कुण्डलाभ्यां यथा बालः सुखी लोके प्रदृश्यते ।
ताभ्यां विनाऽप्यसौ प्राज्ञः किं न सौख्यं समश्नुते ॥३२३॥

तथाऽहंकारवान् प्राणी श्रुत्याऽर्थस्यानुचिन्तनात् ।
जीवसत्तां मृषा ज्ञात्वा ब्रह्मात्मैकत्वमृच्छति ॥३२४॥

---

१. "संसारित्वम्" इति पाठान्तरम् ।

सक्रियं सविकारं च सगुणं ब्रह्म वेत्ति सः ।
अधिष्ठानं परं ब्रह्म निर्गुणं चापि वेत्त्यसौ ॥३२५॥

तस्यास्य ज्ञानिनः पुंसः सकलानर्थकारकः ।
अहंकारः क्षयं याति जीवभावश्च जीवतः ॥३२६॥

सशरीरोऽपि जीवन् स ह्यशरीरस्तदोच्यते ।
न प्रियं चाप्रियं चोभे स्पृशतस्तं कदाचन ॥३२७॥

अशरीरत्वमेवात्र मोक्षः प्राज्ञैरुदीरितः ।
वासनाक्षयमात्रेण स च मोक्षः प्रसिध्यति ॥३२८॥

अत एव शरीरेऽस्मिन् स्थितेऽपि परमर्षिभिः ।
जीवन्मुक्तिः स्वकैः शब्दैः स्फुटाऽस्ति परिभाषिता ॥३२९॥

तथा हि–"सर्वत्र सर्वदा सर्वब्रह्ममात्रावलोकनात् ।
सद्भाववासनादार्ढ्यात् तत् त्रयं लयमश्नुते ॥
क्रियानाशे भवेच्चिन्तानाशोऽस्माद्वासनाक्षयः ।
वासनाप्रक्षयो मोक्षः सा जीवन्मुक्तिरिष्यते" ॥
(इति विवेकचूडामणिः)

अहंभावप्रधानेन कृतयोः पुण्यपापयोः ।
शरीरेणैव सम्बन्धः क्षयिणा, नान्तरात्मना ॥३३०॥

न कर्ता पुण्यपापानामात्माऽन्यः कोऽपि देहतः ।
देह एवाऽवतिष्ठन्ते समवेताः समाः क्रियाः ॥३३१॥

अतो हि धर्माधर्माणां कर्ता देहो हि केवलः ।
नैव कर्ता न वा भोक्ता देहाद् भिन्नोऽत्र कश्चन ॥३३२॥

देहो जन्यो विनाशी च परिणामी प्रतिक्षणम् ।
तस्य धर्मा गुणाश्चापि तथा जन्या विनाशिनः ॥३३३॥

जीवात्मानस्ततो भिन्ना अजन्याश्चाविनाशिनः ।
न सन्ति, केवलस्यैव ब्रह्मणः प्रतिपादनात् ॥३३४॥

ब्रह्मैवात्मा स चैकोऽस्ति नित्यः सर्वगतो विभुः ।
शुद्धो बुद्धः स्वयं मुक्तो निःसङ्गस्तैः क्रियाश्रयैः ॥३३५॥

उपादानात्मकं ब्रह्म देहरूपेण भासते ।
स चाभासो द्विधा लोके विनश्यन्निह दृश्यते ॥३३६॥

ब्रह्मभावस्य विज्ञानाद् देहाभासो विनश्यति ।
देहध्वंसात्तथाऽऽभासः स एष च विनश्यति ॥३३७॥

देहाभासे विनष्टेऽस्मिन् न प्रियाप्रिययोरिह ।
अनुमन्ताऽनुभविता वस्तुरूपोऽवशिष्यते ॥३३८॥

अतः श्रीशङ्कराचार्यसिद्धान्तेनापि सिध्यति ।
सकृज्जन्म सकृन्मृत्युः, न पुनर्जन्म कस्यचित् ॥३३९॥

अपरोक्षानुभूत्यादावत एव स्फुटैः पदैः ।
प्रारब्धं खण्डितं, मूलं यत्पुनर्जन्मनः श्रुतम् ॥३४०॥

तथा हि—" कर्म जन्मान्तरीयं यत् प्रारब्धमिति कीर्तितम् ।
तत्तु जन्मान्तराभावात् पुंसो नैवाऽस्ति कर्हिचित् ॥

स्वप्नदेहो यथाऽध्यस्तस्तथैवायं हि देहकः ।
अध्यस्तस्य कुतो जन्म जन्माभावे हि तत् कुतः ॥

देहस्यापि प्रपञ्चत्वात् प्रारब्धावस्थितिः कुतः ।
अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः "
(अपरोक्षानुभूत्याम्)

" कर्मणा निर्मितो देहः प्रारब्धं तस्य कल्प्यताम् ।
नाऽनादेरात्मनो युक्तं नैवाऽऽत्मा कर्मनिर्मितः " ॥
(विवेकचूडामणिः)

" अजो नित्यः शाश्वत इति ब्रूते श्रुतिरमोघवाक् ।
तदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना ॥

प्रारब्धं सिध्यति तदा यदा देहात्मना स्थितिः ।
देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः ॥

शरीरस्यापि प्रारब्ध – कल्पना भ्रान्तिरेव हि ।
अध्यस्तस्य कुतः सत्त्वमसत्त्वस्य कुतो जनिः ॥

तिष्ठत्ययं कथं देह इति शङ्कावतो जडान् ।
समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः " ॥
(विवेकचूडामणिः)

न केवलाद्धि श्रवणात् केवलान्मननान्न वा ।
न केवलान्निदिध्यासाज् ज्ञानमेकं प्रकाशते ॥३४१॥

श्रवणं मननं चैतन्निदिध्यासनमेव च ।
संहतं ज्ञानमत्राहुः स्वयं तच्च प्रकाशते ॥३४२॥

विध्यर्थाः प्रत्ययास्त्वत्र प्रायोऽर्हत्वे प्रयोजिताः ।
अतो न विधिशेषत्वकल्पनावसरो मनाक् ॥३४३॥

अतो न पूर्वमीमांसा ब्रह्मरूपनिरूपणे ।
समर्थेति पृथक् शास्त्रं बादरायणनिर्मितम् ॥३४४॥

तदीयेन चतुर्थेन सूत्रेणैतच्च गम्यते ।
सर्वोऽप्युपनिषद्भागः केवलो ब्रह्मबोधकः ॥३४५॥

निर्विवक्षितमत्रास्ति यत्तु ब्रह्म सनातनम् ।
शास्त्रमात्रप्रमाणेन तत्तु गम्यं, न चान्यथा ॥३४६॥

शास्त्रत्वेनोपनिषदः सङ्ग्राह्याश्च विशेषतः ।
इत्येतेषां मतं भाति मन्त्राश्चापि तदर्थकाः ॥३४७॥

इत्येवं शङ्कराचार्यमतमत्र यथामति ।
अनूद्य किञ्चित् संक्षिप्य स्वमतं च प्रकाशये ॥३४८॥

(अथात्र स्वमतम्)

(तत्रादौ जैमिनिजिनवादौ)

यावन्तश्चेष्टया युक्ताः सन्ति देहा भुवस्तले ।
तावन्तश्च ततोऽप्यन्ये जीवाः सन्ति जगत्त्रये ॥३४९॥

स्वैः स्वैः कर्मभिरेते च पुण्यैः पापैरनुष्ठितैः ।
स्वर्गादीन्नरकादींश्च लोकानधिवसन्ति ते ॥३५०॥

ते जीवास्ते तथा लोका विविधास्ताश्च योनयः ।
नित्याः सन्तीति संसारो घटितस्तैः सनातनः ॥३५१॥

वेदोक्तकर्मकरणादपूर्वस्य च भावनात् ।
स्वर्गादीँल्लभते जीव इति मीमांसका जगुः ॥३५२॥

विधीनामिह केषाञ्चिद् वेदा दृष्टाः प्रवर्तकाः ।
केषाञ्चिच्च तथा दृष्टा गर्हितानां निवर्तकाः ॥३५३॥

विहितानामनुष्ठानान्मृत्योः पश्चात् स्वरादयः ।
निषिद्धानामनुष्ठानान्नरको मरणात् परम् ॥३५४॥

न स्वर्गादुत्तमं किञ्चिल्लभ्यं वैदिककर्मणा ।
नरकान्न परं किञ्चिद् गर्हितं पापकर्मणा ॥३५५॥

तावुभौ स्वर्गनरकौ लभ्येते मरणात्परम् ।
न तौ केनापि जीवेन भुज्येते त्वत्र जीवता ॥३५६॥

किञ्चाधिकारी वेदस्य द्विजन्मैव निरूपितः ।
द्विजन्मनोऽतिरिक्तस्य नाधिकारोऽस्ति वैदिके ॥३५७॥

कुर्वन्नपि द्विजन्माऽसौ सकलं कर्म वैदिकम् ।
अपूर्वं भावयित्वाऽन्ते मृत्यौ स्वर्गं समश्नुते ॥३५८॥

क्षीणपुण्यः पुनर्जीवो मर्त्यलोकमुपाश्नुते ।
नैकान्तिकात्यन्तिकोऽसौ मोक्षो विप्रस्य सिध्यति ॥३५९॥

(अथ जिनमतानुवादः)

एतस्माद् वैदिकान्मार्गात् प्रेष्ठः श्रेष्ठश्च वर्तते ।
जिनमार्गो यमाश्रित्य मोक्षमर्हन्ति देहिनः ॥३६०॥

न केवलं द्विजस्यैव सर्वेषामेव देहिनाम् ।
अत्राधिकारो मोक्षेऽस्ति यश्चाऽऽम्नायान्न सिध्यति ॥३६१॥

आम्नायः सकलः प्रोक्तः क्रियार्थः कर्मबोधकः ।
अक्रियार्थस्य सर्वस्य प्रोक्ताऽनर्थकतर्षिणा ॥३६२॥

आम्नायस्य समग्रस्य कर्मण्येवावसादनम् ।
कर्ममात्रं च जीवानां बन्धनाय, न मुक्तये ॥३६३॥

कायेन मनसा वाचा यद् यत् कर्म कृतं भवेत् ।
तत्सर्वं जिनशास्त्रेऽस्मिन् योग आस्रव उच्यते ॥३६४॥

तथा हि–" कायवाङ्मनःकर्म योगः" " स आस्रवः" (तत्त्वार्थ० ६ अ. १–२ सूत्रे)

योगस्य बन्धहेतुत्वं मिथ्यात्वादेरिवेरितम् ।
कर्मानुरूपदेहस्य प्राप्तिर्बन्धस्तथेरितः ॥३६५॥

तथा हि–" मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः " (तत्त्वार्थ० ८ अ. १ सू.)

तस्यास्रवस्य योगस्य निरोधः संवरः स्मृतः ।
गुप्त्या समित्या धर्मेण साध्योऽनुप्रेक्षणेन सः ॥३६६॥

परीषहजयेनैवं चारित्रेण ततः परम् ।
तपोभिश्च विशेषेण संवरः स प्रजायते ॥३६७॥

तथा हि–" आस्रवनिरोधः संवरः " (तत्त्वार्थ० ९ अ. १ सू.)॥
" स गुप्ति–समिति – धर्मानुप्रेक्षापरीषहजयचारित्रैः "
(तत्त्वार्थ० ९ अ. २ सू.) " तपसा निर्जरा च "
(तत्त्वार्थ० ९ अ. ३ सू.)

ततश्च निर्जरा, पश्चाद् मोक्षो जीवस्य सिध्यति ।
दर्शनज्ञानचारित्र – सम्यक्त्वं यस्य साधकम् ॥३६८॥

मोहक्षयात्तथा ज्ञानदर्शनावरणक्षयात् ।
अन्तरायक्षयाच्चास्य केवलत्वं प्रसिध्यति ॥३६९॥

तथा हि–" मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् "
(तत्त्वार्थ० १० अ. १ सू.)

बन्धहेतोरभावेन निर्जरायाश्च सम्भवात् ।
मुक्तो जीवः प्रयात्युच्चैरालोकान्तमबाधितः ॥३७०॥

तथा हि–" बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः "
(तत्त्वार्थ० १० अ. २ सू.)

तथा हि–" तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् " । (तत्त्वार्थ० १० अ. ५ सू.)

न स मुक्तः कदाप्येतं लोकाकाशं भवाभिधम् ।
लाघवात् पुनरभ्येति धर्माधर्मादिभिर्घनम् ॥३७१॥

तथा हि–" पूर्वप्रयोगाद्, असङ्गत्वाद्, बन्धच्छेदाद्, तथागतिपरिणामाच्च"॥ "आविद्धकुलालचक्रवद्, व्यपगतलेपालाबुवद्, एरण्डबीजवद्,अग्निशिखावच्च" ॥ "धर्मास्तिकायाभावात् " ॥ (तत्त्वार्थ० १० अ. ६, ७. ८ सूत्राणि)

अहो वैदिकमार्गे तु पुण्यनाशात् पुनर्भवः ।
मोक्षः श्रीजिनमार्गे च पुण्यपापोभयक्षयात् ॥३७२॥

तस्मादेष प्रशस्तोऽस्ति मोक्षः श्रीजिनसम्मतः ।
न ते स्वर्गादयो येभ्यः पतनं पुण्यसंक्षयात् ॥३७३॥

इत्येवं जीववादस्य स्वीकारे चतुरा अपि ।
जैनागमेन जीयन्ते जैमिनीयागमे रताः ॥३७४॥

जीववादमहातीक्ष्णदंष्ट्राघातातिभीषणः ।
जैनागममहाराहुर्ग्रसते वैदिकं विधुम् ॥३७५॥

जीवनित्यत्ववादेन सहाऽपूर्वस्य कल्पकः ।
क्षणिकस्वर्गफलको मीमांसकशिरोमणिः ॥३७६॥

कथमेतानहो वेदान् ज्ञानविज्ञानसन्निधीन् ।
चर्विताञ्जीववादेन गोपायितुमलं भवेत् ॥३७७॥

(अथोत्तरपक्षोपक्रमः)

इति मत्त्वेव, मन्येऽहं, साङ्ख्याचार्यपुरस्कृतैः ।
योगाचार्यैः प्रदिष्टोऽयं योगमार्गो दिवाकरः ॥३७८॥

न योगे न तथा सांख्ये जीवास्तित्वं प्रदृश्यते ।
अभावान्नित्यजीवस्य कर्मबन्धो न कस्यचित् ॥३७९॥

न जीवो नाम कोऽप्यत्र कर्ता तादृग् विलोक्यते ।
यो नित्यः सन् स्वयं कुर्याद् बद्धः स्याच्च स्वकर्मभिः ॥३८०॥

क्षणिकैः क्रियते कर्म शरीरैः क्षणिकं तथा ।
क्षणिकं तत्फलं चैव क्षणिकैरेव भुज्यते ॥३८१॥

अतो न कोऽपि तत्रास्ति कर्ता तत्पुण्यपापयोः ।
यत्फलं देहविध्वंसात् परं कोऽपि समश्नुताम् ॥३८२॥

एवं निरस्य जीवानां नित्यास्तित्वं, मृतेः परम् ।
कर्मणां प्रक्षयान्मोक्षो दूरमेवापसारितः ॥३८३॥

(अत्र योगसिद्धान्तसारसमुद्धारः)

दृशिमात्रः स्वयं शुद्धो द्रष्टा कोऽपीह मन्यते ।
भूतेन्द्रियात्मकं दृश्यं तस्माद् भिन्नमुदीर्यते ॥३८४॥

तथा हि—"द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः" ॥ (योग-द. २ पा. २० सू.) "प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्" ॥ (यो. द. २ पा. १८ सू.)

उभयोरेव संयोगाज्जगदेतत् प्रजायते ।
विवेकस्योदयादेव तयोर्भेदश्च गम्यते ॥३८५॥

भेदज्ञानात् सुखं दुःखं न कस्यापीति निश्चयात् ।
जीवन्नेव स्वयं मुक्तो विवेकी केवलो भवेत् ॥३८६॥

असत्ये सत्यताबुद्धिरशुचौ शुचिभावना ।
दुःखे सुखमतिः सेयमविद्या विकृते स्थिता ॥३८७॥

विकृतं च समग्रं तद् दृश्येऽन्तर्भावमर्हति ।
दृश्यं च सर्वथा भिन्नं द्रष्टुः शुद्धात् परात्परात् ॥३८८॥

विद्योदयादविद्याया विनाशात् सुसमाहितः ।
तमिमं भेदमालोक्य दृशिकैवल्यमश्नुते ॥३८९॥

अविप्लवामतः प्राहुर्हेयहानोपकारिणीम् ।
विवेकख्यातिमाचार्याः दृशिकैवल्यसाधिनीम् ॥३९०॥

योगाङ्गानामनुष्ठानाद्, अशुद्धेः सर्वथा क्षये ।
विवेकख्यापकं ज्ञानं स्वयमेव प्रकाशते ॥३९१॥

सम्यग् ज्ञानमिदं, यस्य सञ्जातेऽधिगमे जनः ।
यावद्देहं स्वयं प्राप्ते धर्म एव प्रवर्तते ॥३९२॥

तथा हि—" सम्यग् ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद् धृतशरीरः "
॥ सां. का. ६७ ॥

देहभेदे ततो जाते दैहिकाः परमाणवः ।
लीयन्ते प्रकृतौ, जीवस्ततो नैवावशिष्यते ॥३९३॥

घटाकाशस्य निर्माणे कारणं यो घटो भवेत् ।
तस्य ध्वंसाद् घटस्यैष घटाकाशोऽपि नश्यति ॥३९४॥

तथैव देहविध्वंसाद् दैहिकः कल्पितः पुमान् ।
प्रलीनः परमे पुंसि न पृथग्भावमर्हति ॥३९५॥

तदेवं द्विविधो मोक्षः शास्त्रसञ्चिन्तनान्मतः ।
प्रथमो जीवतः प्रोक्तो द्वितीयो मरणात् परः ॥३९६॥

देहक्षयात् परो मोक्षः सर्वसाधारणो मतः ।
न तदर्थं बुधः कोऽपि प्रयत्नमनुतिष्ठति ॥३९७॥

सुधिया तु सदा साध्यो जीवन्मोक्षोऽतिदुर्लभः ।
येनात्यन्तिक आनन्दो जीवतैवानुभूयते ॥३९८॥

साङ्ख्ययोगोपदेष्टारस्तदेवं द्वितयं परम् ।
प्रधानपुरुषोपाख्यं [1]दृश्यद्रष्ट्रात्मकं जगुः ॥३९९॥

वेदेषु स्तूयमाना ये – इन्द्राग्निमरुदादयः ।
वसुरुद्रादितेयाश्च दृश्येष्वन्तर्भवन्ति ते ॥४००॥

तेषां वैदिकदेवानां श्रद्धया समुपासनात् ।
विवेकस्तात्त्विकज्ञानकारणं चारु जायते ॥४०१॥

जाते विवेके निर्भ्रान्ते ज्ञानविज्ञानवान्नरः ।
प्रवृत्तः केवले धर्मे जीवन्मोक्षं प्रपद्यते ॥४०२॥

---

१. "द्रष्टृदृश्यात्मकं विदुः" । इति पाठान्तरम् ।

(अथोपसंहारः)

तदेवं जीववादेन पुनर्जन्मानुबन्धिना ।
भक्षिताश्चर्विता वेदा योगैः साङ्ख्यैश्च रक्षिताः ॥४०३॥

सांख्ययोगाधिगमनाद् वेदार्थाः प्रादुरासते ।
वेदान्तार्थोऽपि निःशङ्को हस्तस्थामलकायते ॥४०४॥

नन्वेवं सांख्ययोगाभ्यां वेदान्तार्थे प्रकाशिते ।
कृतं पुनर्ब्रह्मसूत्रैर्वेदव्यासविनिर्मितैः ॥४०५॥

इति चेद् ब्रह्मसूत्राणां सार्थकत्वं निशम्यताम् ।
न हि तत् सांख्ययोगानां प्रतिवादात् प्रसेत्स्यति ॥४०६॥

वैदिकान् सकलान् देवान् दृश्येऽन्तर्भाव्य योगिनः ।
प्रकृतौ च परे सांख्यास्तद्विवेकं प्रतुष्टुवुः ॥४०७॥

तज्जलानिति संज्ञाभिः सच्चिदानन्दनाममिः ।
भूतभव्यभवच्छब्दैर्वेदान्तास्तानथास्तुवन् ॥४०८॥

तथा हि–" सर्वं खल्विदं ब्रह्म, तज्जलानिति शान्त उपासीत० "
(छान्दोग्य० ३ प्रपा. १४ खण्डः)

इदमा सर्वशब्देन किञ्चैते वैदिकाः सुराः ।
वेदान्तेषु त्वनेकत्र दृश्यन्ते बहुशः स्तुताः ॥४०९॥

तदर्थमेव वेदान्तेष्वनेकत्र महर्षिभिः ।
ब्रह्मात्मशब्दावेकत्वस्थापकौ स्तः प्रतिश्रुतौ ॥४१०॥

(१ अ. १ पा. ४ सू.)

सांख्ये योगे च तौ शब्दौ न हि व्याख्येयतां गतौ ।
इत्यतः संशयो जातस्तयोरर्थविनिर्णये ॥४११॥

ब्रह्मशब्दः प्रयुक्तोऽयं वेदान्तेषु स्थले स्थले ।
स किं पुंसि प्रधाने वा किं वाऽन्यस्मिन् प्रयुज्यते ॥४१२॥

इत्येतामुत्थितां शङ्कां समाधातुमना ऋषिः ।
निर्ममे ब्रह्मसूत्राणि जीववादावधूतये ॥४१३॥

(अथास्मन्मते चतुःसूत्र्यर्थः)

"अथातो ब्रह्मजिज्ञासे"त्याद्यं सूत्रं स निर्ममौ ।
तदर्थश्च समासेन पुनरत्र निरूप्यते ॥४१४॥

(अथ प्रथमसूत्रार्थः)

सांख्ययोगोक्तसिद्धान्तान् आकलय्य व्यवस्थितान् ।
ब्रह्मशब्दार्थजिज्ञासा कर्तव्या शान्तचेतसा ॥४१५॥

श्रुत्युक्तो ब्रह्मशब्दोऽयं कस्यार्थस्यास्ति लक्षकः ।
इत्याकाङ्क्षोदये प्राह द्वितीयेनास्य लक्षणम् ॥४१६॥

(अथ द्वितीयसूत्रार्थः)

"जन्माद्यस्य यतः" सूत्रं द्वितीयमिह दृश्यते ।
यस्मादेतस्य जन्मादि तद् ब्रह्मेति च लक्ष्यते ॥४१७॥

आऽऽकाशादा तथाऽऽनन्दाद् व्यक्तं यद् दृश्यते जगत् ।
तदेतदिदमा ग्राह्यं षष्ठ्यन्तेन विपश्चिता ॥४१८॥

आविर्भावतिरोभावौ ग्राह्यौ 'जन्मादि' – शब्दतः ।
यतःशब्दाच्च संग्राह्यं कारणद्वितयं परम् ॥४१९॥

यस्माद् याभ्यामिति द्वाभ्यां पदाभ्यामेव सम्भवः ।
परस्य तसिलस्तस्माद् विचिकित्सेयमुद्भवेत् ॥४२०॥

एकमेवात्र निर्दिष्टं 'यतः' शब्देन कारणम् ।
उपादानं निमित्तं चेत्युभे किं वाऽत्र कारणे ॥४२१॥

न निमित्तेन रहितं नोपादानेन वर्जितम् ।
कार्यं किञ्चन लोकेऽस्मिन् दृष्टं वा द्रक्ष्यतेऽथ वा ॥४२२॥

न चाभेदः क्वचिद् दृष्ट उपादाननिमित्तयोः ।
अतो 'यतः' – पदाद् वाच्यं कारणद्वितयं परम् ॥४२३॥

न चैकतरबोधित्वं न चान्यतरबाधिता ।
दृष्टा यतःपदे तस्माल्लक्ष्यं तत् कारणद्वयम् ॥४२४॥

उपादानमपि ब्रह्म निमित्तं ब्रह्म किञ्चन ।
तदेवं ब्रह्मशब्दार्थावुभावेवात्र लक्षितौ ॥४२५॥

ततश्च 'यतः' – इत्यत्र 'याभ्याम्' – इति पदात् परः ।
प्रवृत्तस्तसिलध्येयः पुंस्प्रकृत्यर्थ–[1]बोधदः ॥४२६॥

(अथ तृतीयसूत्रार्थः)

नन्वेमस्य जगतो (महतो) याभ्यां जन्मादि कीर्तितम् ।
तावुभौ ब्रह्मशब्दार्थौ कुतः प्रादुर्बभूवतुः ॥४२७॥

---

१. 'बोधये' 'बोधकः' इति श्रीमद्भारतीकृष्णतीर्थशङ्कराचार्य-चरणानां पाठः ।

इत्येतस्याश्च शङ्कायाः समाधाने धृतादरः ।
चकार "शास्त्रयोनित्वादि"ति सूत्रं मुनीश्वरः ॥४२८॥

शास्तारावस्य जगतो व्यक्तस्य महतोऽथ वा ।
द्वावेव सर्वशास्त्रेषु प्रदिष्टौ परमर्षिभिः ॥४२९॥

तयोरेकमुपादानमव्यक्ता प्रकृतिस्तु या ।
अधिष्ठानं द्वितीयं च निमित्तं पुरुषस्तु यः ॥४३०॥

प्रकृतिश्च परा शास्त्री शास्ता च पुरुषः परः ।
एतयोरेकशेषेण शास्तारौ तावुभौ स्मृतौ ॥४३१॥

आविर्भावस्य जन्मादेरुत्पत्तेरथ कारणे ।
परमार्थविदः प्रायो योनिशब्दं प्रयुञ्जते ॥४३२॥

सा योनिर्नाम जन्मादेः कारणं किञ्चिदेतयोः ।
न शास्त्रोः परयोरस्ति तेनायोनी उभौ स्मृतौ ॥४३३॥

तयोर्भावोऽस्ययोनित्वं तदयोनित्वमेतयोः ।
शास्त्रोरस्तीति जन्यत्वं तयोरेतेन वार्यते ॥४३४॥

(अथ चतुर्थसूत्रार्थः)

नन्वेवमुभयोः शास्त्रोः सत्त्वे सिद्धान्ततः स्थिते ।
एकत्वं ब्रह्मणः कस्माद् वेदान्तेष्ववगम्यते ॥४३५॥

इति चेच्छ्रूयतां बन्धो बृहत्त्वाद् ब्रह्म गीयते ।
बृहत्त्वं लघुसापेक्षं तल्लाघवमपेक्षते ॥४३६॥

आनन्दो ब्रह्मणो रूपं, विज्ञानं तदपेक्षया ।
ब्रह्म, ब्रह्म मनो ज्ञेयं विज्ञानस्याप्यपेक्षया ॥४३७॥

प्राणो ब्रह्म मनोऽपेक्ष्य; ब्रह्मान्नं प्राणलाघवात् ।
बृहती पृथिवी प्रोक्ता ब्रह्माऽन्नादेरपेक्षया ॥४३८॥

पृथिव्यपेक्षया ब्रह्म प्रोक्ता ह्यापो बृहत्त्वतः ।
अपोऽपेक्ष्याभवद् ब्रह्म तेजः स्वस्य बृहत्तया ॥४३९॥

तेजोऽपेक्ष्याभवद् ब्रह्म वायुस्तैजसलाघवात् ।
अपेक्ष्य लाघवं वायोराकाशो ब्रह्म शाश्वतम् ॥४४०॥

अथाऽऽकाशगतं दृष्ट्वा लाघवं परमर्षिभिः ।
प्रधाने परमाव्यक्ते बृहत्त्वाद् ब्रह्मतेक्षिता ॥४४१॥

ततोऽपि परमाधारे बृहत्तां पुरुषे स्थिताम् ।
समीक्ष्य ख्याप्यते तस्य परमब्रह्मरूपता ॥४४२॥

यल्लघिष्ठतमं तस्माद् [1]यन्महिष्ठतमं ततः ।
तत्सर्वं ब्रह्मरूपत्वादेकत्वमधिगच्छति ॥४४३॥

सांख्ययोगोक्तमार्गेण किञ्च ब्रह्मणि या द्विता ।
सा सर्वत्रैव वेदान्तेष्वपि ख्याता महर्षिभिः ॥४४४॥

पुंस्प्रकृत्योः समानेऽपि ब्रह्मत्वे तद्विविक्तये ।
परं चैवापरं चेति प्रयुज्येते विशेषणे ॥४४५॥

---

१. "यद् गरिष्ठतमं ततः" इति श्रीमद्भारतीकृष्णतीर्थशङ्कराचार्य-चरणानां पाठः ॥

परब्रह्मपदेनातो ग्राह्यः सांख्यस्तुतः पुमान् ।
प्रकृतिश्चापरब्रह्मपदेन ग्राह्यतां व्रजेत् ॥४४६॥

(किञ्च) विशेषणानि यान्येव घटितानि नञा निरा ।
विशिष्यते परं ब्रह्म तैरधिष्ठाननामकम् ॥४४७॥

सहसर्वादिघटितैरितरैश्च विशेषणैः ।
विशिष्यतेऽपरं ब्रह्म प्रधानाव्यक्तनामकम् ॥४४८॥

अतो हि सगुणं ब्रह्म निर्गुणाद् भिद्यतेतराम् ।
सोपाधिकं हि सगुणं निर्गुणं निरुपाधिकम् ॥४४९॥

निरुपाधिकसंसर्गादुपाधिः स्वयमेव वा ।
भिन्नोऽपि लभते ब्रह्मसंज्ञां वेदान्तवारिधौ ॥४५०॥

ब्रह्म मा भूदुपाधिर्वा भेदस्तु स्वीकृतस्तयोः ।
स्वीकृतेनैव भेदेन तयोर्द्वित्वं तु सिध्यति ॥४५१॥

किञ्च व्यासोऽपि भगवान् सद्भावादेतयोर्द्वयोः ।
कार्यात्मनि ब्रह्मशब्दं सामीप्यादूचिवान् स्वयम् ॥४५२॥

तथा हि—" सामीप्यात्तु तद्व्यपदेशः " (४ अ. ३ पा. ९ ब्र. सूत्रम्)

कार्याधिकरणे किञ्च परत्त्वाच्चापरत्वतः ।
द्वैविध्ये ब्रह्मणः सिद्धे परे मुख्यत्वमाहितम् ॥४५३॥

तथा हि—" परं जैमिनिर्मुख्यत्वाद् " (४ अ. ३ पा. १२ ब्र. सू.)

(अथ द्वयोः समन्वयनिरूपणम्)

एवं सिद्धान्ततः सिद्धे द्वित्वेऽपि परमर्षिणा ।
एकत्वश्रवणे हेतुस्तुरीयेण निरूप्यते ॥४५४॥

तुरीयं यदिहाख्यातं सूत्रं 'तत्तु समन्वयात्' ।
तद्गतं तत्पदं त्वास्त एकत्वस्यैव बोधकम् ॥४५५॥

सिद्धे सत्यपि वेदान्ते कारणद्वयभेदतः ।
द्वित्वे, समन्वयादेव तदेकत्वं प्रसिध्यति ॥४५६॥

एवं तुकारः सिद्धार्थग्राहकः सन्नपि स्वयम् ।
[1]एकत्वस्याऽपि संग्राहे साहाय्यमनुतिष्ठति ॥४५७॥

आकाशादेः समस्तस्य भूतस्य तु समन्वयः ।
परेण ब्रह्मणा साक्षान्न केनाऽप्यनुभूयते ॥४५८॥

यावदव्यक्तरूपेण व्यक्तं न प्रविलीयते ।
न तावत्तत् समन्वेतुं परमं ब्रह्म पारयेत् ॥४५९॥

अव्यक्तमेव पुरुषं समन्वेति स्वरूपतः ।
अत एव तदा भेदो नैतयोरवभासते ॥४६०॥

अव्यक्तायामवस्थायामप्येषा प्रकृतिः परा ।
यद्यभिव्यज्यमाना स्यान्नाऽव्यक्तोच्येत सा तदा ॥४६१॥

---

१. "एकत्वसंग्रहेऽप्यत्र"। "एकत्वबोधनेऽप्यत्र"। "एकत्वसाधनेऽप्यत्र"। इति श्रीमद्भारतीकृष्णतीर्थशङ्कराचार्यचरणानां पाठः ॥

यथाऽव्यक्तमधिष्ठानमव्यक्तः पुरुषो यथा ।
तथैवैषाऽनभिव्यक्ता प्रकृतिः प्रोच्यते परा ॥४६२॥

"अयं पुमानियं देवी प्रकृतिः परमाऽव्यया" ।
नैवेत्थमेतयोर्भेदं कर्तुं ना सहसा क्षमः ॥४६३॥

अव्यक्ता प्रकृतिः स्वीयं पुमांसं परमव्ययम् ।
समन्वेति तथा, द्रव्यं यथा तस्य गुणादयः ॥४६४॥

अत एवात्र सिद्धान्ते तावुभावेव केवलौ ।
अव्यक्तावृषिभिः प्रोक्तौ [1]पुरुषः प्रकृतिस्तथा ॥४६५॥

अहेतुकत्वं नित्यत्वं व्यापकत्वमचेष्टता ।
एकत्वमित्यनेकेऽत्र गुणाः सन्त्युभयोः समाः ॥४६६॥

एवं गुणानां सादृश्यात् प्रकृतिः पुरुषं सदा ।
समन्वेतीति वेदान्ते तयोरैक्यं प्रदृश्यते ॥४६७॥

अथ सांख्ये समावस्था प्रकृतेः स्तूयते क्वचित् ।
पुरुषावस्थया साम्यं तत्र ग्राह्यं विपश्चिता ॥४६८॥

याऽवस्था पुरुषस्योक्ता प्रकृतेरपि तादृशी ।
समन्विताऽनुभूतेति तयोः सिद्धः समन्वयः ॥४६९॥

व्यक्ताव्यक्तस्वरूपस्य संघातस्य च किञ्च भोः ।
प्रसिद्धं पुरुषार्थत्वममात्यस्येव धीमतः ॥४७०॥

---

१. "मूलप्रकृतिपूरुषौ" । इति श्रीमद् भा. कृ. ती. शङ्कराचार्य-चरणानां पाठः ॥

सम्यङ् मनोऽनुकूलत्वं गत्वाऽमात्यो महीभृतः ।
यथा सर्वान् गुणान् धत्ते प्रकृतिः पौरुषाँस्तथा ॥४७१॥

तामवस्थामिह प्रोचुः पुरुषेण समन्वयम् ।
यस्यां न यान्त्रिकः कोऽपि व्यक्तां प्रकृतिमीक्षते ॥४७२॥

तादृश्यस्यामवस्थायां पुंस्प्रकृत्योः पृथक् स्थितिः ।
नैवावलोक्यते तस्मादुभयोर्ब्रह्मता समा ॥४७३॥

ब्रह्मशब्दः प्रयुक्तोऽयं क्वचित् संगतयोस्तयोः ।
क्वचिन्निमित्तमात्रे च उपादाने तथा क्वचिद् ॥४७४॥

ब्रह्मशब्दः प्रयुक्तोऽयं क्वचिदन्वितयोर्यदि ।
न हि तेनाऽवगन्तव्यो नित्याभेदः पृथक् सतोः ॥४७५॥

समन्वयात्तदेकत्वं प्रतीतमपि शब्दतः ।
शास्त्रोर्निवारयामास तुकारेण मुनीश्वरः ॥४७६॥

(शास्त्रप्रमाणकत्वपक्षखण्डनम् ॥)

तथात्वेऽप्यन्यथाऽऽचार्याः सूत्रं व्याकुर्वते परे ।
शास्त्रप्रमाणकत्वं च ब्रह्मणः साध्नुवन्ति ते ॥४७७॥

सूत्रेण 'शास्त्रयोनित्वाद्' – इत्येतेनापि ते बुधाः ।
ब्रह्मास्तित्वं प्रमिण्वन्ति शास्त्रमात्रावलम्बनात् ॥४७८॥

किन्तु चारुतरं नैतद् व्याख्यानं प्रतिभाति मे ।
प्रामाण्ये ब्रह्मणः शास्त्रं कथं स्यात् साधनं परम् ॥४७९॥

शास्त्रमेव प्रमाणं स्याद् यदि ब्रह्मनिरूपणे ।
तदेव लक्षितं पूर्वं भवेच्च परिभाषितम् ॥४८०॥

"एतच्छास्त्रमशास्त्रं तद्, ग्राह्यमेतन्न तत्तथा" ।
नैवेदृशो विवेकश्च कृतः सूत्रकृता क्वचित् ॥४८१॥

नैव यावन्निरूप्येत शास्त्ररूपं प्रमापकम् ।
कथं तावत् प्रमेयं तद् ब्रह्मापि प्रमितं भवेत् ॥४८२॥

वेदोपनिषदः किञ्च यदि स्युः शास्त्रसंज्ञिताः ।
नैवाविकलिताङ्गास्ता लभ्यन्ते जगतीतले ॥४८३॥

प्रामाण्ये विकलाङ्गस्य न हि श्रद्धोपजायते ।
भक्ता अपि निरस्यन्ति खण्डितां मूर्तिमर्णवे ॥४८४॥

लब्धो ह्युपनिषद्भागो यदि शास्त्रतयेष्यते ।
न तेन सकलं ब्रह्म पूर्णरूपं निरूप्यते ॥४८५॥

(पूर्वपक्षः)

खण्डिताङ्गेऽपि पितरि पितृत्वं यद्वदव्ययम् ।
अपूर्णाङ्गेऽपि वेदान्ते प्रामाण्यं तद्वदव्ययम् ॥४८६॥

(उत्तरः पक्षः)

इति चेदस्तु पुत्रस्य पिता मान्यो यथा तथा ।
अपुत्रस्य कथंकारं मान्यः स्यादपिता तु यः ॥४८७॥

श्रद्दधानस्य कस्यापि मान्यः सन्नपि खण्डितः ।
वेदोपनिषदां भागः कथं मान्यो भवेत् परैः ॥४८८॥

किञ्च प्रमाणभूतानां शास्त्राणां प्रादुरासने ।
शास्त्राण्येव महद् भूतं कारणं प्राहुरव्ययम् ॥४८९॥

यज्ञादृगादिवेदानां जन्म प्राह स्वयं श्रुतिः ।
भूतस्य महतश्चैते वेदा निःश्वसिता मताः ॥४९०॥

किञ्च प्रतिष्ठिता वेदा [1]मनस्येवेति निश्चये ।
कथं ते केवलाः शक्ता भवेयुर्ब्रह्मरूपणे ॥४९१॥

ऋचो यजूंषि सामानि मनस्येव प्रतिष्ठिताः ।
मनः प्राणे, स च प्राणः सत्यमन्ने प्रतिष्ठितः ॥४९२॥

अन्नं भूमावियं भूमिरप्सु नित्यं प्रतिष्ठिता ।
आपस्तेजसि तेजश्च यदा वायौ प्रतिष्ठितम् ॥४९३॥

वायुश्चाकाशरूपे स्यादाकाशश्च परात्मनि ।
तदा कथमिदं ब्रह्म ज्ञेयं स्याच्छास्त्रमाग्रतः ॥४९४॥

ब्रह्मस्वरूपचिन्तायां ब्रह्मरूपनिरूपणे ।
शास्त्रं महोपकारीति सर्वथा स्वीकरोम्यहम् ॥४९५॥

---

१. "यस्मिन् ऋचः साम यजूँषि०" ।

किन्तु तेनैव शास्त्रेण केवलेनावगम्यते ।
ब्रह्मेति सूत्रयोर्भाष्यं न [1]मह्यं रोचतेतराम् ॥४९६॥

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" ।
स्पष्टमेषा श्रुतिः प्राह ब्रह्म वाचामगोचरम् ॥४९७॥

"न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनः" ।
ब्रह्मोपनिषदेषा किं न ब्रूते शास्त्रदुर्गमम् ॥४९८॥

(उपसंहार)

येऽपि पूज्यतमास्तस्मादाचार्याः सूत्रयोर्द्वयोः ।
शास्त्रप्रमाणकत्वेन सार्थकत्वं प्रशासति ॥४९९॥

न ते तथा प्रिया भान्ति यथा ते सांख्यकोविदाः ।
यैः सांख्ययोगसिद्धान्तो ब्रह्मसूत्रैः समर्थितः ॥५००॥

तस्माद् यो ब्रह्मशब्दोऽयं श्रूयते बहुधा श्रुतौ ।
स क्वचित् पुरुषग्राही ग्राहकः प्रकृतेः क्वचित् ॥५०१॥

समन्वयात्तु शब्दोऽयमुभयोरपि वाचकः ।
तस्माद् वैदान्तिकं ब्रह्म पुंस्प्रकृत्यर्थवाचकम् ॥५०२॥

भृगुवल्ल्यां यतःशब्दात् कारणद्वयवर्णनात् ।
तत्र श्रुतो ब्रह्मशब्द उभयोरपि वाचकः ॥५०३॥

---

१. 'तथा मह्यं न रोचते" । इति श्रीमद् भा. कृ. ती. गुरुचरणानां पाठः ॥

"इहत्यो ब्रह्मशब्दस्तु द्वयोरेवास्ति वाचकः ।
समन्वयाद् " – इति प्राह तुरीयेण च सूत्रकृत् ॥५०४॥

अतः परं ब्रह्मशब्दः कुत्र प्रकृतिवाचकः ।
कुत्र वा केवलस्यैष पुरुषस्यास्ति वाचकः ॥५०५॥

इत्येतदग्रिमैः सूत्रैः शनकैः साधयिष्यते ।
अलमेतावता त्वत्र शङ्करः प्रीतिमाप्नुयात् ॥५०६॥
॥११६७॥

॥१६७३॥

–: इति चतुर्थ सूत्रम् :–

इति श्रीमद् ब्रह्मसूत्रभाष्यालोचने प्रथमाऽध्यायस्य प्रथमपादस्य चतुःसूत्री समाप्ता ॥

प्रथम सूत्र	श्लोक	संख्या	— ६१५
द्वितीय सूत्र	,,	,,	— ४०८
तृतीय सूत्र	,,	,,	— १४४
चतुर्थ सूत्र	,,	,,	— ५०६
			१६७३

श्रीः ॥

स्वाभिप्रायः प्रियो वा स्याद्,
अप्रियो वा यथासुखम् ।
प्रेष्यतां, क्रियतां किञ्च
कृतज्ञोऽयं निजो जनः ॥

संकेतस्थानम् :–श्री म. व. उपाध्यायः
डभोइया पोल, वाडी,
बडौदा. (गुजरात)